564

अध्यात्म ~~[illegible]~~ रामायणम्

Rāmāyanam

Adhyātma ~~Nām~~ yanam : Title

: Author

: Editor

: Year, Vols.

: Publisher

564 : Remarks

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीरामाय नमः ॥ श्रीमहादेवाय नमः ॥ सूत उवाच ॥ कदाचिन्नारदो यो-
परानुग्रहकांक्षया ॥ पर्यटन्सकलाँल्लोकान् [illegible] सत्यलोकमुपागमत् ॥१॥ तत्र दृष्ट्वा मूर्त्तिमद्भिः छंदोभिः परि-
[illegible]तं ॥ बालार्कप्रभया सम्यग्भासयंतं सभागृहं ॥२॥ मार्कंडेयादिभिः मुनिभिः स्तूयमानं मुहुर्मुहुः ॥ सर्वार्थप्रजो [illegible]
रस्वत्या समन्वितं ॥३॥ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं ॥ प्रणम्य दंडवद्भूमौ तुष्टाव मुनिपुंगवः ॥४॥ [illegible] स्तुतम
[illegible] हृष्टं स्वयंभुवं प्रेक्षको तमं ॥ किं प्रष्टुकाम स्वकमसि इति तं दिष्ट्या मितमुने ॥५॥ [illegible] वक्तस्य मुनिर्विभुः ॥ [illegible]
[illegible] तं मयासं [illegible] पूर्वमेव प्रभो मया ॥६॥ इदानीं [illegible] कमेवास्ति श्रोतव्यं सुरसत्तम ॥ तद्गृहस्य भविष्यंति यदि तेन [illegible]
॥७॥ आचारे कलिकल्मषेऽतो नराः पुण्यविवर्जिताः ॥ दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ॥८॥ परापवादनिरता [illegible]
[illegible] ॥ परद्रव्यानुरागिणः ॥ परहिंसापरायणाः ॥९॥ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः ॥ मातापितृकृतद्वेषाः स्त्री-
देवाः कामकिंकराः ॥१०॥ विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः ॥ धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥११॥ [illegible]
तिकर्माणः प्रायशः परवंचकाः ॥ क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः ॥१२॥ तद्वच्छूद्राश्च ये केचिद्ब्राह्मणाचार-
रताः ॥ स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः ॥१३॥ श्वशुरद्रोहकारिण्यो भविष्यंति न संशयः ॥ एतेषां नष्टबुद्धीनां पर-
लोकः कथं भवेत् ॥१४॥ [illegible] चिंताकुलं [illegible] चेतो [illegible] ॥ लघूपायेन येनैषां परलोको भविष्यति ॥ [illegible] तत्सर्वं वद म
[illegible] सर्वं [illegible] भवान्न [illegible] प्रत्यक्षवाचां कुशलोऽसि ॥१५॥ [illegible] ॥
[illegible] ॥ [illegible] तिर्मिलाप [illegible] ॥१७॥ श्रीरामतत्त्वं जिज्ञासुः पप्रच्छ विनयान्वितः ॥ ब्रह्मा [illegible]

शृणुयात्स्त्रीः सोपि मुच्येत पातकात् ॥ नमस्करोति योऽध्यात्मरामायणमदूरतः ॥३१॥ सर्वदे-
वार्चनफलं संप्राप्नोति न संशयः ॥ लिखित्वा पुस्तकेऽध्यात्मरामायणं विशेषतः ॥३२॥ यो द-
द्यात् रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ॥ अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च ॥३३॥ तत्फलं
कोटिगुणं लोके तत्फलं तस्य संभवेत् ॥ एकादशीदिनेऽध्यात्मरामायणमुपोषितः ॥३४॥ यो राम-
भक्तसंसदि व्याकरोति नरोत्तमः ॥ तस्य पुण्यफलं वक्ष्ये शृणुष्व मुनिसत्तम ॥३५॥ प्रत्यक्षरं तु
गायत्रीपुरश्चरणफलं भवेत् ॥ उपवासकृतं कृत्वा श्रीरामनवमीदिने ॥३६॥ रात्रौ जागरितोऽध्यात्म-
रामायणमनन्यधीः ॥ यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ॥३७॥ कुरुक्षेत्रादिनिखिलपुण्य-
तीर्थेष्वनेकशः ॥ आत्मतुल्यं धनं सूर्यग्रहणे सर्वतोमुखे ॥३८॥ विप्रेभ्यो व्यासतुल्येभ्यो दत्त्वा
यत्फलमश्नुते ॥ तत्फलं संभवेत्तस्य सत्यं सत्यं न संशयः ॥३९॥ यो गायते शुद्धमनाः [illegible] रामायणम-
हर्निशं ॥ आज्ञां तस्य प्रतीक्ष्यंते देवा इंद्रपुरोगमाः ॥४०॥ पठतां त्वहमध्यात्मरामायणमनुव्रतः ॥ यद्य-
त्करोति तत्कर्म तत्कोटिगुणितं भवेत् ॥४१॥ तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः ॥ सर्व [illegible]

गुरं व्याख्यातवान्स्वयं ॥१८॥ पुराणोत्तममध्यात्मरामायणमिति स्मृतं ॥ तस्या वृत्ती जगद्धात्री पूजयित्वा दिवं ग
ता ॥१९॥ आलोच्य नं तिस्या नंदमग्नातिष्ठति संप्रतं ॥ प्रचरिष्यति तल्लोके प्राण्यदृष्टवशाद्यदा ॥२०॥ तस्याः
पर्यन्तमात्रेण जनतायास्थितिसद्गति ॥ ता बहिः स्मृतते पापं वृत्तह त्यापुरःसरं ॥२१॥ यावज्जगति नाध्यात्मरा
मायणमुदेष्यति ॥ तावत्कलेर्महोत्साहः संचरिष्यति निश्चयः ॥२२॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ ताव लो
म महाक्रूराः संचरिष्यति ॥ निःशेषं यावदास्युर्ति नाध्यात्मरामायणमुदेष्यति ॥ तावत्सर्वाणि शास्त्राणि
विवदंते परस्परं ॥२४॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ तावत्सर्वे पुराणानि प्रवर्तन्ते महीतले
॥२५॥ अध्यात्मरामायणसंकीर्तनश्रवणादिजं ॥ फलं वक्तुं न शक्नोमि कात्स्न्येन मुनिसत्तम ॥ तथापि तस्य सं
माहात्म्यं वक्ष्ये किंचित्तव्यनघ ॥२६॥ शृणु चित्तं समाधाय शिवेनोक्तं पुरा मम ॥ अध्यात्म[illegible]रामायणं भिद
लोकं श्लोकार्द्धमेव वा ॥२७॥ यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् ॥ यस्त्वेतन्न्यहमध्यात्मरामायणं
मनन्यधीः ॥२८॥ यथाशक्ति पठेद्वर्ता स जीवन्मुक्ति उच्यते ॥ यो नरः कीर्तयेत् अध्यात्मरामायणमन्वहं दिनः ॥
२१ २९॥ दिने दिनेऽश्वमेधस्य फलं तस्य भवेन्मुने ॥ दृश्यपापि यो अध्यात्मरामायणमनादरात् ॥३०॥ उपन्य

ता स्यात्त्रिभिरेवाद्दिनैर्भवेत् ॥४३॥ पठन्श्रीरामहृदयं तुलस्याश्वत्थयोरधि ॥ सद्यस्तिरो प्रकुर्वीत ब्रह्मह
त्यां निवर्तते ॥४४॥ श्रीरामगीतमाहात्म्यं कृत्स्नं जानाति शंकरः ॥ तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं मु
ने ॥४५॥ तत्ते किंचित्प्रवक्ष्यामि कृत्स्नं वक्तुं न शक्यते ॥ यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशुद्धिमवाप्नुयात्
॥४६॥ श्रीरामगीत यत्पापं नानाशयति नारद ॥ तन्न पश्याम्यहं लोके मार्गितोऽपि सदा द्विज ॥४७॥ रामेलो
पनिषत्सिंधुमुन्मथ्योत्पादितां मुदा ॥ लक्ष्मणायार्पितां गीतां सुधां पीत्वाऽमरो भवेत् ॥४८॥ जमदग्नि
सुतः पूर्वं कार्तवीर्य्यवधेच्छया ॥ धनुर्विद्यामभ्यसितुं महेशस्यांतिके वसत् ॥४९॥ अधीयमानं पार्व
त्या रामगीतां प्रयत्नतः ॥ श्रुत्वा गृहीत्वा पुपठन्नारायणकलामगात् ॥५०॥ ब्रह्महत्यादिपापानां
निष्कृतिं यदि वांछति ॥ रामगीतां मासमात्रं पठित्वा मुच्यते नरः ॥५१॥ दुःप्रतिग्रहदुर्भोज्यदुरालापादिसं
भवं ॥ पं सद्यकृत्कीर्तनेन रामगीता विनाशयेत् ॥५२॥ शालग्रामशिलाग्रे च तुलस्यश्वत्थसन्निधौ ॥
यतीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः ॥५३॥ स तत्फलमवाप्नोति यद्वाचोऽपि न गोचरं ॥ रामगीतां पठन्भ
क्त्या यः श्राद्धे भोजयेद्द्विजान् ॥५४॥ तस्यैते पितरः सर्वे यांति विष्णोः परं पदं ॥ एकादश्यां निराहारो नि

तो द्वादशाद्दिने ॥५५॥ स्तित्वा गच्छतरो मर्त्ये रामगीतं पठेत्सुधीः ॥ स एव रामवंसा सा सर्वदेवैश्च पूज्यते ॥
५६॥ विना दानं विना ध्यानं विना तीर्थावगाहनं ॥ रामगीतां नरो धीत्य तदनंतफलं भवेत् ॥५७॥ बहुना
किमिहोक्तेन शृणु नारद तत्वतः ॥ श्रुतिस्मृतिपुराणेतिहासागमशतानि च ॥५८॥ अर्हंति नाल्पमध्या
त्मरामायणकलामपि ॥ अध्यात्मरामचरितस्य मुनीश्वराय माहात्म्यमेतदुदितं कमलासनेन ॥
यः श्रद्धया पठति वा शृणुयात्स मर्त्यः प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥५९॥ यः ॥६०॥ श्रीमरवार
णो यदि विजैः संप्रार्थितश्चिन्मयः संजातः पृथिवीतले रविकुले मायामनुष्यो व्ययः ॥ निश्चक्रं हत
राक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजेत ॥६१॥ विश्वो
द्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिं ॥ आनंदसांद्रममलं निजबोधरूपं
सीतापतिं विदिततत्वमहं नमामि ॥६२॥ पठंति ये नित्यमनन्यचेतसः शृण्वंति चाध्यात्मिकसंज्ञितं शु
भं ॥ रामायणं सर्वपुराणसंमतं निर्धूतपापाः हरिमेव यांति ते ॥६३॥ अध्यात्मरामायणमेव नित्यं
पठेद्यदीच्छेद्भवबंधमुक्तिं ॥ गवां सहस्रायुतकोटिदानात्फलं लभेन्मेघः शृणुयात्स नित्यं ॥६४॥ पुरारि

गिरिसंभूता श्रीरामार्णवसंगता ॥ अध्यात्मरामगंगेयं पुनाति भुवनत्रयं ॥६५॥ कैलासाग्रे कदाचिद्रवि
तविमले मंदिरे रत्नपीठे संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिधसंघैः ॥ देवी वामांकस्था गिरिव
रतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमहितलहरं वाक्यमानंदकंदं ॥६६॥ श्रीपार्वत्युवा
च ॥ नमोस्तु ते देव जगन्निवास सर्वात्मदृक्त्वं परमेश्वरोसि ॥ पृच्छामि तत्वं पुरुषोत्तमस्य सनातनं त्वं च
सनातनोसि ॥६७॥ गोप्यं यदत्यंतमनन्यवाच्यं वदंति भक्तेषु महानुभावाः ॥ तदप्यहो हं तव देव भक्ता प्रि
योसि मे त्वं वद यत्तु पृष्टं ॥६८॥ ज्ञानं सविज्ञानमथानुभक्तिवैराग्ययुक्तं च मितं विभास्वत् ॥ जानाम्यहं यो
षिदपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ॥६९॥ पृच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष ॥ श्रीरा
मचंद्रोऽखिललोकसारे भक्तिर्दृढा नौर्भवति प्रसिद्धा ॥७०॥ भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः सा
धनमस्ति किंचित् ॥ तथापि हृत्संशयबंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ॥७१॥ वदंति रामं परमे
कमाद्यं निरस्तमायागुणसंप्रवाहं ॥ भजंति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः ॥७२॥
वदंति केचित्परमोपि रामः स्वाविद्यया संवृतमात्मसंज्ञं ॥ जानाति नात्मानमतः परेण संबोधितो वेद परा
त्मतत्वं ॥७३॥ यदि स्म जानाति कुतो विलापः सीताकृते तेन कृतः परेण ॥ जानाति नैवं यदि केन सेव्यः समो हि

या॰रा॰
४॥ सर्वैरपिजीवजातैः॥अथोत्तरंकिंविदितंभवद्भिःस्तद्ब्रूहिमेसंशयभेदवाक्यं॥७४॥श्रीमहादेवउवा
सि२ च॥धन्यासिभक्तासिपरात्मनस्त्वंयज्ज्ञातुमिच्छातवरामतत्त्वं॥७५॥पुरानकेनाप्यभिचोदितोहंवक्तुं
रहस्यंपरमंनिगूढं॥७५॥त्वयाद्यभक्त्यापरिचोदितोहंवक्ष्येनमस्कृत्यरघूत्तमंते॥रामःपरात्मा
प्रकृतेरनादिरानंदएकःपुरुषोत्तमोहि॥७६॥स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहि
रास्थितोयः॥सर्वांतरस्थोपिनिगूढआत्मास्वमाययासृष्टमिदंविचष्टे॥७७॥जगंतिनित्यं
परितोभ्रमंतियत्संनिधौचुंबकलोहवद्धि॥एतन्नजानंतिविमूढचित्ताःस्वाविद्ययासंवृ
तमानसास्ते॥७८॥स्वाज्ञानमप्यात्मनिशुद्धबोधेस्वारोपयंतीहनिरस्तमाये॥संसारमेवा
नुसरंतियेवैपुत्रादिसक्ताःपुरुकर्मयुक्ताः॥७९॥जानंतिनैवंहृदयेस्थितंवैचामीकरंकंठग
तंयथाज्ञाः॥यथाप्रकाशोनतुविद्यतेरवौज्योतिःस्वभावेपरमेश्वरेतथा॥८१॥विशुद्धवि
ज्ञानघनेरघूत्तमेऽविद्याकथंस्यात्परतःपरात्मनि॥यथाहिचाक्ष्णोर्भ्रमतोगृहादिकंविनष्ट
दृष्टेर्भ्रमतीवदृश्यते॥८२॥तथैवदेहेंद्रियकर्तुरात्मनःकृतेपरेध्यस्यजनोविमुह्यति॥नाहो राम॰
नरात्रिःसवितुर्यथाभवेत्प्रकाशरूपाव्यभिचारतःक्वचित्॥८३॥ज्ञानंतथाज्ञानमिदंद्वयंह ४॥

द्वयंहरौरामेकथंस्थास्यतिशुद्धचिद्घने॥तस्मात्परानंदमयेरघूत्तमेविज्ञानरूपेहिनविद्यतेतमः॥८४॥
अतज्ञानसाक्षित्वमरविंदलोचनेमायाश्रयत्वान्नहिमोहकारणं॥८५॥महादेवउवाच॥अत्रतेक
थयिष्यामिरहस्यमपिदुर्लभं॥सीतारामममरुत्सूनुःसंवादंमोक्षसाधनं॥८६॥पुरासमाप
तेरामोरावणंदेवकंटकं॥हत्वारणेरणश्लाघीसपुत्रबलवाहनं॥८७॥सीतयासहसुग्रीवलक्ष्म
णाभ्यांसमन्वितः॥अयोध्यामगमद्रामोहनुमत्प्रमुखैर्वृतः॥८८॥अभिषिक्तःपरिवृतोव
सिष्ठाद्यैर्महात्मभिः॥सिंहासनेमहासीनःकोटिसूर्यसमप्रभः॥८९॥दृष्ट्वातदाहनूमंतंप्रांजलिं
पुरतःस्थितं॥कृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिं॥९०॥रामःसीतामुवाचेदंब्रूहितत्त्वंह
नूमते॥निःकल्मषोयंज्ञानस्यपात्रंनौनित्यमद्भक्तिमान्॥९१॥तथेतिजानकीप्राहतत्त्वंरामस्य
निश्चितं॥हनुमतेप्रपन्नायसीतालोकविमोहिनी॥९२॥सीताउवाच॥रामंविद्धिपरंब्रह्मस
च्चिदानंदमद्वयं॥सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरं॥९३॥आनंदंनिर्मलंशांतंनिर्विकारंनि
रंजनं॥सर्वव्या[redacted]मात्मानंस्वप्रकाशमकल्मषं॥९४॥मांविद्धिमूलप्रकृतिंसर्गस्थित्यंतका
पिन

अ॰रा॰
।७।

मि

रिणं॥ तस्य संनिधिमात्रेण सृजामीदमतंद्रिता॥९५॥ तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽ
बुधैः॥ अयोध्यानगरे जन्म रघुवंशेऽतिनिर्मले॥९६॥ विश्वामित्रसहायत्वं मखसंरक्षणं ततः॥ अ
हल्याशापशमनं चापभंगो महेशितुः॥९७॥ मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः॥ अयोध्यानगरे
वासो मया द्वादशवार्षिकः॥९८॥ दंडकारण्यगमनं विराधवध एव च॥ मायामारीचमरणं मायासीताहृ
तिस्तथा॥९९॥ जटायुषो मोक्षलाभः कबंधस्य तथैव च॥ शबर्याः पूजनं पश्चात्सुग्रीवेण समागमः॥
॥१००॥ वालिनश्च वधः पश्चात्सीतान्वेषणमेव च॥ सेतुबंधश्च जलधौ लंकायाश्च निरोधनं॥१०१॥ राव
णस्य वधो युद्धे सपुत्रस्य दुरात्मनः॥ विभीषणे राज्यदानं पुष्पकेण मयाहसे॥१०२॥ अयोध्यागमनं पश्चाद्राज्ये
रामाभिषेचनं॥ एवमादीनि कर्माणि मयैवाचरितान्यपि॥ आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि॥१०३॥
रामो न गच्छति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित्॥१०४॥ आनंदमूर्तिरचलः प
रिणामहीनो मायागुणाननुगतो हि तथा विभाति॥१०५॥ महादेव उवाच॥ ततो रामः स्वयं प्राह हनूमंतमुपस्थि रामः
तं॥ शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां॥१०६॥ आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान्॥ जलाशये महा ५॥

काशस्तदवच्छिन्न एव हि॥१०७॥ प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं नभः॥ बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णं तथा
परं॥१०८॥ आभासस्त्वपरं बिंबभूतमेवं त्रिधा चितिः॥ साभासबुद्धेः कर्तृत्वमविच्छिन्नेविकारिणि॥१०९॥
साक्षिण्यारोप्यते भ्रांत्या जीवत्वं [illegible] च तथा बुधैः॥ आभासस्तु मृषा बुद्धि
रविद्याकार्यमुच्यते॥११०॥ अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः॥ अविच्छिन्नस्य प
र्णेन एकत्वं प्रतिपद्यते॥१११॥ तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा॥ ऐक्यज्ञानं यदो
त्पन्नं महावाक्येन चात्मनोः॥११२॥ तदाविद्या स्वकार्यैश्च नश्यत्येव न संशयः॥ एतद्विज्ञाय मद्भक्तो मद्भावा
योपपद्यते॥११३॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यतां॥ न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि॥११४॥
इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ॥ मद्भक्तिहीनाय शठाय न त्वया दातव्यमैंद्रादपि राज्य
तोधिकं॥११५॥ श्रीमहादेव उवाच॥ एतत्तेऽभिहितं देवि श्रीरामहृदयं मया॥ अतिगुह्यतमं हृद्यं पवित्रं पाप
शोधनं॥११६॥ साक्षाद्रामेण कथितं सर्ववेदांतसंग्रहं॥ यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः॥११७॥ ब्रह्म

हत्यादिपापानिजन्मार्जितान्यपि ॥ नश्यंत्येवनसंदेहोरामस्यवचनंयथा ॥ १८ ॥ जातिदुष्टोऽतिपापीपरधन
परदारेषुनित्योद्यतोवास्तेपीब्रह्मघ्नमातातत्ववनिरतोयोगिवृंदापकारी ॥ यंसंपूज्याभिरामंपठतिच
हृदयंरामचंद्रस्यभक्त्यायोगींद्रैरप्यलभ्यंपदमिहलभतेसर्वदेवैःसपूज्यः ॥ इतिश्री ब्रह्मांडपुराणेउ
त्तरखंडेउमामहेश्वरसंवादेऽध्यात्मरामायणेश्रीरामहृदयंनामप्रथमोऽध्यायः ॥ श्रीपार्व
त्युवाच ॥ धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्पते ॥ विच्छिन्नोमेऽतिसंदेहग्रंथिर्भव
दनुग्रहात् ॥ १ ॥ त्वन्मुखाद्गलितंरामतत्वामृतरसायनं ॥ पिबंत्यामेमनोदेवनतृप्यतिचवा
पदं ॥ २ ॥ श्रीरामस्यकथातत्वंश्रुतंसंक्षेपतोमया ॥ इदानींश्रोतुमिच्छामिविस्तरेणस्फुटान
र ॥ ३ ॥ श्रीमहादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् ॥ अध्यात्मरामच
रितंरामेणोक्तंपुरामम ॥ ४ ॥ तदद्यकथयिष्यामिशृणुतापत्रयापहं ॥ यच्छ्रुत्वामुच्यतेजंतुरज्ञा
नोत्थमहाभयात् ॥ प्राप्नोतिपरमामृद्धिंदीर्घायुःपुत्रसंतति ॥ ५ ॥ हमिर्त्तीरेणरम्यादसवदनमुखारवासे

पुरस्तोगणान्धृत्वागोरूपसादोदिविजमुनिजनैःसाकमब्जासनस्य ॥ गत्वालोकंरुदंतीव्यस
नमुपगतंब्रह्मणेप्राहसर्वंबुद्ध्वाध्यात्वामुहूर्तंसकलमपिहृदावेदसेषात्मकत्वात् ॥ ६ ॥ तस्मात्क्षीर
रसमुद्रतीरमुपगमत् ॥ वृत्वापचदेवैर्वृतोदेव्याचाखिललोकहृत्स्थममजरंसर्वज्ञमीशंहरिं ॥
अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैःस्तोत्रैःपुराणोद्भवैर्भक्त्यागद्गदयागिरानंदवाष्पैर्वृतः ॥ ७ ॥ ततस्फुरत्स
हस्रांशुसहस्रसदृशप्रभुः ॥ आविरासीद्धरिःप्राच्यांदिशांव्यपनयंस्तमः ॥ ८ ॥ कथंचिद्दृष्टवान्ब्रह्मा
दुर्दर्शमकृतात्मनां ॥ इंद्रनीलप्रतीकाशंस्मितास्यंपद्मलोचनं ॥ ९ ॥ किरीटहारकेयूरकुंडलैःकटका
दिभिः ॥ विभ्राजमानंश्रीवत्सकौस्तुभप्रभयावृतं ॥ १० ॥ स्तुवद्भिःसनकाद्यैश्चपार्षदैःपरिवेष्टितं ॥ श
खचक्रगदापद्मवनमालाविराजितं ॥ ११ ॥ स्वर्णयज्ञोपवीतेनस्वर्णवर्णांबरेणच ॥ श्रियाहत्याच
सहितंगरुडोपरिसंस्थितं ॥ १२ ॥ हर्षगद्गदयावाचास्तोतुंसमुपचक्रमे ॥ ब्रह्मोवाच ॥ नतोऽस्मितेपदं
देवप्राणबुद्धींद्रियात्मभिः ॥ यच्चिंत्यतेकर्मपाशाद्धृदिनित्यंमुमुक्षुभिः ॥ १४ ॥ माययागुणमय्यात्वंसृजस्यव
सिलुंपसि ॥ जगत्तेननतेलेपःस्वानंदानुभवात्मनः ॥ १५ ॥ तथाशुद्धिर्नदुष्टानांदानाध्ययनकर्मभिः ॥ शु

ब्रात्मनां ते यशांसि सदा भक्तिमतां प्रभो ॥१६॥ एतत्स्तवं यो भिमद्दष्टः चित्तदोषापनुत्तये ॥ सद्यो तद्हृदये
नित्यं मुनिभिः सत्वै तेऽर्चितः ॥१७॥ ब्रह्मादैस्त्वादिसिष्य थेन स्वामिः पूर्वसेवितः ॥ एतत्पठे स्तो
त्रमस्त्वयं तौ निमिद्दिभावितः ॥१८॥ भवो भक्तिपूजा निमील्य तु जसी मा नयाविमो ॥ स्पर्द्धि
तेवक्षसि पदं नत्वा पिश्रीसपत्निवत् ॥१९॥ एतत्स्तव त्वा दमभक्तो बुतवभक्तिः श्रियोऽधिका ॥ भ
क्तिमे वामिवोद्दंति त्वद्भक्ताः सारवेदिनः ॥२०॥ एतत्स्तवं त्वादक नमजैर्भक्तिरेव सदास्तमे ॥ सं
सार स्तामम कानां मे षधं भक्तिरेव ते ॥२१॥ इति ब्रुवंतं ब्रह्माणं भगवान्हरिः ॥ किं करो
मीति तं वेधाः प्रत्युवाचातिहर्षितः ॥२२॥ भगवन् रावणो नाम पौलस्त्यतनयो महान् ॥ राक्ष
सानामधिपतिर्मद्दत्तवरदर्पितः ॥२३॥ त्रिलोकीं लोकपालांश्च बाधते विश्वकंटकः ॥ मानुषे
णाम्रतिस्तस्य मया कल्याणकल्पितः ॥२४॥ तत्त्वं मानुषो भूत्वा जहि देवरिपुं प्रभो ॥ श्रीभ
गवानुवाच ॥ कश्यपस्य वरो दत्तस्तपसा तोषितेन मे ॥२५॥ याचितः पुत्रभावाय तथेत्यंगी
कृतं मया ॥ स इदानीं दशरथो भूत्वा तिष्ठति भूतले ॥२६॥ तस्याहं पुत्रतामेत्य कौशल्या

यां शुभेऽदये ॥ चतुर्धात्मानमेवाहं सृजामीतरयोः पृथक् ॥ योगमायापि सीतेति जनकस्य गृहे तदा ॥ उत्पत्स्यते तया सार्धं स
र्वं पादयाम्यहं ॥ इत्युक्त्वांतर्दधे विष्णुर्ब्रह्मा देवानथाब्रवीत् ॥ विष्णुर्मानुषरूपेण भविष्यति रघोः कुले ॥ यूयं सृजध्वं सर्वेऽपि वा
नरेष्वंशसंभवान् ॥ विष्णोः सहायं कुरुत यावत्स्थास्यति भूतले ॥ इति देवान्समादिश्य समाश्वास्य च मेदिनीं ॥ ययौ ब्रह्मा
स्वभवनं विज्वरः सुखमास्थितः ॥ देवाश्च सर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततो हरेः ॥ महाबलाः पर्वत
वृक्षयोधिनः प्रतीक्षमाणा भगवंतमीश्वरं ॥ ॥ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरखंडे
द्वितीयोऽध्यायः ॥ श्रीमहादेव उवाच ॥ अथ राजा दशरथः श्रीमान्सत्यपराक्रमः ॥ अयोध्याधिपतिर्वीरः
सर्वलोकेषु विश्रुतः ॥ सोऽनपत्यत्वदुःखेन पीडितो गुरुमेकदा ॥ वसिष्ठं मुनिशार्दूलं नत्वा वाक्यमिदमब्रवीत् ॥ स्वामि
न्पुत्राः कथं मे स्युः सर्वलक्षणलक्षिताः ॥ पुत्रहीनस्य मे राज्यं सर्वं दुःखाय कल्पते ॥ ततोऽब्रवीद्वसिष्ठस्तं भविष्यति
सुतास्तव ॥ चत्वारः सत्त्वसंपन्ना लोकपाला इवापराः ॥ शांतां भर्तारमानीय ऋष्यशृंगं तपोधनं ॥ अस्माभिः
सहितः पुत्रकामेष्टिं शीघ्रं तावरः ॥ तथेति मुनिमानीय मंत्रिभिः सहितः शुचिः ॥ यज्ञकर्म समारेभे मुनिभिर्वीत
कल्मषैः ॥ श्रद्धया हूयमानेऽग्नौ तप्तजांबूनदप्रभः ॥ पायसं स्वर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ॥ गृहाण पायसं दि

अध्या०रा०
८॥

यंपुत्रीयंदेवनिर्मितंतेलप्स्यातेपरमात्मानंपुत्रत्वेनसंशयः॥ इत्युक्त्वापायसंदत्वाराज्ञेसोंतर्धेनलः॥ ववंदेमुनिशार्दू नि०१
लौराजालब्धमनोरथः॥ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातोददौहविः॥ कौशल्यायैसकैकेय्यैअर्धमर्धंप्रयत्नतः
॥ततःसुमित्रासंप्राप्ताजगृध्नुःपौत्रिकंचरुं॥ कौशल्यातुस्वभागार्धंददौतस्यैमुदान्विता॥ कैकेयीचस्वभागा
र्धंददौप्रीतिसमन्विता॥ उपभुज्यचरुंसर्वाःस्त्रियोगर्भसमन्विता॥ देवताइवरेजुःस्वभासाराजमंदिरे॥
दशमेमासिकौशल्यासुषुवेमध्वये॥ मधुमासेसितेपक्षेनवम्यांकर्कटेशुभे॥ पुनर्वस्वृक्षसहितेउच्चस्थ
ग्रहपंचके॥ मेषंपूषणिसंप्राप्तेपुष्पवृष्टिसमाकुले॥ आविरासीज्जगन्नाथःपरमात्मासनात
नः॥ नीलोत्पलदलश्यामःपीतवासाश्चतुर्भुजः॥ जलजारुणनेत्रांतःस्फुरत्कुंडलमंडितः॥ सहस्रा
र्कप्रतीकाशःकिरीटीकुंचितालकः॥ शंखचक्रगदापद्मवनमालाविराजितः॥ अनुग्रहाख्यहृत्स्थें
दुसूचकस्मितचंद्रिकाः॥ करुणारससंपूर्णविशालोत्पललोचनः॥ श्रीवत्सहारकेयूरनूपुरादि
विभूषणः॥ दृष्ट्वातंपरमात्मानंकौशल्याविस्मयाकुला॥ हर्षाश्रुपूर्णनयनानत्वाप्रांजलिर राम०
ब्रवीत्॥ कौशल्योवाच॥ देवदेवनमस्तेस्तुशंखचक्रगदाधर॥ परमात्माच्युतोनंत॥ वदंत्यगोच ८॥

पुत्रस्त्वंपुरुषोत्तम१

रंवाचांबुद्ध्यादीनामतींद्रियं॥ त्वांवेदवादिनःसत्तामात्रंज्ञानैकविग्रहं॥ त्वमेवमाययाविश्वंसृजस्यवसिहंसि
च॥ सत्वादिगुणसंयुक्तस्तुर्यएवामलःसदा॥ करोषीवनकर्तात्वंगच्छसीवनगच्छसि॥ शृणोषिनशृणोषीव
पश्यसीवनपश्यसि॥ अप्राणोह्यमनाःशुद्धइत्यादिश्रुतिरब्रवीत्॥ समःसर्वेषुभूतेषुतिष्ठन्नपिनलक्ष्य
से॥ अज्ञानध्वांतचित्तानांव्यक्तएवसुमेधसां॥ जठरेतवदृश्यंतेब्रह्मांडाःपरमाणवः॥ त्वंममोदरसंभूतइतिलोका
न्विडंबसे॥ भक्तेषुपारवश्यंतेदृष्टंमेद्यरघूत्तम॥ संसारसागरेमग्नापतिपुत्रधनादिषु॥ भ्रमामिमाययाते
पादमूलमुपागता॥ देवत्वद्रूपमेतन्मेसदातिष्ठतुमानसे॥ आवृणोतुनमांमायातवविश्वविमोहिनी
॥ उपसंहरविश्वात्मन्नदोरूपमलौकिकं॥ दर्शयस्वमहानंदबालभावंसुकोमलं॥ ललितालिंगनालापै
स्तरिष्याम्युत्कटंतमः॥ श्रीभगवानुवाच॥ यद्यदिष्टंतवास्त्येवतत्तद्भवतुनान्यथा॥ अहंतुब्रह्मणापूर्वंभूमे
र्भारापनुत्तये॥ प्रार्थितोरावणंहंतुंमानुषत्वमुपागतः॥ त्वयादशरथेनाहंतपसाराधितःपुरामत्पुत्रत्वाभि
कांक्षिण्यातथाकृतमनिंदिते॥ रूपमेतत्त्वयादृष्टंप्राक्तनंतपसःफलं॥ मद्दर्शनंविमोक्षायकल्पतेह्यन्यदुर्ल
भं॥ संवादमावयोर्यस्तुपठेद्वाशृणुयादपि॥ सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत्॥ इत्युक्त्वामातरंरामो

ध्या.रा.
८॥

बालोभूत्वारुरोदह॥बालत्वेपीन्द्रनीलाभोविशालाक्षोतिसुंदरः॥बालारुणप्रतीकाशोलालि
ताखिललोकपः॥अथराजादशरथःश्रुत्वापुत्रोद्भवोत्सवं॥आनंदार्णवमग्नोसावाययौगु
रुणासह॥रामंराजीवपत्राक्षंदृष्ट्वाहर्षाश्रुसंप्लुतः॥गुरुणाजातकर्माणिकर्तव्यानिचकारसः
॥कैकेयीचाथभरतमसूतकमलेक्षणं॥सुमित्रायांयमौजातौपूर्णेन्दुसदृशाननौ॥तदाग्राम
सहस्राणिब्राह्मणेभ्योददौमुदा॥सुवर्णानिचरत्नानिवासांसिसुरभीःशुभाः॥यस्मिन्र
मंतेमुनयोविद्ययाऽज्ञानविप्लवे॥तंगुरुःप्राहरामेतिरमणाद्रामइत्यपि॥भरणाद्भरतोनाम
लक्ष्मणंलक्षणान्वितं॥शत्रुघ्नंशत्रुहंतारमेवंगुरुरभाषत॥लक्ष्मणोरामचंद्रेणशत्रुघ्नो
भरतेनच॥द्वंद्वीभूयचरंतौतौपायसांशानुसारतः॥रामस्तुलक्ष्मणेनाथविचरन्बालली
लया॥रमयामासपितरौचेष्टितैर्मुग्धभाषितैः॥भालेस्वर्णमयाश्वत्थपर्णमुक्ताफलप्रभं॥कंठे
रत्नमणिव्रातमध्यद्वीपिनखांचितं॥कर्णयोःस्वर्णपत्रेणरत्नांचितसुकुंडले॥शिंजानमणिमंजी
रकटिसूत्रांगदैःस्तुतं॥स्मितवक्त्राल्पदशनमिंद्रनीलमणिप्रभं॥अंगणेरिंगमाणंतंतर्णकाननुसर्व

राम:
८॥

नं२

तः॥दृष्ट्वादशरथोराजाकौशल्यामुमुदेतदा॥भोक्ष्यमाणोदशरथोरामंमेहीतिचासकृत॥आह्वयत्यतिहर्षेणप्रेम्णानायाति
लीलया॥आनयेतिचकौशल्यामाहसासस्मितासुतं॥धावत्यपिनशक्नोतिस्प्रष्टुंयोगिमनोगतिं॥प्रहसन्स्वयमायातिकर्दमां
कितपाणिना॥किंचिद्गृहीत्वाकवलंपुनरेवपलायते॥एवमानंदसंदोहोजगदानंदकारकः॥मायाबालवपुर्धृत्वारमयामास
दंपती॥अथकालेनतेसर्वेकौमारंप्रतिपेदिरे॥उपनीतावसिष्ठेनसर्वविद्याविशारदाः॥धनुर्वेदंचनिरताःसर्वशा
स्त्रार्थवेदिनः॥बभूवुर्जगतांनाथालीलयानररूपिणः॥लक्ष्मणोरामसदारामनुगच्छतिसादरं॥सेव्यसेवकभावेनश
त्रुघ्नोभरतंतथा॥रामस्तुचापधरोनित्यंतूणीबाणान्वितःप्रभुः॥अश्वारूढोवनंयातिमृगयायैसलक्ष्मणः॥हत्वादुष्टमृगा
न्वन्यान्पित्रेसर्वं [illegible] वसिवादंच॥पौरकार्याणिसर्वाणिकरोतिविनयान्वितः॥
बंधुभिःसहितोनित्यंभुक्त्वामुनिभिरन्वहं॥धर्मशास्त्ररहस्यानिशृणोतिव्याकरोत्यपि॥एवंपरात्मामनुजावतारोमनुष्य
लोकाननुसृत्यसर्वंचक्रेऽविकारीपरिणामहीनोविचार्यमाणेनकरोतिकिंचित्॥इतिश्रीमदध्यात्मरामायणेउमा
महेश्वरसंवादेबालकांडेतृतीयोध्यायः॥महादेवउवाच॥कदाचित्कौशिकोऽभ्यागादयोध्यांज्वलनप्रभः॥
द्रष्टुंरामंपरात्मानंजातंज्ञात्वास्वमायया॥दृष्ट्वादशरथोराजाप्रत्युद्गम्याचिरेणतु॥वसिष्ठेनसमागम्यपूजयित्वायथाविधि॥
२

अध्या.रा.
१०।।

पप्रच्छ च मुनिं राजा प्रांजलिर्भक्तिनम्रधीः ॥ कृतार्थोस्मि मुनीन्द्राहं त्वदागमनकारणात् ॥ त्वद्विधा यद्गृहं यांति तत्रैवायां
ति संपदः ॥ यदर्थमागतोसि त्वं ब्रूहि सत्यं करोमि तत् ॥ विश्वामित्रोपि तं प्रीतः प्रत्युवाच महामतिः ॥ अहं पर्वणि सं
प्राप्ते दृष्टुं यायश्च सुरान्पितॄन् ॥ यदारभे तदा दैत्या विघ्नं कुर्वंति नित्यशः ॥ मारीचश्च सुबाहुश्चापरे चानुचरास्त
योः ॥ अतस्तयोर्वधार्थाय ज्येष्ठं रामं प्रयच्छ मे ॥ लक्ष्मणेन सह भ्राता तव श्रेयो भविष्यति ॥ वसिष्ठेन सहामंत्र्य दी
यतां यदि रोचते ॥ पप्रच्छ गुरुमेकांते राजा चिंतापरायणः ॥ किं करोमि गुरो रामं त्यक्तुं नोत्सहते मनः ॥ बहुवर्ष
सहस्रांते कष्टेनोत्पादिताः सुताः ॥ चत्वारोमरतुल्यास्ते तेषां रामोतिवल्लभः ॥ रामोयदा गच्छति चन्नजीवामि कथं
२२ चन ॥ प्रत्याख्यातो यदि मुनिः शापं दास्यत्यसंशयं ॥ कथं श्रेयो भवेन्मह्यं मम चापि न स्पृशेत् ॥ वसिष्ठ उवाच ॥ शृ
णु राजन्देव गुह्यं गोपनीयं प्रयत्नतः ॥ रामो न मानुषो जातः परमात्मा सनातनः ॥ भूमेर्भारावताराय ब्रह्मणा प्रार्थितः
पुरा ॥ स एव जातो भवने कौशल्यायां तवानघ ॥ त्वं तु प्रजापतिः पूर्वं कश्यपो ब्रह्मणः सुतः ॥ कौशल्या चादितिर्देव
माता पूर्वं यशस्विनी ॥ भवंतौ तपउग्रं वै तेपाते बहुवत्सरं ॥ अर्थ्यास्पविषयो विष्णुपूजाध्यानैकतत्परौ ॥ तदाप्र

सो१

सन्नो भगवान्वरदो भक्तवत्सलः वृणीवरमित्युक्ते त्वं मे पुत्रो भवामल ॥ इति त्वया याचितोसौ भगवान्भूतभावनः ॥ तथेत्युक्त्वा
थ पुत्रस्ते जातो रामः स एव हि ॥ शेषस्तु लक्ष्मणो राजन्राममेवानुयपते ॥ जातौ भरतशत्रुघ्नौ शंखचक्रे गदाभृतः ॥ योगमा
या पि सीतेति जाता जनकनंदिनी ॥ विश्वामित्रोपि रामाय तां योजयितुमागतः ॥ एतद्गुह्यतमं राजन्न वक्तव्यं कदा
चन ॥ अतः प्रीतेन मनसा पूजयित्वाथ कौशिकं ॥ प्रेषयस्व रमानाथं रामं च सह लक्ष्मणं ॥ वसिष्ठेनैवमुक्तस्तु राजा दश
रथस्तदा ॥ कृतकृत्यमिवात्मानं मेने प्रमुदितांतरः ॥ आहूय राम रामेति लक्ष्मणेति च सादरं ॥ आलिंग्य मूर्ध्न्यवघ्राय
कौशिकाय समर्पयत् ॥ ततोतिहृष्टो भगवान्विश्वामित्रः प्रतापवान् ॥ आशीर्भिरभिनंद्याथ राजानं रामलक्ष्मणौ ॥
गृहीत्वा चापतूणीरबाणखड्गधरौ तमौ ॥ किंचिद्देशमतिक्रम्य राममाहूय भक्तितः ॥ ददौ बलां चातिबलां विद्ये द्वे देवनिर्मिते ॥
ययोर्ग्रहणमात्रेण क्षुत्क्षामादि न जायते ॥ ततउत्तीर्य गंगां ते ताडकावनमागमन् ॥ विश्वामित्रस्तदा प्राह रामं सत्य
पराक्रमं ॥ अत्रास्ति ताडका नाम राक्षसी कामरूपिणी ॥ बाधते लोकमखिलं जहि तामविचारयन् ॥ क४
तथेति धनुरादाय सगुणं रघुनंदनः ॥ टंकारमकरोत्तेन शब्देनापूरयन्वनं ॥ तच्छ्रुत्वा ताडका स
हमानासात ताडका घोररूपिणी ॥ क्रोधसंमूर्छिता रामं अभिदुद्राव मेघवत् ॥ तामेकेन शरेणाशु ताड
यामास वक्षसि ॥ पपात विपिने घोरा वमंती रुधिरं बहु ॥ ततोतिसुंदरी यक्षी सर्वाभरणभूषिता ॥
र१

मासर

जःस्य शैकोस्तीपानाशनं॥ आस्ते चापि रघुश्रेष्ठ तपोदुष्करमास्थिता॥ यावपस्य मुनेर्भार्यामहल्यां ब्रह्मणः सुतां॥
इत्युक्त्वा राघवं हस्ते गृहीत्वा मुनिपुंगवः॥ दर्शयामाहल्यां मुक्तिलतपसा स्थितां॥ रामः शिलां पदा स्पृष्ट्वा तां महादेव उ
चापश्यत्तपोधनां॥ ननाम राघवोहल्यां रामोहमिति चाब्रवीत्॥ ततो दृष्ट्वा रघुश्रेष्ठं पीतकौशेयवा
ससं धनुर्बाणधरं रामं लक्ष्मणेन समन्वितं॥ स्मितवक्त्रं पद्मनेत्रं श्रीवत्सांकितवक्षसं॥ नील
माणिक्यसंकाशं दीपयंतं दिशो दश॥ दृष्ट्वा रामं रमानाथं हर्षविस्फारितेक्षणा॥ गौतमस्य वचः स्म
त्वा ज्ञात्वा नारायणं परं॥ संपूज्य विधिवद्रामं अर्घ्यादिभिरनिंदिता॥ हर्षाश्रुजलनेत्रांता दंडवत्प्र
णिपत्य सा॥ उत्थाय च पुनर्दृष्ट्वा रामं राजीवलोचनं॥ पुलकांकितसर्वांगा गिरा गद्गदयैडत॥ अहल्योवाच॥
अहो कृतार्थास्मि जगन्निवास ते पदाब्जसंलग्नरजःकणादहं॥ स्पृशामि यत्पद्मजशंकरादिभिर्विमृग्य
ते रंधितमानसैः सदा॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभावेन विमोहयज्जगत्॥ चलस्यजस्रं चर
णादिवर्जितः संपूर्ण आनंदमयोतिमायिकः॥ यत्पादपंकजपरागपवित्रगात्रा भागीरथी भवविरिंचिमु
खान्पुनाति॥ साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयं॥ मर्त्यावता रामः
१२॥

म

रे मनुजाकृतिं हरिं रामाभिधेयं रमणीयदेहिनं॥ धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान्भजिष्ये॥ यत्पादपं
कजरजः श्रुतिभिर्विमृग्यं यन्नाभिपंकजभवः कमलासनश्च॥ यन्नामसाररसिको भगवान्पुरारिस्तं रामचंद्रमनिशं हृदि
भावयामि॥ यस्यावतारचरितानि विरिंचिलोके गायंति नारदमुखा भवपद्मजाद्याः॥ आनंदजाश्रुपरिषिक्तकुचाग्रसीमा
वागीश्वरी च तमहं शरणं प्रपद्ये॥ सोयं परात्मा पुरुषः पुराण एषः स्वयंज्योतिरनंत आद्यः॥ मायातनुं लोकविमोहनीयां धत्ते
परानुग्रह एव रामः॥ अयं हि विश्वोद्भवसंयमानामेकः स्वमायागुणबिंबितो यः॥ विरिंचिविष्ण्वीश्वरनामभेदान्धत्ते स्वतंत्रः
परिपूर्ण आत्मा॥ नमोस्तु ते राम तवांघ्रिपंकजं श्रिया धृतं वक्षसि लालितं प्रियात्॥ आक्रांतमेकेन जगत्त्रयं पुरा ध्येयं मुनी
द्रैरभिमानवर्जितैः॥ जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः॥ कार्यकारणकर्तृत्वफलसाधनभेदतः॥ एको विभासि राम त्वं
मायया बहुरूपया॥ त्वन्मायामोहितधियस्त्वां न जानंति तत्त्वतः॥ मानुषं त्वाभिमन्यंते मायिनं परमेश्वरं॥ आकाशवत्त्वं सर्वत्र बहिरंतर्ग
तोमलः॥ असंगो ह्यचलो नित्यः शुद्धो बुद्धः सदाव्ययः॥ योषिन्मूढाहमज्ञा ते तत्त्वं जाने कथं विभो॥ तस्मात्ते शतशो राम नमस्या
म्यनन्यधीः॥ देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा॥ त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे॥ नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्स
ल॥ नमस्तेस्तु हृषीकेश नारायण नमोस्तु ते॥ भवभयहरमेकं भानुकोटिप्रकाशं करधृतशरचापं कालमेघावभासं॥ कनकरुचि
रवस्त्रं रत्नवत्कुंडलाढ्यं कमलविशदनेत्रं सानुजं राममीडे॥ स्तुत्वैवं पुरुषं साक्षाद्राघवं पुरतः स्थितं॥ परिक्रम्य प्रणम्य

रा.
३॥

शुद्धा तामययौ पतिं॥ अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः॥ समुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति॥ पुत्राद्यर्थे पठे
द्भक्त्या रामं हृदि निधाय च॥ संवत्सरेण लभते वंध्यापि सुपुत्रकं॥ सर्वान्कामानवाप्नोति रामचंद्रप्रसादतः॥ ब्रह्मघ्नो गुरु
तल्पगोपि पुरुषः स्तेयी सुरापोपि वा॥ मातृभ्रातृविहिंसकोपि सततं भोगैकबद्धातुरः॥ नित्यं स्तोत्रमिदं जपन्रघुपतिं भक्त्या हृ
दिस्थं स्मरन्ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकां
डे पंचमोऽध्यायः॥ विश्वामित्रोऽथ तं प्राह राघवं सहलक्ष्मणं॥ गच्छामो वत्स मिथिलां जनकेनाभिपालितां॥ दृष्ट्वा क्रतुवरं पश्चा
दयोध्यां गंतुमर्हसि॥ इत्युक्त्वा प्रययौ गंगा त्तीर्यं सहराघवः॥ विदेहस्य पुरं प्राप्त ऋषिवाटं समाविशत्॥ प्राप्तं कौशिकमाकर्ण्य ज
नकोऽतिमुदान्वितः॥ पूजाद्रव्याणि संगृह्य सोपाध्यायः समाययौ॥ दंडवत्प्रणिपत्याथ पूजयामास कौशिकं॥ पप्रच्छ राघवौ दृष्ट्वा
सर्वलक्षणलक्षितौ॥ द्योतयंतौ दिशः सर्वाश्चंद्रसूर्याविवापरौ॥ कस्यैतौ नरशार्दूलौ पुत्रौ देवसुतोपमौ॥ मनः प्रीतिकरौ
मेऽद्य नरनारायणाविव॥ प्रत्युवाच मुनिः प्रीतो हर्षयन्जनकं तदा॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ॥ मखसंरक्ष
णार्थाय मया नीतौ पितुः पुरात्॥ आगच्छन्राघवो मार्गे ताटकां विश्वघातिनीं॥ शरेणैकेन हत्वाऽसौ चोदितो मेऽतिविक्रमः॥ ततो राम.
ममाश्रमं गत्वा मम यज्ञविहिंसकान्॥ सुबाहुप्रमुखान्हत्वा मारीचं सागरेऽक्षिपत्॥ ततो गंगातटे पुण्ये गौतमस्याश्रमे शुभे॥ दृष्ट्वा १३॥

हल्यां तमसृष्टप्रपूजितः॥ पादांबुजरजस्पर्शात्सापि शापाद्विमोचिता॥ इदानीं द्रष्टुकामस्ते गृहे माहेश्वरं धनुः॥ पूजितं राजभिः सर्वै
र्दृष्टमित्यनुशुश्रुम॥ अथो दर्शय राजेंद्र शैवं चापमनुत्तमं॥ दृष्ट्वायोध्यां जिगमिषुः पितरं द्रष्टुमिच्छति॥ इत्युक्तो मुनिना राजा पू
जार्हं इति पूजया पूजयामास धर्मज्ञो विधिदृष्टेन कर्मणा॥ ततः संप्रेषयामास मंत्रिणं बुद्धिसत्तरं॥ शीघ्रमानय विश्वेशचापं रामाय
दर्शय॥ ततो गते मंत्रिवरे राजा कौशिकमब्रवीत्॥ यदि रामो धनुर्धृत्वा कोधाःसारोपयेद्गुणं॥ तदा मम सुता सीता दापते
राघवाय हि॥ तथेति कौशिको प्राह रामं सविस्मयसस्मितं॥ शीघ्रं दर्शय चापाग्र्यं रामायामिततेजसे॥ एवं ब्रुवति मुनौ शेषा
गताश्चापसहकाः॥ चापं गृहीत्वा बलिनः पंचसहस्रसंख्यकाः॥ घंटाशतसमायुक्तं मणिवज्रादिभूषितं॥ दर्शयामास रामाय
मंत्री मंत्रवतां वरः॥ दृष्ट्वा रामः प्रहृष्टात्मा बद्ध्वा परिकरं दृढं॥ गृहीत्वा वामहस्तेन लीलया तोलयन्धनुः॥ आरोपयामास गुणं
पश्यत्स्वखिलराजसु॥ ईषदाकर्षयामास पाणिना दक्षिणेन सः॥ बभंजाखिलहृत्सारो दिशः शब्देन पूरयन्॥ दिशश्च
विदिशश्चैव स्वर्गं मर्त्यं रसातलं॥ तदद्भुतमभूत्तत्र देवानां दिवि पश्यतां॥ आच्छादयंतः कुसुमैर्देवास्तुष्टुवुरीश्वरं॥ देवदुंदुभ
यो नेदुर्ननृतुश्चाप्सरोगणाः॥ द्विधा भग्नं धनुर्दृष्ट्वा राजालिंग्य रघूद्वहं॥ विस्मयं लेभिरे सीतामारात्तत्पुराजिरे॥ सीता स्वर्ण
मयीं मालां गृहीत्वा दक्षिणे करे॥ स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता॥ मुक्ताहारैः कर्णपत्रैः क्वणितनूपुरा॥ दुकूलपरिसंवीता
वस्त्रांतर्व्यंजितस्तनी॥ रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ॥ ततो मुमुदिरे सर्वे राजदाराः स्वलंकृताः॥ गवाक्षजालरंध्रेभ्यो दृ

रा·
४॥

ष्टा लोकविमोहिनी॥ ततोऽब्रवीन्मुनिं राजा पत्रं प्रेषय सत्वरं॥ राजा दशरथः शीघ्रमागच्छतु सपुत्रकः॥ विवाहार्थं कुमाराणां सदा-
रः सह मंत्रिभिः॥ तथेति प्रेषयामास दूतं त्वरितविक्रमान्॥ ते गत्वा राजशार्दूलं रामश्रेयो न्यवेदयन्॥ श्रुत्वा राजा मुदा तेन राजा ह-
र्षेण महता प्लुतः॥ मिथिलागमनार्थाय त्वरयामास मंत्रिणः॥ गच्छंतु मिथिलां सर्वे गजाश्वरथपत्तयः॥ रथमानय मे शीघ्रं गच्छा-
म्यद्यैव मा चिरं॥ वसिष्ठस्त्वग्रतो यातु सदारः सहितोऽग्निभिः॥ राममातॄः समादाय मुनिर्मे भगवान्गुरुः॥ एवं प्रयाप्य सकलं रा-
जर्षिर्विपुलं रथं॥ महत्या सेनया सार्धमारुह्य त्वरितो ययौ॥ आगतं राघवं श्रुत्वा राजा हर्षसमाकुलः॥ प्रत्युज्जगाम जनकः शता-
नंदपुरोधसा॥ यथोक्तपूजया पूज्यं पूजयामास सत्कृतं॥ रामस्तु लक्ष्मणेनासौ ववंदे चरणौ पितुः॥ ततो हृष्टो दशरथो रामं व-
चनमब्रवीत्॥ दिष्ट्या पश्यामि ते भद्र मुखं वपुः प्रांबुतोयसं॥ मुनेस्तु माहात्म्येन संपन्नं मम शोभनं॥ इत्युक्त्वाघ्राय मूर्द्ध-
नमालिंग्य च पुनः पुनः॥ हर्षेण महताविष्टो ब्रह्मानंदं गतो यथा॥ ततो जनकराजेन मंदिरे सन्निवेशितः॥ शो-
भने सर्वभोगाढ्ये सदारः संस्थितः सुखी॥ ततः शुभे दिने लग्ने सुमुहूर्ते रघूत्तमं॥ आनयामास धर्मज्ञः सभ्रातृपितृकं त-
दा रत्नस्तंभसुविस्तारे सुवितानेसुतोरणे॥ मंडपे सर्वशोभाढ्ये मुक्तापुष्पफलान्विते॥ वेदविद्भिः सुसंबाधे ब्राह्मणैः
स्वर्णपीठे रामं न्यवेशयत॥ वसिष्ठं कौशिकं चैव शतानंदः पुरोहितः॥ यथात्र संपूजयित्वा रामस्यो मयथार्घ्ययोः॥ स्था-
पयित्वा स तत्राग्निं ज्वालयित्वा यथाविधि॥ सीतामानाय्य शोभाढ्यां नानारत्नविभूषितां॥ सभार्यो जनकः प्रादात्प्रांगराजीवलोचनं॥ पादौ राम·
१४॥
प्रक्षाल्य

१५
पिवत्तद्योमूर्ध्न्यधारयत॥ या धृता मूर्ध्नि शर्वेण ब्रह्मणा मुनिभिः सदा॥ ततः सीतां करे धृत्वा सहितोदकपूर्वकं॥ रामाय प्रददौ
प्रीत्या पाणिग्रहविधानतः॥ सीता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता॥ दीयते मे सुता तुभ्यं प्रीतो भव रघूत्तमः॥ इति प्रीतेन
मनसा सीतां रामकरेऽर्पयत्॥ मुमोद जनको लक्ष्मीं क्षीराब्धिरिव विष्णवे॥ ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ तदा
तथैव श्रुतकीर्तिं च मांडवीं भ्रातृकन्यके॥ भरताय ददावेकां शत्रुघ्नायापरां ददौ॥ चत्वारो दारसंपन्ना भ्रातरः शुभलक्ष-
णाः॥ विरेजुः प्रजया सर्वे लोकपाला इवापराः॥ ततोऽब्रवीद्वसिष्ठाय विश्वामित्राय मैथिलः॥ जनकः स्वसुतोदंतं नारदेनाभि-
भाषितं॥ यज्ञभूमिविशुद्ध्यर्थं कृष्टतो लांगलेन मे॥ सीता मुखात्समुत्पन्ना कन्यका शुभलक्षणा॥ तामद्राक्षं मया प्रीत्या पुत्रि-
भावभाविता॥ अर्पिता प्रियभार्या शरद्वंद्वसुतानना॥ एकदा नारदो गच्छद्विविक्ते मयि संस्थिते॥ रणयन्महतीं वीणां गाय-
न्नारायणं विभुं॥ पूजितः सुखमासीनो मामुवाच सुखान्वितः॥ शृणुष्व वचनं गुह्यं तवाभ्युदयकारणं॥ परमात्मा हृषीकेशो
भक्तानुग्रहकाम्यया॥ देवकार्यार्थसिद्ध्यर्थं रावणस्य वधाय च॥ जातो राम इति ख्यातो मानुषवेषधृक्॥ आस्ते दाशरथीस-
भूत्वा चतुर्धा परमेश्वरः॥ योगमायापि सीतेति जाता वै तव वेश्मनि॥ अतस्त्वं राघवायैव देहि सीतां प्रयत्नतः॥ नान्येभ्यः पूर्व-
भार्येषा रामस्य परमात्मनः॥ इत्युक्त्वा प्रययौ देवगतिर्देवमुनिस्तदा॥ तदारभ्य मया सीता विष्णोर्लक्ष्मीर्विभाव्यते
॥ कथं मया राघवाय जानकी दीयते शुभा॥ इति चिंतासमाविष्टः कार्यमेकमचिंतयं॥ मत्पितामहगेहे धनुर्न्यासः कृतः॥ पिं

धनुः॥ ईश्वरेण पुरा क्षिप्तं पुरदाहादनंतरं॥ धनुरेतत्पणं कार्यमिति चिंत्य कृतं तथा॥ सीतारिग्न हार्यामानुत्ताशतं॥ त्व
त्प्रसादान्मुनिश्रेष्ठ रामो राजीवलोचनः॥ आगतोत्र धनुर्भग्नं फलितो मे मनोरथः॥ अद्य मे सफलं जन्म राम त्वां सह
सीतया॥ एकासनस्थं पश्यामि भ्राजमानं रविं यथा॥ त्वत्पादांबुजधरो ब्रह्मा सृष्टिचक्रप्रवर्तकः॥ बलिस्त्वत्पादस
लिलं धृत्वाभूद्दिविजाधिपः॥ त्वत्पादपांसुसंस्पर्शाद्दहल्या भर्तृशापतः॥ सद्य एव विनिर्मुक्ता कोन्यस्त्वत्तोधिरक्षिता
॥ यत्पादपंकजपरागसुरागियोगिवृंदैर्जितं भवभयं जितकालचक्रैः॥ यन्नामकीर्तनपराजितदुःखशोका देवास्तमेव शरणं
सततं प्रपद्ये॥ इति स्तुत्वा नृपः प्रादाद्राघवाय महामनाः॥ दासीदासान्कोटिशतं रथानामयुतं तथा॥ अश्वानां नियुतं
प्रादाद्गजानामयुतं तथा॥ पत्तीनां लक्षमेकं च दासीनां त्रिशतं ददौ॥ दिव्यांबराणि हारांश्च मुक्तारत्नमयोज्ज्व
लान्॥ सीतायै जनकः प्रादात्प्रीत्या दुहितृवत्सलः॥ वसिष्ठादीन्सुसंपूज्य भरतं लक्ष्मणं तथा॥ पूजयित्वा यथान्या
यं तथा दशरथं नृपं॥ प्रस्थापयामास नृपो राजानं रघुसत्तमं॥ सीतामामलिंग्य रुदती मातरः साश्रुलोच
नाः॥ श्वश्रूशुश्रूषणपरा नित्यं राममनुव्रता॥ पातिव्रत्यमुपालंब्य तिष्ठ वत्से यथासुखं॥ प्रयाणकाले रघुनंदनस्य राम॰
भेरीमृदंगानकतूर्यखर्वैरपि घोषाः॥ स्वर्गेस्मिन्नेरा घनतूर्यशब्दः संमूर्छितो भूतभयंकरोभूत्॥ ॥ ॥ ॥ १५॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकांडे षष्ठोध्यायः॥ ॥श्रीमहादेव उवाच॥ अथ गच्छ
ति श्रीरामे मैथिलो योजनत्रयं॥ निमित्तान्यतिघोराणि ददर्श नृपसत्तमः॥१॥ नत्वा वसिष्ठं पप्रच्छ किमिदं मुनि
पुंगव॥ निमित्तानि हृदयश्चैते विषमाणि समंततः॥२॥ वसिष्ठस्तमथाप्राह भयमागामि सूच्यते॥ पुनरप्य
भयं ते घ शीघ्रमेव भविष्यति॥३॥ मृगाः प्रदक्षिणं यांति त्वां पश्य शुभसूचकाः॥ इत्येवं वदतस्तस्य ववौ
घोरतरोनिलः॥४॥ मुष्णंश्चक्षूंषि सर्वेषां पांसुवृष्टिभिरर्दयन्॥ ततोदृश्यत भगवान् जामदग्न्यः प्रता
पवान्॥५॥ नीलमेघनिभः प्रांशुर्जटामंडलमंडितः॥ धनुःपरशुपाणिश्च साक्षात्काल इवांतकः॥
६॥ कार्तवीर्यांतको रामो दृप्तक्षत्रियमर्दकः॥ प्राप्तो दशरथस्याग्रे कालमृत्युरिवापरः॥७॥ तं दृष्ट्वा भ
यसंत्रस्तो राजा दशरथस्तदा॥ अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत्॥८॥ दंडवत्प्रणिप
त्याह पुत्रप्राणान्प्रयच्छ मे॥ इति ब्रुवंतं राजानमनादृत्य रघूत्तमं॥९॥ उवाच निष्ठुरं वाक्यं क्रोधात्प्रचा
लितेंद्रियः॥ त्वं राम इति नाम्ना मे चरसि क्षत्रियाधम॥१०॥ द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोसि मे॥
पुराणं जर्जरं चापं भंक्त्वा त्वं कत्थसे मुधा॥११॥ इदं तु वैष्णवं चापमारोपयसि चेद्बलात्॥ तदा युद्धं त्वया सा
र्द्धं करोमि रघुवंशज॥१२॥ नोचेत्सर्वान्हनिष्यामि क्षत्रियांतकरोह्यहं॥ इति ब्रुवति वै तस्मिंश्चचाल वसुधा भृशं

अ०रा०
५२॥

साधैंतश्रिया [illegible] ॥ [illegible] ॥ एवं स्तुती [illegible] २

श्री॥ अथ रामो वनं भूत्वा धनुर्वै नामपिच्छन्त्यसं॥ रामो दाशरथिर्वीरो वीक्ष्य तं भार्गवं रुषा॥ धनुराछिद्य तद्धस्ताद्रामो गुणमन्त
तदा॥ तूणीराद्बाणमादाय संधायाकृष्य वीर्यवान्॥ संस्मरन्पूर्ववृत्तांतं इदं वचनमब्रवीत्॥ राम राम महाबाहो जाने त्वां
[illegible]॥ पुराणपुरुषं विष्णुं जगत्सर्ग [illegible] ॥ बाल्येऽहं तपसा विष्णुमाराधयितु
मंजसा॥ चक्रतीर्थं शुभं गत्वा तपसा विष्णुमन्वहं॥ अतोषयं महात्मानं नारायणमनन्यधी॥ ततः प्रसन्नो देवेशः प्र
शंखचक्रगदाधरः॥ उवाच मां रघुश्रेष्ठ प्रसन्नमुखपंकजः॥ श्रीभगवानुवाच॥ उत्तिष्ठ तपसो ब्रह्मन्फलितं ते तपो
महत्॥ मच्चिदंशेन युक्तस्त्वं जहि हैहयपुंगवं॥ त्रेतामुखे दाशरथिर्भूत्वा रामोऽहमव्ययः॥ उत्पत्स्ये परया शक्त्या
तदा द्रक्ष्यसि मां पुनः॥ मत्तेजः पुनरादास्ये त्वयि दत्तं मया पुरा॥ तदा तपश्चरंल्लोके तिष्ठ त्वं ब्रह्मणो दिनं॥ इत्यु
क्त्वांतर्दधे देवस्तथा सर्वं कृतं मया॥ स एव विष्णुस्त्वं राम जातोऽसि ब्रह्मणार्थितः॥ मयि स्थितं तु त्वत्तेजस्त्व
यैव पुनराहृतं॥ अद्य मे सफलं जन्म प्रतीतोऽसि मम प्रभो॥ ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः परतो मतः॥ त्वयि
जन्मादिषड्भावा न संत्यज्ञानसंभवाः॥ निर्विकारोऽसि पूर्णस्त्वं गमनादिविवर्जितः॥ यथा जले फेनजालं धूमो व
ह्नौ तथा त्वयि॥ त्वदाधारा त्वद्विषया माया कार्यं सृजत्यहो॥ यावन्मायावृता लोकास्तावत्त्वां न विजानते॥ अवि
चारितसिद्धैषा विद्याविद्याविरोधिनी॥ अविद्याकृतदेहादिसंघाते प्रतिबिंबिता॥ चिच्छक्तिर्जीवलोकेऽस्मिन् जीव

रजा१

इत्यभिधीयते॥ यावद्देहमनःप्राणबुद्ध्यादिष्वभिमानवान्॥ तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत्॥ आत्मनः संसृतिर्ना ति१
स्ति बुद्धेर्ज्ञानं न जात्विति॥ अविवेकात्तद्द्वयं युक्त्वा संसारीति प्रवर्त्तते॥ जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितेस्तथा॥ जडसंगा
ज्जडत्वं हि जलाग्न्योर्मेलनं यथा॥ यावत्त्वत्पादभक्तानां संगसौख्यं न विंदति॥ तावत्संसारदुःखौघान्न निवर्तेन्नरः सदा॥ सत्सं
गलब्धया भक्त्या यदा त्वां समुपासते॥ तदा माया शनैर्याति तानवं प्रतिपद्यते॥ ततस्त्वज्ज्ञानसंपन्नः सद्गुरुस्तस्य लभ्यते॥ वाक्य स४
शौ५ ज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते॥ तस्मात्त्वद्भक्तिहीनानां कल्पकोटिशतैरपि॥ न मुक्तिशंका विज्ञानशंका नैव सुखं तथा॥ अ को६
तृ६ तस्त्वत्पादयुगले भक्तिर्मे जन्मजन्मनि॥ स्यात्त्वद्भक्तिमतां संगोऽविद्या याभ्यां विनश्यति॥ लोके त्वद्भक्तिनिरता स्त्वद्धर्मामृतव
र्षिणः॥ पुनंति लोकमखिलं किं पुनः स्वकुलोद्भवान्॥ नमोऽस्तु जगतां नाथ नमस्ते भक्तिभावन॥ नमः कारुणिकानंत रामचंद्र
नमोऽस्तु ते॥ देव यद्यत्कृतं पुण्यं मया लोकजिगीषया॥ तत्सर्वं तव बाणाय भूयाद्राम नमोऽस्तु ते॥ ततः प्रसन्नो भगवान् श्री
रामः करुणामयः॥ प्रसन्नोऽस्मि तव ब्रह्मन्यत्ते मनसि वर्तते॥ दास्ये तदखिलं [illegible] मा कुरुष्वात्र संशयं॥ ततः प्रीतेन मन
सा भार्गवो राममब्रवीत्॥ यदि मेऽनुग्रहो राम तवास्ति मधुसूदन॥ त्वद्भक्तसंगस्त्वत्पादे दृढा भक्तिः सदास्तु मे॥ स्तोत्रमेतत्प
ठेद्यस्तु भक्तिहीनोऽपि सर्वदा॥ त्वद्भक्तिस्तस्य विज्ञानं भूयादंते स्मृतिस्तव॥ तथेति राघवोक्तः स परिक्रम्य प्रणम्य तं॥

त्मरा
७॥

प्रजितस्तत्र तुष्टा तो महेंद्राचलसत्तमात॥ राजा दशरथो हृष्टो रामं सत्तमिवागतं॥ आलिंग्यालिंग्य हर्षेण उत्स्पालमुत्सृ-
जन्॥ ततः प्रीतेन मनसा स्वस्थचित्तः पुरं ययौ॥ रामलक्ष्मणशत्रुघ्नभरता देवसंमिताः॥ स्वां स्वां भार्यामुपादाय रे-
मिरे स्वस्वमंदिरे॥ मातापितृभ्यां संहृष्टो रामः सीतासमन्वितः॥ रेमे वैकुंठभवने श्रिया सह यथा हरिः॥ युधाजिन्नाम
म कैकेयीभ्राता भरतमातुलः॥ भरतं नेतुमागच्छत्स्वराज्यं प्रीतिसंयुतः॥ प्रेषयामास भरतं राजा स्नेहसमन्वितः॥ श-
त्रुघ्नं चापि संपूज्य युधाजित्तु मरिंदमः॥ कौशल्या शुशुभे देवी रामेण सह सीतया॥ देवमातेव पौलोम्या शच्या
क सा शोभना॥ साकेते लोकनाथः प्रथितगुणगणो लोकसंगीतकीर्तिः॥ श्रीरामः सीतयास्तेखिलसुरनिक-
रानंदसंदोहमूर्तिः॥ नित्यश्रीर्निर्विकारो निरवधिविभवो नित्यमायानिरासो मायाकार्यानुपरणी मनुज इव स-
दा भाति देवोऽखिलेशः॥ इति श्री ब्रह्मांडपुराणे उत्तरखंडे अध्यात्मरामायणे बालकांडे सप्तमो-
ध्यायः॥७॥ प्रथ्याम्न॥× एकदा सुखमासीनं रामं स्वांतःपुराजिरे॥ सर्वाभरणसंपन्नं रत्नसिंहा ×बालकांडे सर्गाः॥
नस्तैव शंभुर्वेनोदिष्टा॥७ एषु तद्विंशत श्लोका मोक्षप्रदानत्णे॥ श्रीमहादेव उवाच॥× राम
१७॥

सनै स्थितं॥ नीलोत्पलदलश्यामं कौस्तुभामुक्तकंधरं॥ सीतया रत्नदंडेन चामरेणाथ वीजितं॥ विनोदयंतं तां बूलचर्वणादि-
भिरादरात्॥ नारदोऽवतरत्द्रष्टुं अंबरात् राघवं॥ शुद्धस्फटिकसंकाशः शरच्चंद्र इवामलः॥ अतर्कितयायातो नारदो
दिव्यदर्शनः॥ तं दृष्ट्वा सहसोत्थाय रामः प्रीत्या कृतांजलिः॥ ननाम शिरसा भूमौ सीतया सह भक्तिमान्॥ उवाच नारदं रामः प्रीत्या
परमयायुतः॥ संसारिणां मुनिश्रेष्ठ दुर्लभं तव दर्शनं॥ अस्माकं विषयासक्तचेतसां नितरां मुने॥ अथवा मे पूर्वजन्मकृतपुण्यमहोदये॥
संसारिणोऽपि हि मुने लभ्यते सत्समागमः॥ अतस्त्वद्दर्शनादेव कृतार्थोस्मि मुनीश्वर॥ किंकार्यं ते मया कार्यं ब्रूहि तत्करवाणि भो॥ अथ
तं नारदोऽप्याह राघवं भक्तवत्सलं॥ किं मोहयसि मां राम वाक्यैर्लोकानुसारिभिः॥ संसार्यहमिति प्रोक्तं सत्यमेतत्त्वया विभो॥ जगता-
मादिभूता या सा माया गृहिणी तव॥ त्वत्सन्निकर्षाज्जायंते तस्यां ब्रह्मादयः प्रजाः॥ त्वदाश्रया सदा भाति माया या त्रिगुणात्मिका॥ सूतेऽजस्रं
शुक्लकृष्णलोहिताः सर्वदा प्रजाः॥ लोकत्रयमहागेहे गृहस्थस्त्वमुदाहृतः॥ त्वं विष्णुर्जानकी लक्ष्मीः शिवस्त्वं जानकी शिवा॥ ब्रह्मा त्वं
जानकी वाणी सूर्यस्त्वं जानकी प्रभा॥ भवान् शशांकः सीता तु रोहिणी शुभलक्षणा॥ शक्रस्त्वमेव पौलोमी सीता स्वाहानलो भवान्॥ यमस्त्वं
कालरूपश्च सीता संयमिनी प्रभो॥ निर्ऋतिस्त्वं जगन्नाथ तामसी जानकी शुभा॥ रामस्त्वमेव वरुणो भार्गवी जानकी शुभा॥ वायु-
स्त्वं राम सीता तु सदागतिरितीरिता॥ कुबेरस्त्वं राम सीता सर्वसंपत्प्रकीर्तिता॥ रुद्राणी जानकी प्रोक्ता रुद्रस्त्वं लोकनाशकृत्॥ लोके स्त्रीवाच्य

अ.रा.
१८॥

कथ्यते तत्सर्वं जानकी शुभा॥ पुंनामा भावकं यावत्तत्सर्वं हि राघव॥ तस्माल्लोकत्रये देव युवाभ्यां नास्ति किंचन॥ त्वदाभासोदिता
ऽज्ञानमव्याकृतमितीर्यते॥ तस्मान्महांस्ततः सूत्रं लिंगं सर्वात्मकं ततः॥ अहंकारश्च बुद्धिश्च पंचप्राणेंद्रियाणि च॥ लिंगमु
च्यते प्राज्ञैर्जन्ममृत्युसुखादिमत्॥ स एव संज्ञश्च लोके भाति जगन्मयः॥ अवाच्यानाद्यविद्यैव कारणोपाधिरुच्यते॥ स्थूलं सूक्ष्मं का
रणाख्यमुपाधित्रितयं चितेः॥ एतैर्विशिष्टो जीवः स्याद्वियुक्तः परमेश्वरः॥ जाग्रत्स्वप्नसुषुप्त्याख्या संसृतिर्या प्रवर्त्तते॥ तस्या वि
लक्षणः साक्षी चिन्मात्रस्त्वं रघूत्तम॥ त्वत्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितं॥ त्वय्येव लीयते कृत्स्नं तस्मात्त्वं सर्वकारणं॥
रज्जावहिमिवात्मानं जीवो ज्ञात्वा भयं वहेत्॥ परात्माहमिति ज्ञात्वा भयदुःखैर्विमुच्यते॥ चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बु
द्धयः॥ त्वया यस्मात्प्रकाश्यंते सर्वस्यात्मा ततो भवान्॥ अज्ञानान्न्यस्यते सर्वं त्वयि रज्जौ भुजंगवत्॥ त्वज्ज्ञानाल्लीयते सर्वं तस्मा
ज्ज्ञानं सदाभ्यसेत्॥ त्वत्पादभक्तियुक्तानां विज्ञानं भवति क्रमात्॥ तस्मात्त्वद्भक्तियुक्ता ये मुक्तिभाजस्त एव हि॥ अहं त्वद्भक्तभ
क्तानां तद्भक्तानां च किंकरः॥ अतो मामनुगृह्णीष्व मोहयस्व न मां प्रभो॥ त्वन्नाभिकमलोत्पन्नो ब्रह्मा मे जनकः प्रभो॥ अतस्तवा
हं पौत्रोऽस्मि भक्तं मां पाहि राघव॥ इत्युक्त्वा बहुशो नत्वा स्वानंदाश्रुपरिप्लुतः॥ उवाच वचनं रामं ब्रह्मणा नोदितोस्म्यहं॥ रावणस्य वध रामः
र्थाय जातोसि रघुसत्तम॥ इदानीं राज्यरक्षार्थं पिता त्वामभिषेक्ष्यति॥ यदि राज्याभिसंसक्तो रावणं न हनिष्यसि॥ प्रतिज्ञा तव याम १८॥

भूभारहरणाय वै॥ तत्सर्वं कुरु राजेंद्र सत्यसंधस्त्वमेव हि॥ श्रुत्वैतदुदितं रामो मुनिना प्राह सस्मितं॥ शृणु नारद मे किंचिद्विद्यतेऽविदि
तं क्वचित्॥ प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः॥ किंतु कालानुरोधेन तत्तत्प्रारब्धसंक्षयात्॥ हरिष्ये सर्वभूभारं क्रमेणासु
रमंडलं॥ रावणस्य विनाशार्थं श्वो गंता दंडकाननं॥ चतुर्दश समास्तत्र ह्युषित्वा मुनिवेषधृक्॥ सीतामिषेण तं दुष्टं सकुलं ना
शयाम्यहं॥ एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह॥ प्रदक्षिणत्रयं कृत्वा दंडवत्प्रणिपत्य तं॥ अनुज्ञातश्च रामेण ययौ देवगतिं मु
निः॥ संवादं पठति शृणोति संस्मरेद्वा यो नित्यं मुनिवररामयोः स भक्त्या संप्राप्नोत्यमरसुदुर्लभं विमोक्षं कैवल्यं विरतिपु
रःसरं क्रमेण॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे प्रथमोऽध्यायः॥ सूत उवाच॥ अथ राजा दशरथः
कदाचिद्रहसि स्थितः॥ वसिष्ठं स्वकुलाचार्यमाहूयेदमभाषत॥ [illegible] वान् राममखिलाः प्रशंसंति मुहुर्मुहुः॥ पौराश्च निगमा
वृद्धा मंत्रिणश्च विशेषतः॥ ततः सर्वगुणोपेतं रामं राजीवलोचनं॥ ज्येष्ठं राज्येऽभिषेक्ष्यामि वृद्धोहं मुनिपुंगव॥ भरतो मातुलं
द्रष्टुं गतः शत्रुघ्नसंयुतः॥ [illegible] स्तत्रानुमोदतां॥ संभाराः संभ्रियंतां च गच्छ मंत्राय राघवं॥ उच्छ्राप्यंतां पताका
श्च नानावर्णाः समंततः॥ तोरणानि विचित्राणि स्वर्णमुक्तामयानि वै॥ आहूय मंत्रिणं राजा सुमंत्रं मंत्रिसत्तमं॥ आज्ञापयति यद्य
द्वो मुनिस्तत्तत्समानय॥ यौवराज्येऽभिषेक्ष्यामि श्वोभूते रघुनंदनं॥ तथेति हर्षात्स मुनिं किं करोमीत्यभाषत॥ तमुवाच महातेजा
वसिष्ठो ज्ञानिनां वरः॥ श्वः प्रभाते मध्यकक्ष्ये कन्यकाः स्वर्णभूषिताः॥ तिष्ठंतु षोडश गजाः स्वर्णरत्नादिभूषिताः॥ चतुर्दं

अ॰रा॰
९०॥

तःसमायातुरैरावतकुलोद्भवः॥ नानातीर्थोदकैः पूर्णाः स्वर्णकुंभाः सहस्रशः॥ स्थाप्यतांतत्र वैयाघ्रचर्माणि त्रीणि चा
नय॥ श्वेतच्छत्रं रत्नदंडं मुक्तामणिविराजितं॥ दिव्यमाल्यानि वस्त्राणि दिव्यान्याभरणानि च॥ मुनयः सत्कृतास्तत्र
तिष्ठंतु कुशपाणयः॥ नर्तक्यो वारमुख्याश्च गायका वैणिकास्तथा॥ नानावादित्रकुशला वादयंतु नृपांगणे॥ हस्त्यश्व
रथपादाता बहिस्तिष्ठंतु सायुधाः॥ नगरे यानि तिष्ठंति देवतायतनानि च॥ तेषु प्रवर्त्ततां पूजा नानाबलिभिरादृताः
राजानश्च प्रमायांतु नानोपायनपाणयः॥ इत्यादिश्य मुनिश्रीमान्सुमंत्रं नृपमंत्रिणं॥ स्वयं जगाम भवनं राघवस्या
तिभास्वरं॥ रथमारुह्य भगवान्वसिष्ठो मुनिसत्तमः॥ त्रीणि कक्षाण्यतिक्रम्य रथात्क्षितिमवातरत्॥ अंतः प्रविश्य
भवनं स्वाचार्यत्वादवारितः॥ गुरुमागतमाज्ञाय रामस्तूर्णं कृतांजलिः॥ प्रत्युद्गम्य नमस्कृत्य दंडवद्भक्तिसंयुतः॥
स्वर्णपात्रेण पानीयमानिन्याशु जानकी॥ रत्नासने समावेश्य पादौ प्रक्षाल्य भक्तितः॥ तदापः शिरसा धृत्वा सीत
या सह राघवः॥ धन्योऽस्मीत्यब्रवीद्रामस्तव पादांबुधारणात्॥ श्रीरामेणैवमुक्तस्तु प्रहसन्मुनिरब्रवीत्॥ त्वत्पादसलि
लं धृत्वा धन्योऽभूद्गिरिजापतिः॥ ब्रह्मापि मत्पिता ते हि पादतीर्थहताशुभः॥ इदानीं भाषसे यत्त्वं लोकानामुपदे
शकृत्॥ जानामि त्वां परात्मानं लक्ष्म्या संजातमीश्वरं॥ देवकार्यार्थसिध्यर्थं भक्तानां भुक्तिसिद्धये॥ रावणस्य वधार्थाय जा

रा॰
९२८॥

तं जानामि राघव॥ तथापि देवकार्यार्थं गुह्यं नोद्घाटयाम्यहं॥ यथा त्वं मायया सर्वं करोषि रघुनंदन॥ तथैवानुविधास्येऽहं
शिष्यस्त्वं गुरुरित्यहं॥ गुरुर्गुरूणां त्वं देव पितॄणां त्वं पितामह॥ अंतर्यामी जगद्यात्रावाहकस्त्वमगोचरः॥ शुद्धसत्त्वमयं दे
हं त्वा स्वाधीनसंभव॥ मनुष्य इव लोकेऽस्मिन्भासि त्वं योगमायया॥ पौरोहित्यमहं जाने विगर्ह्यं दुष्यजीवनं॥ इक्ष्वा
कूणां कुले रामः परमात्मा जनिष्यते॥ इति ज्ञातं मया पूर्वं ब्रह्मणा कथितं पुरा॥ ततोऽहमाशया राम तव संबंधकांक्षया॥ अकार्षं
गर्हितमपि तवाचार्यत्वसिद्धये॥ ततो मनोरथो मेऽद्य फलितो रघुनंदन॥ त्वदधीना महामाया सर्वलोकैकमो
हिनी॥ मां यथा मोहयेन्नैव तथा कुरु रघूद्वह॥ गुरुनिष्कृतिकामस्त्वं यदि तर्हि तदेव मे॥ प्रसंगात्सर्वमप्युक्तं न
वाच्यं कुत्रचिन्मया॥ राज्ञा दशरथेनाहं प्रेषितोऽस्मि रघूद्वह॥ त्वामामंत्रयितुं राज्ये श्वोऽभिषेक्ष्यति राघवः॥
अद्य त्वं सीतया सार्धमुपवासं यथाविधि॥ कृत्वा शुचिर्भूमिशायी भव राम जितेंद्रियः॥ गच्छामि राजसांनिध्यं त्वं तु प्रा
तर्गमिष्यसि॥ इत्युक्त्वा रथमारुह्य ययौ राजगुरुर्द्रुतं॥ रामोऽपि लक्ष्मणं दृष्ट्वा प्रहसन्निदमब्रवीत्॥ सौमित्रे यौवरा
ज्ये मेऽभिषेको भविष्यति॥ निमित्तमात्रमेवाहं कर्त्ता नो त्वमेव हि॥ मम हि बहिः प्राणो नात्र कार्या विचारणा॥ ततो वसि
ष्ठेन यथा भाषितं तत्तथाकरोत्॥ वसिष्ठोऽपि नृपं गत्वा तत्र सर्वं न्यवेदयत्॥ वसिष्ठस्य पुरो राज्ञा ह्युक्तं रामाभिषेचनं॥

यदा तदैव नगरे श्रुत्वा कश्चित्पुमान्ययौ॥ कौशल्यायै राममात्रे सुमित्रायै तथैव च॥ श्रुत्वा
ते हर्षसंपूर्णा ददतुर्हारमुत्तमं॥ तस्मै ततः प्रीतमनाः कौशल्या पुत्रवत्सला॥ लक्ष्मीं पर्यचरत्
देवरामस्यार्थप्रसिद्धये॥ सत्यवादी दशरथः करोत्येव प्रतिश्रुतं॥ कैकेयीवशगः किंतु कामुकः किं करि
ष्यति॥ इति व्याकुलिता माता दुर्गां देवीमपूजयत्॥ एतस्मिन्नंतरे देवा देवीं वाणीमचोदयन्॥ गच्छ देवि भुवो
लोकमयोध्यायां प्रयत्नतः॥ रामाभिषेकविघ्नार्थं यतस्व ब्रह्मवाक्यतः॥ मंथरां प्रविश त्वादौ कैकेयीं
च ततः परं॥ ततो विघ्ने समुत्पन्ने पुनरेहि दिवं शुभे॥ तथेत्युक्त्वा तथा चक्रे प्रविवेशाथ मंथरां॥ सा
पि कुब्जा त्रिवक्रा तु प्रासादाग्रमथारुहत्॥ नगरं परितो दृष्ट्वा सर्वतः समलंकृतं॥ नानातोरणसंबाधं
पताकाभिरलंकृतं॥ सर्वोत्सवसमायुक्तं विस्मिता पुनरागमत्॥ धात्रीं पप्रच्छ मातः किं नगरं समलंकृतं॥ ना
नोत्सवसमायुक्ता कौशल्या च हि हर्षिता॥ ददाति विप्रमुख्येभ्यो वस्त्राणि विविधानि च॥ तामुवा
च तदा धात्री रामचंद्राभिषेचनं॥ श्वो भविष्यति तेनायं सर्वं सालंकृतं पुरं॥ तच्छ्रुत्वा त्वरितागत्य कैके रामः
२०॥

यीं वाक्यमब्रवीत्॥ पर्यंकस्थां विशालाक्षीमेकांते पर्यवस्थितां॥ किं शेषे दुर्भगे मूढे महद्भयमुपस्थितं॥ न जानी
षेतिसौंदर्यमानिनी मत्तगामिनी॥ रामस्य राज्ञोनुग्रहात्॥ श्वोभिषेको भविष्यति तच्छ्रुत्वा सहसोत्थाय कैकेयी प्रि
या। दि वादिनी॥ तस्यै दिव्यं ददौ स्वर्णनूपुरं रत्नभूषितं॥ हर्षस्थाने किमिति मे कथ्यते भयमागतं॥ भरतादधिको रामः प्रि
यकृन्मे प्रियंवदः॥ कौशल्यां मानसंपश्यन्सदा शुश्रूषते हि मां॥ रामाद्भयं किमापन्नं तव मूढे वदस्व मे॥ तच्छ्रुत्वा विष
सादाथ कुब्जाऽकारणवैरिणी॥ शृणु मद्वचनं देवि यथार्थं ते महद्भयं॥ त्वां तोषयन्सदा राजा प्रियवाक्यानि भाषते॥ का
मुकोऽतथ्यवादी च त्वां वाचा परितोषयन्॥ कार्यं करोति तस्या वै राममातुः सुपुष्कलं॥ मनस्येतन्निधायैव प्रेषयामास ते
सुतं॥ भरतं मातुलकुले प्रेषयामास सानुजं॥ सुमित्रायाः समीचीनं भविष्यति न संशयः॥ लक्ष्मणो राममन्वेति राज्यं सो
नु भविष्यति॥ भरतो राघवस्याग्रे किंकरो वा भविष्यति॥ विवास्यते वा नगरात्प्राणैर्वा हार्यते चिरात्॥ त्वं तु दासीव
कौशल्यां नित्यं परिचरिष्यसि॥ ततो विमरणं श्रेयो यत्सापत्न्यैः पराभवात्॥ अतः शीघ्रं यतस्वाद्य भरतस्याभिषेच
ने॥ रामस्य वनवासार्थं वर्षाणि नव पंच च॥ ततो रूढो भवेत्पुत्रस्तव राज्ञि भविष्यति॥ उपायं ते प्रवक्ष्यामि पूर्वमे
व विनिश्चितं॥ पुरा देवासुरे युद्धे राजा दशरथः स्वयं॥ इंद्रेण याचितो धन्वी सहायार्थं महारथः॥ जगाम सेनया सा
र्धं त्वया सह शुभानने॥ युद्धं प्रकुर्वतस्तस्य राक्षसैः सह धन्विनः॥ तदाक्षकीलो न्यपतच्छिन्नस्तस्य न वेद सः॥ त्वं तु हस्तं

प्राणपरि

समावेश्य कीलकं त्रेऽतिधैर्यतः॥ स्थितवत्यसि यां गीपति॥ ततो हत्वाऽसुरान्सर्वान्ददर्श त्वामरिंदमः।
आश्चर्यपरमं लेभे त्वामालिंग्य मुदान्वितः॥ वृणीष्व यन्मनसि वांछितं वरद्वयं स्यहं॥ वरद्वयं वृणीष्व त्वमेवं राज्ञि
वदत्यपि॥ त्वयोक्तं वरदो राजन्नपदिष्टं वरद्वयं॥ त्वय्येव तिष्ठतु चिरं न्यासभूतं ममानघ॥ यदा मेव सरो भूया
४८ त्तदा देहि वरद्वयं॥ तथेत्युक्त्वा ययौ राजा मंदिरं तव सुव्रते॥ त्वत्तः पवश्रुतं पूर्वमिदानीं स्मृतिमागतं॥ अतः शीघ्रं
प्रविश्य च क्रोधागारं रुषान्विता॥ विमुच्य सर्वाभरणं सर्वतो विनिकीर्य च॥ भूमावेव शयाना त्वं तूष्णीमातिष्ठ भा
मिनि॥ यावत्सत्यं प्रतिज्ञाय राजाभीष्टं करोति ते॥ श्रुत्वा त्रिवक्रयोक्तं तत्तदा कैकेयनंदिनी॥ तथ्यमेवाखिलं
मेने दुःसंगाहतविभ्रमा॥ तमाह कैकेयी हृष्टा कुतस्ते बुद्धिरीदृशी॥ एवं त्वा बुद्धिसंपन्नां न जाने वक्रसुंदरि॥
भरतो यदि राजा मे भविष्यति सुतः प्रियः॥ ग्रामान् शतं प्रदास्यामि मम त्वं प्राणवल्लभा॥ इत्युक्त्वा कोपभ
वनं प्रविश्य सहसा रुषा॥ विमुच्य सर्वाभरणं परिकीर्य समंततः॥ भूमौ शयाना मलिना मलिनांबरधा
रिणी॥ प्राह वाप्यशृणु मे कुब्जे यावद्रामो वनं व्रजेत्॥ प्राणांस्त्यक्ष्येऽथवा चक्रे शयिष्ये तावदेव हि॥ निश्चयं
कुरु कल्याणि कल्याणं ते भविष्यति॥ इत्युक्त्वा प्रययौ कुब्जा गृहं सापि तथाकरोत्॥ धीरोपि तदयाचि रामः २१॥

को १

सुपृष्ट भवेरण तोपि सगुणो वा राज्ञि विद्वान्वाप्यथवा नीतिज्ञो विधिं वादवे प्रीत्यपरो विधाविवेको यथा॥ दृष्टं नामतिपापश्याविव सुप्रियासं
गंस्तवेकृतो ग्रहुष्यापरिनाविनो बुद्धिनिस्साम्यकृते ते स्फुटं॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्व
रसंवादे अयोध्याकांडे द्वितीयोऽध्यायः॥ सूत उवाच॥ ततो राजा दशरथो रामाभ्युदयकारणात्॥ समादिश्य
मंत्रिवृंदतः सानंदो गृहमाविशत्॥ तत्रादृष्ट्वा प्रियां राजा किमेतदिति विह्वलः॥ यापुरा मंदिरं तस्याः प्रविष्टे मयि शोभ
ना॥ हसंती मामुपायाति सा किं नैवात्र दृश्यते॥ इत्यात्मन्येव संचिंत्य मनसाति विदूयता॥ पप्रच्छ दासीः कुत्र वः
स्वामिनी शुभा॥ नायाति मां यथापूर्वं मत्प्रिया प्रियदर्शना॥ ता ऊचुः क्रोधभवनं प्रविष्टा नैव विद्महे॥ कारणं तत्र
देवत्वं गत्वा निश्चेतुमर्हसि॥ इत्युक्तो भयसंत्रस्तो राजा तस्याः समीपगः॥ उपविश्य शनैर्देहं विस्पृशन्पाणि
ना ब्रवीत्॥ किं शेषे वसुधापृष्ठे पर्यंकादीन्विहाय च॥ मां त्वं खेदयसे भीरु यतो मां नावभाषसे॥ अलं
लंकारं परित्यज्य भूमौ मलिनवाससा॥ किमर्थं ब्रूहि सकलं विधास्ये तव वांछितं॥ को वा तवाहितं कर्ता ना
री वा पुरुषोपि वा॥ स मे दंड्यश्च वध्यश्च भविष्यति न संशयः॥ ब्रूहि देवि यथा प्रीतिस्तदवश्यं ममाग्रतः
तदिदानीं साधयिष्ये सुदुर्लभमपीक्षणात्॥ जानासि त्वं मम स्वांतं प्रिये मां त्वद्वशे स्थितं॥ तथापि मां खेद
यसे वृथा तव परिश्रमः॥ ब्रूहि कं धनिनं कुर्यां दरिद्रं ते प्रियंकरं॥ धनिनं क्षणमात्रेण निर्धनं तव चाहि
तं॥ ब्रूहि केनाथ वधिष्यामि वधार्हं वा विमोचये॥ किं बहुक्तेन प्राणान्दास्यामि ते प्रिये मत्प्राणात्प्रियतरा

रामः सत्यपराक्रमः॥ तस्योपरि शपे ब्रूहि त्वद्धितं तत्करोम्यहं॥ इति ब्रुवाणं राजानं शपंतं राघवोपरि॥ शनैर्विमृज्य
नेत्रे सा राजानं प्रतिभाषत॥ यदि सत्यप्रतिज्ञोऽसि शपथं कुरुषे यदि॥ याच्यामे सफलौ वर्त्तौ शीघ्रमेव — महर्षिता॥ पू
र्वं देवासुरे युद्धे मया त्वं परिरक्षितः॥ तदा वरद्वयं दत्तं त्वया मे तुष्टचेतसा॥ तद्द्वयं न्यासभूतं मे स्थापितं त्वयि सुव्रत॥ तत्रै
केन वरेण सुतरत्नं मे प्रियं सुतं॥ एभिः संभृतसंभारैर्यौवराज्येऽभिषेचय॥ अपरेण वरेणाशु रामो गच्छतु दंडकान्
॥ मुनिवेषधरः श्रीमान् जटावल्कलभूषणः॥ चतुर्दशसमास्तत्र कंदमूलफलाशनः॥ पुनरायातु तस्यांते वने
वा तिष्ठतु स्वयं॥ प्रभाते गच्छतु वनं रामो राजीवलोचनः॥ यदि किंचिद्विलंबेन प्राणं त्यक्ष्ये तवाग्रतः॥ भवस
त्यप्रतिज्ञस्त्वमेवं चेन्मम प्रियं॥ श्रुत्वैतद्दारुणं वाक्यं कैकेय्या रोमहर्षणं॥ निपपात महीपालो वज्राहत इव द्रुमः॥ श
नैरुन्मील्य नयने विक्लवपरयास्तिया॥ दुःस्वप्नो वा मया दृष्टो भ्रमो वा चित्तविभ्रमः॥ इत्यालोच्य पुनः पत्नीं व्या
घ्रीमिव पुरः स्थितां॥ किमिदं भाषसे भद्रे मम प्राणहरं वचः॥ रामः किमपराधं ते कृतवान्कमलेक्षणः॥ मम
ग्रे राघवगुणान्वर्णयस्यनिशं शुभान्॥ कौशल्यां मा समां पश्यन् शुश्रूषां कुरुते सदा॥ इति ब्रुवंती त्वं पूर्वं
मिदानीं भाषसे कथं॥ राज्यं गृहाण पुत्राय रामस्तिष्ठतु मंदिरे॥ अनुगृह्णीष्व मां रामे रामं नास्ति भयं तव॥
इत्युक्त्वाश्रुपरीताक्षः पादयोर्निपपात ह॥ कैकेयी त्वब्रवीदं सा परिक्रांतलोचना॥ उवाच किं त्वं भ्रांतोऽसि राजं
स्त्वं मा भाषसे वृथा॥ मिथ्या करोषि चेद्राजन् भाषितं नरकं व्रजेत्॥ वनं न गच्छेद्यदि रामचंद्रः प्रभातकालेऽजिनची

रयुक्तः। उद्बंधनं वा विषभक्षणं वा कृत्वा मरिष्ये पुरतस्तवाहं॥ सत्यप्रतिज्ञोहमिति हि लोके विडंबसे सर्वसभांतरेषु॥
रामोपरि त्वं शपथं च कृत्वा मिथ्याप्रतिज्ञो नरकं प्रयाहि॥ इत्युक्तः प्रियया दीनो मग्नो दुःखार्णवे नृपः॥ मूर्च्छि
तः पतितो भूमौ विसंज्ञो मृतको यथा॥ एवं रात्रिर्गता तस्य दुःखात्संवत्सरोपमा॥ अरुणोदयकाले तु बं
दिनो गायका जगुः॥ निवारयित्वा तान्सर्वान्कैकेयी रोषमास्थिता॥ ततः प्रभातसमये मध्यकक्षामु
पस्थिताः॥ ब्राह्मणाः क्षत्रिया वैश्या ऋषयः कन्यकास्तथा॥ छत्रं च चामरं दिव्यं गजो वाजी तथैव च॥ अन्ये च वा
रमुख्याश्च पौरजानपदास्तथा॥ वसिष्ठेन यथाज्ञप्तं तत्सर्वं तत्र संस्थितं॥ स्त्रियो बालाश्च वृद्धाश्च रात्रौ निद्रां न लेभि
रे॥ कदा द्रक्ष्यामहे रामं पीतकौशेयवाससं॥ सर्वाभरणसंपन्नं किरीटकटकोज्ज्वलं॥ कौस्तुभाभरणं श्यामं कंद
र्पशतसुंदरं॥ अभिषिक्तं समायांतं गजारूढं स्मिताननं॥ श्वेतच्छत्रंधरं तत्र लक्ष्मणं लक्षणान्वितं॥ रामं कदा
न वेक्ष्याम॥ इत्युत्सुकधियः सर्वे बभूवुः रसिनः॥ नेदानीमुत्थितो राजा किमर्थं चेत्यचिंतयन्॥ सुमंत्रः शनकैः प्रा
याद्यत्र राजावतिष्ठते॥ वर्द्धयन् जयशब्देन प्रणमन् शिरसा नृपं॥ अतिखिन्नं नृपं दृष्ट्वा कैकेयीं समपृच्छत॥ देवि
कैकेयि वर्द्धस्व किं राजा दृश्यतेऽन्यथा॥ तमाह कैकेयी राजा रात्रौ निद्रां न लब्धवान्॥ राम रामेति रामेति रामं वानुचिं
तयन्॥ प्रजागरस्ततो राजा ह्यस्वस्थ इव लक्ष्यते॥ राममानय शीघ्रं त्वं राजा द्रष्टुमिहेच्छति॥ सुमंत्र उवाच॥ अश्रु
त्वा राजवचनं कथं गच्छामि भामिनि॥ तच्छ्रुत्वा मंत्रिणो वाक्यं राजा मंत्रिणमब्रवीत्॥ सुमंत्र रामं द्रक्ष्यामि शीघ्र

मानयसुंदरं॥ इत्युक्तः त्वरितं गत्वा सुमंत्रो राममंदिरे॥ अवारितः प्रविष्टोयं त्वरितं राममब्रवीत्॥ शीघ्रमागच्छ भद्रं ते राम
राजीवलोचन॥ पितुर्गृहं मया सार्द्धं राजा त्वां द्रष्टुमिच्छति॥ इत्युक्तो रथमारुह्य संभ्रमात्त्वरितं ययौ॥ रामः सारथि
ना सार्द्धं लक्ष्मणेन समन्वितः॥ मध्यकक्षे वसिष्ठादीन् पश्यन्नेव त्वरान्वितः॥ पितुः समीपं संगम्य ननाम चरणौ पि
तुः॥ राममालिंगितुं राजा समुत्थाय ससंभ्रमः॥ बाहु प्रसार्य रामेति दुःखान्मध्ये पपात ह॥ हाहेति रामस्तं शीघ्रमालिं
ग्यांके न्यवेशयत्॥ राजानं मूर्छितं दृष्ट्वा चुक्रुशुः सर्वयोषितः॥ किमेतद्रोदनमिति वसिष्ठोपि समाविशत्॥ रामः प वि५
प्रच्छ किमिदं राज्ञो दुःखस्य कारणं॥ एवं पृच्छति रामे सा कैकेयी राममब्रवीत्॥ त्वमेव कारणं ह्यत्र राज्ञो दुःखोपशांत
ये॥ किंचित्कार्यं त्वया राम कर्त्तव्यं नृपतेर्हितं॥ कुरु सत्यप्रतिज्ञस्त्वं राजानं सत्यवादिनं॥ राज्ञा वरद्वयं दत्तं मम
संतुष्टचेतसा॥ त्वदधीनं तु तत्सर्वं वक्तुं त्वां लज्जते नृपः॥ सत्यपाशेन संबद्धं पितरं त्रातुमर्हसि॥ पुत्रशब्देन चै
तदिनरकात्त्रायते पिता॥ रामस्तयोदितं श्रुत्वा शूलेनातिहतो यथा॥ व्यथितः कैकयीं प्राह किं मामेवं प्रभाषसे
॥ पित्रर्थे जीवितं दास्ये पिबेयं विषमुल्बणं॥ सीतां त्यक्ष्येथ कौशल्यां राज्यं चापि त्यजाम्यहं॥ अनाज्ञप्तोपि कुरुते
पितुः कार्यं स उत्तमः॥ उक्तः करोति यः पुत्रः स मध्यम उदाहृतः॥ उक्तोपि कुरुते नैव स पुत्रो मल उच्यते॥ अतः क
रोमि तत्सर्वं यन्मामाह पिता मम॥ सत्यं सत्यं करोम्येव रामो द्विर्नाभिभाषते॥ इति रामप्रतिज्ञां सा श्रुत्वा वक्तुं प्रच
क्रमे॥ राम त्वदभिषेकार्थं संभाराः संभृताश्च ये॥ तैरेव भरतोयं मेभिषेच्यः प्रियो मम॥ अपरेण श्रुचीरस
णवरे१

जटाधरः॥ वनं प्रयाहि शीघ्रं त्वमद्यैव पितुराज्ञया॥ चतुर्दश समास्तत्र वसन्मुन्यन्नभोजनः॥ एतदेव पितुस्तेद्य का
र्यं त्वं कर्तुमर्हसि॥ राजा तु लज्जते वक्तुं त्वामेवं रघुनंदन॥ श्रीराम उवाच॥ भरतस्यैव राज्यं स्याद्यदहं गच्छामि दं
डकान्॥ किंतु राजा न मां किंचिद्भाषते नात्र कारणं॥ श्रुत्वैतद्रामवचनं दृष्ट्वा पुरः स्थितं॥ आह राजा दशरथो दुःखि
तो दुःखितं वचः॥ स्त्रीजितं भ्रांतहृदयं उन्मार्गपरिवर्त्तिनं॥ निगृह्य मां गृहाणेदं राज्यं पापं न तद्भवेत्॥ एवं चे
दनृतं नैव मां स्पृशेद्रघुनंदन॥ इत्युक्त्वा दुःखसंतप्तो विलपन्पतत्तदा॥ हा राम हा जगन्नाथ हा मम प्राणवल्ल
भ॥ मां विसृज्य कथं घोरं विपिनं गंतुमिच्छसि॥ इति रामं समालिंग्य मुक्तकंठो रुरोद ह॥ विसृज्य नयने रामः
पितुः सजलपाणिना॥ आश्वासयामास नृपं शनैः विनयकोविदः॥ किमत्र दुःखेन तात राज्यं शासतु मे नुजः॥ अहं
प्रतिज्ञां निस्तीर्य पुनर्यास्यामि ते पुरं॥ राज्यात्कोटिगुणं सौख्यं मम राजन्वने सतः॥ त्वत्सत्यपालनं दे
वकार्यं चापि भविष्यति॥ कैकेय्याश्च प्रिया राजन्वनवासो महान्गुणः॥ इदानीं गंतुमिच्छामि व्येतु ते मान
सज्वरः॥ संभाराश्चोपह्रियंतां तानि कार्थमागताः॥ मातरं च समाश्वास्य अनुनीय च जानकीं॥ आगत्य पादौ वंदि
ष्ये ततो यास्ये सुखं वनं॥ इत्युक्त्वा तु परिक्रम्य मातरं द्रष्टुमाययौ॥ कौशल्यापि हरेः पूजां कुरुते रामकारणात्॥
होमं च कारयामास ब्राह्मणेभ्योददद्धनं॥ ध्यायती विष्णुमेकाग्रमनसा मौनमास्थिता॥ अंतस्थेन घनचित्स्व

॥२८
:४५॥

कामं निरस्तसर्वाशयसत्स्वरूपं॥ विष्णुं त्वदानंदमयं हृदब्जे सा भावयंती न ददर्श रामं॥ ॥इति श्रीमदध्यात्मरा
मायणे उमामहेश्वरसंवादे अयोध्याकांडे तृतीयोध्यायः॥ महादेव उवाच॥ श्रीसीतारामाभ्यां नमः॥ ॥
ततः सुमित्रा दृष्ट्वैवं रामं राज्ञीं समाकुलां॥ कौशल्यां बोधयामास सहसा सोपसमुपस्थितः॥ पुनरेव राममना सेषाव
हिर्हिष्टा प्रवाहिता॥ रामं दृष्ट्वा विशालाक्षी आलिंग्यांके न्यवेशयत्॥ मूर्ध्न्यवघ्राय पस्पर्श गात्रं नीलोत्पलच्छवि॥ भुंक्ष्व पुत्रे
ति च प्राह मिष्टमन्नं क्षुधोदितः॥ रामः प्राह न मे मातः भोजनावसरः कुतः॥ दंडकागमने शीघ्रं मम कालोद्य निश्चि
तः॥ कैकेयीवरदानेन सत्यसंध्यः पिता मम॥ भरताय ददौ राज्यं ममाप्यारण्यमुत्तमं॥ चतुर्दश समास्तत्र सु
निभिः सह॥ आगमिष्ये पुनः शीघ्रं न चिंतां कर्तुमर्हसि॥ तच्छ्रुत्वा सहसोद्विग्ना मूर्छिता पुनरुत्थिता॥ आह रामं सुदुःखा
र्त्ता दुःखसागरसंप्लुता॥ यदि राम वनं सत्यं यासि चेन्नय मामपि॥ त्वद्विहीना क्षणार्धं वा जीवितं धारये कथं॥ यथा गौर्बाल
कं वत्सं त्यक्त्वा तिष्ठेन्न कुत्रचित्॥ तथैव त्वां न शक्नोमि त्यक्तुं प्राणप्रियं सुतं॥ भरताय प्रसन्नश्चेद्राज्यं राजा प्रयच्छतु॥ किं
मर्थं वनवासाय त्वामाज्ञापयति प्रियं॥ कैकेय्या वरदो राजा सर्वस्वं वा प्रयच्छतु॥ त्वया किमपराद्धं हि कैकेय्या वा नृप
स्य वा॥ पिता गुरुर्यथा राम तवाहमधिका ततः॥ पित्राज्ञप्तो वनं गंतुं वारयेयमहं ततः॥ यदि गच्छसि मद्वाक्यमुल्लंघ्य नृ
पवाक्यतः॥ तदा प्राणान्परित्यज्य गच्छामि यमसादनं॥ लक्ष्मणोपि ततः श्रुत्वा कौशल्यावचनं तथा॥ उवाच राघवं क्रुद्धो दहन्नि
ज व यं त्रयं॥ उन्मत्तं भ्रांतमनसं कैकेय्या वशवर्तिनं॥ बध्वा निहन्मि भरतं तद्बंधून्मातुलानपि॥ अद्य पश्यंतु मे शौर्यं लोकान्प्रद
हतः पुरा॥ राम त्वमभिषेकाय कुरु यत्नमरिंदम॥ धनुष्पाणिरहं तत्र निहन्म्यां विघ्नकारिणः॥ इति ब्रुवंतं सौमित्रिमालिंग्य
रघुनंदनः॥ शूरोसि रघुशार्दूल ममात्यंतहिते रतः॥ जानामि सर्वं ते सत्यं किंतु ते [illegible] नेहि यदिदं दृश्यते विश्वं राज्यं देहादिकं च यत्॥

म१

॥२८
·२५·

यदि सत्यं तदैतत्र आयासः सफलश्च ते॥ भोगा मेघवितानस्थविद्युल्लेखेव चंचलाः॥ आयुरप्यग्निसंतप्तलोहस्थजल
बिंदुवत्॥ यथा व्यालगलस्थोपि भेको दंशानपेक्षते॥ तथा कालाहिना ग्रस्तो लोको भोगानशाश्वतान्॥ क
रोति दुःखेन हि कर्मतंत्रं शरीरभोगार्थमहर्निशं नरः॥ देहस्तु भिन्नः पुरुषात्समीक्ष्यते को वात्र भोगः पुरुषेण
भुज्यते॥ पितृमातृसुहृद्भ्रातृदारबंध्वादिसंगमः॥ प्रपायामिव जंतूनां नद्यां काष्ठौघवच्चलः॥ छायेव लक्ष्मी
श्चपला प्रतीता तारुण्यमंबूर्मिवदध्रुवं च॥ स्वप्नोपमं स्त्रीसुखमायुरल्पं तथापि जंतोरभिमान एषः॥ संसृ
तिः स्वप्नसदृशी सदा रोगादिसंकुला॥ गंधर्वनगरप्रख्या मूढस्तामनुवर्त्तते॥ आयुष्यं क्षीयते॥ यस्मादादित्य
गतागतैः॥ दृष्ट्वान्येषां जरामृत्युं कथंचिन्नैव बुध्यते॥ स एव दिवसः सैव रात्रिरित्येव मूढधीः॥ भोगाननु
पतत्येव कालवेगं न पश्यति॥ प्रतिक्षणं क्षरतेदायुरामघटांबुवत्॥ संपन्ना इव रोगौघाः शरीरं प्रहरंत्यहो॥
जरा व्याघ्रीव पुरतः तर्जयंत्यवतिष्ठते॥ मृत्युः सहैव यात्येष समयं संप्रतीक्षते॥ देहेहंभावमापन्नो राजा
हं लोकविश्रुतः॥ इत्यस्मिन्मनुते जंतुः कृमिविड्भस्मसंज्ञिते॥ त्वगस्थिमांसविण्मूत्ररेतोरक्तादिसंयुते॥ वि
कारिपरिणामी च॥ देह आत्मा कथं वद॥ यमास्थाय भवांल्लोकं दग्धुमिच्छसि लक्ष्मण॥ देहाभिमानिनः स
र्वे दोषाः प्रादुर्भवंति हि॥ देहोहमिति या बुद्धिरविद्या सा प्रकीर्तिता॥ नेयं बुद्धिरविद्या सा प्रकीर्तिता॥ नाहं दे
हश्चिदात्मेति बुद्धिर्विद्येति भण्यते॥ अविद्या संसृतेर्हेतुर्विद्या तस्या निवर्तिका॥ तस्माद्यत्नः सदा कार्यो॥ विद्याभ्यासे

मुमुक्षुभिः कामक्रोधादयस्तत्र शत्रवः शत्रुसूदन ॥ तत्रापि क्रोध एवालं मोक्षविघ्नाय सर्वदा ॥ येनाविष्टः पुमान्हंति पि
तृभ्रातृसुहृत्सखीन् ॥ क्रोधमूलो मनस्तापः क्रोधः संसारबंधनं ॥ धर्मक्षयकरः क्रोधः तस्मात्क्रोधं परित्यज ॥ क्रो
ध एव महान् शत्रुस्तृष्णा वैतरणी नदी ॥ संतोषो नंदनवनं शांतिरेव हि कामधुक् ॥ तस्माच्छांतिं भजस्वाद्य शत्रुरेव
न वै भवेत् ॥ देहेंद्रियमनःप्राणबुध्यादिभ्यो विलक्षणः ॥ आत्मा शुद्धः स्वयंज्योतिरविकारी निराकृतिः ॥ यावद्देहेंद्रि
यप्राणैर्भिन्नत्वं नात्मनो विदुः ॥ तावत्संसारदुःखौघैः पीड्यंते मृत्युसंयुताः ॥ तस्मात्त्वं सर्वदा भिन्नमात्मानं हृदि भा
वय ॥ बुध्यादिभ्यो बहिः सर्वमनुवर्तस्व मा खिदः ॥ भुंजन्प्रारब्धमखिलं सुखं वा दुःखमेव वा ॥ प्रवाहपतितं कांते
कार्यं कुर्वन्नपि न लिप्यसे ॥ बाह्ये सर्वत्र कर्तृत्वमावहन्नपि राघव ॥ अंतः शुद्धः स्वभावस्त्वं लिप्यसे न च कर्मभिः ॥ ए
तत्सर्वं मयोदितं हृदि भावय सर्वदा ॥ संसारदुःखैरखिलैर्बाध्यसे न कदाचन ॥ त्वमप्येवं मया दिष्टं हृदि भावय नित्य
दा ॥ समागमं प्रतीक्षस्व न दुःखैः पीड्यसे चिरं ॥ न सदैकत्र संवासः कर्मभिर्जंतुवर्तितं ॥ यथा प्रवाहपतितप्लवा
नां सरितां तथा ॥ चतुर्दश समाः संख्या क्षणार्धमिव जायते ॥ अनुमन्यस्व मातस्त्वं दुःखं त्यज दूरतः ॥ एवं चेत्सुखसंवासो
भविष्यति वने मम ॥ इत्युक्त्वा दंडवन्मातुः पादयोरपतच्चिरं ॥ उत्थाप्यांके समावेश्य आशीर्भिरभिनंदयत् ॥ सर्वे दे
वाः ब्रह्मविष्णुशिवादयः ॥ रक्षंतु त्वां सदा यांतं तिष्ठंतं निद्रया युतं ॥ इति प्रस्थापयामास समालिंग्य पुनः पुनः ॥ लक्ष्म
णोऽपि तदा रामं नत्वा हर्षाश्रुगद्गदः ॥ आरामगमनात्तस्याः सुमित्रायै यथाहृतः ॥ अस्यातिष्ठत्ततो रामसेवाकांक्षी तवारिहं ॥

अनुहीश्व मां राम तो चेत्त्वां गच्छाम्यहं ॥ तथेति राघवोऽप्याह लक्ष्मणं त्वमिहाचिरं ॥ तत्र सीतां समाधातुं ॥ गतः सीतापतिर्गृहं ॥
आगतं पतिमालोक्य सीता सुस्मितभाषिणी ॥ स्वर्णपात्रे सलिलाद्यैर्न्सात्य भक्तितः ॥ पप्रच्छ पतिमासीनं देव किं से
नया वृता ॥ आगतोऽसि गजः कुत्र श्वेतच्छत्रं च काकुतः ॥ वादित्राणि न वाद्यंते किरीटादिविवर्जितः ॥ सामंतराजसहितसे
ना मां नागतोऽसि किं ॥ इति स्म सीतया पृष्टो रामः सस्मितमब्रवीत् ॥ राज्ञा मे दंडकारण्ये राज्यं दत्तं शुभेऽखिलं ॥ अतस्तत्पाल
नार्थाय शीघ्रं यास्यामि भामिनि ॥ अद्यैव यास्यामि वनं त्वं तु श्वश्रूसमीपगा ॥ शुश्रूषां कुरु मे मातुः ॥ न मिथ्यावादिनो वयं ॥
इति ब्रुवंतं श्रीरामं सीता भीता ब्रवीदिदं ॥ किमर्थं वनराज्यं ते पित्रा दत्तं महात्मना ॥ तमाह रामः कैकेय्यै राजा प्रीतो वरं ददौ भरता
य राज्यं वनवासं ममानघे ॥ चतुर्दश समास्तत्र वासो नियमवान्वितः ॥ तया देव्या ददौ राजा स[illegible]त्यवादी
दयापरः ॥ अतस्त्वाद्य गमिष्यामि [illegible] ॥ श्रुत्वा तद्रामवचनं [illegible] ॥ अहमग्रे गमिष्या
मि वनं पश्चात्त्वमेष्यसि ॥ इत्याह मां विना गंतुं तव राघव नोचितं ॥ तामाह राघवः प्रीतः स्वप्रियां प्रियवादिनीं ॥ कथं
वेत्तं त्वां नेष्येऽहं वनं व्यालमृगाकुलं ॥ राक्षसा घोररूपाश्च संति मानुषभोजिनः ॥ सिंहव्याघ्रवराहाश्च संचरंति स
मंततः ॥ कट्वम्लफलमूलानि भोजनार्थं सुमध्यमे ॥ अपूपान्नं व्यंजनानि विद्यंते न कदाचन ॥ काले काले फ
लं वापि विद्यते कुत्र सुंदरि ॥ मार्गो न दृश्यते क्वापि शर्कराकंटकान्वितः ॥ गुहागह्वरसंबाधं झिल्लिदंशादिनियुतं ॥

एवं बहुविधं दोषं वनं दंडकसंज्ञितं ।। पादचारेण गंतव्यं शीतवातातपादिषु ।। राक्षसादीं चते दृष्ट्वा जीवितं हास्यसे चिरात् ।। तस्मा
द्गृहे तिष्ठ शीघ्रं द्रक्ष्यसि मां पुनः ।। रामस्य वचनं श्रुत्वा सीता दुःखसमन्विता ।। प्रत्युवाच स्फुरद्वक्त्रा किंचित्कोपसमन्वि
ता ।। कथं मामिच्छसे त्यक्तुं धर्मपत्नीं पतिव्रतां ।। त्वदनुव्रतामदोषां मां धर्मज्ञोसि दयापरः ।। त्वत्समीपे स्थितां राम को वा मां धर्षये
द्वने ।। फलमूलादिकं यद्यत्तव त्यक्तावशेषितं ।। तदेवामृततुल्यं मे तेन तुष्टा चराम्यहं ।। त्वया सह चरंत्या मे कुशाः काशाश्च
कंटकाः ।। पुष्पास्तरणतुल्यास्ते भविष्यंति न संशयः ।। अहं त्वां क्लेशये नैव तत्र वेयं कार्यसाधिनी ।। बाल्येपि मां वीक्ष्य दैवक
श्चिज्ज्योतिःशास्त्रविशारदः ।। प्राह ते विपिने वासः पत्या सह भविष्यति ।। सत्यवादी द्विजो भूयाद्गमिष्यामि त्वया
सह ।। अन्यत्किंचित्प्रवक्ष्यामि श्रुत्वा मां नय कानने ।। रामायणानि बहुशः श्रुतानि बहुभिर्द्विजैः ।। सीतां विना वनं रामो गतः
किं कुत्रचिद्वद ।। अतस्त्वया गमिष्यामि सर्वथा त्वत्सहायिनी ।। यदि गच्छसि मां त्यक्त्वा प्राणांस्त्यक्ष्यामि तेग्रतः ।। इति तन्निश्चयं
ज्ञात्वा सीताया रघुनंदनः ।। अब्रवीद्देवि गच्छ त्वं वनं शीघ्रं मया सह ।। अरुंधत्यै प्रयच्छाशु आभरणानि च ।। ब्राह्मणेभ्यो
धनं सर्वं दत्त्वा गच्छामहे वनं ।। इत्युक्त्वा लक्ष्मणेनाशु द्विजानाहूय भक्तितः ।। ददौ गवां वृंदशतं धनानि वस्त्राणि दिव्यानि वि
भूषणानि ।। कुटुंबवद्भ्यः श्रुतशीलवद्भ्यो मुदा द्विजेभ्यो रघुवंशकेतुः ।। अंतःपुरे ददौ सीता मातुः स्वान्याभरणानि च ।। रामो मा
तुः सेवकेभ्यो ददौ धनमनेकधा ।। स्वकांतःपुरवासिभ्यः सेवकेभ्यस्तथैव च ।। पौरजानपदेभ्यश्च ब्राह्मणेभ्यः सहस्रशः ।।

लक्ष्मणोपि सुमित्रां तु कौशल्यायै समर्प्य च ।। धनुःसमागत्य रामस्याग्रे व्यवस्थितः ।। रामः सीता लक्ष्मणश्च जग्मुः सर्वे नृपा
लयं ।। श्रीरामः सह सीतया नृपपथे गच्छन्शनैः सानुजः पौरान् जानपदान् कुतूहलदृशः सानंदमुद्वीक्षयन् श्यामः कामसहस्र
सुंदरवपुः कांत्या दिशो भासयन् ।। पादन्यासपवित्रिताखिलजगत्प्यायालयं संस्थितः ।। ।। इति श्रीमदध्यात्मरामायणे उ
मामहेश्वरसंवादे अयोध्याकांडे चतुर्थः सर्गः ।। ४ ।। श्रीमहादेव उवाच ।। यायांतं नागरा दृष्ट्वा मार्गे रामं सजानकीं ।। सलक्ष्मणं समवीक्ष्य
ऊचुः सर्वे जनास्तत्र ।। १ ।। कैकेय्या वरदानादि श्रुत्वा दुःखसमावृताः ।। वतः राजा दशरथः सत्यसंधः प्रियं शुभं ।। २ ।। स्त्रीहेतोस्त्यजते कामी सत्य
त्वं वा कुतः ।। कैकेयी वा कथं दुष्टा रामं सत्यप्रियंकरं ।। ३ ।। वि[illegible]वासयामास कथं क्रूरकर्मातिमूढधीः ।। दे जनात्र वसत्वा गच्छामो देव
काननं ।। यत्र रामः सभार्यश्च सानुजो गंतुमिच्छति ।। पश्यंतु जानकीं सर्वे पादचारेण गच्छतीं ।। पुंसि कदापि दृष्टा जा
नकी लोकसुंदरी ।। सापि पादेन गच्छंति जनसंघेष्टनावृता ।। रामोपि पादचारेण गजाश्वादिविवर्जितः ।। गच्छति द्रक्ष्य
ति नुं सर्वलोकैकसंमतं ।। राक्षसी कैकयी नाम्ना जाता सर्वविनाशिनी ।। रामस्यापि सवेदुःखं सीतायाः पादयानतः
।। बलवान्विधिरेवात्र पुरुषयत्नो हि दुर्बलः ।। इति दुःखाकुलेष्वद्धा साधूनां मुनिपुंगवः ।। [illegible]ब्रवीद्वामदेवो यसाधू
नां संघमध्यगः ।। मानुषा बाधरामं वा सीतां वा चिंतितुं ततः ।। वामदेव उवाच ।। एष रामः परो विष्णुरादिनारायणः
स्मृतः ।। एषा सा जानकी लक्ष्मीर्योगमायेति विश्रुता ।। असौ शेषस्तदंशोपि लक्ष्मणाख्यः प्रसांप्रतं ।। एष मायागुणैर्यु
क्तस्तदा तत्कार्यवानिव ।। एष एव रजोयुक्तो ब्रह्मभूद्विश्वभावनः ।। सत्वाविष्टस्तथा विष्णुस्त्रिजगत्परिपालकः ।। एष रुद्रस्त

मत्स्यं तेजगत्प्रलयकारणे॥ एषमत्स्यः पुरा भूत्वा भक्तं वैवस्वतं मनुं॥ नाव्यारोप्य लयस्यांते पालयामास राघवेंद्र॥ समुद्र
मथने पूर्वं मंदरे सुतलं गते॥ अधारयत्स्वपृष्ठेद्रिं कूर्मरूपी रघूत्तमः॥ महीं रसातलं याते प्रलये सूकरो भवत्॥ तोलयां
मास दंष्ट्राग्रे तां क्षोणीं रघुनंदनः॥ नारसिंहं वपुर्धृत्वा प्रह्लादवरदः पुरा॥ त्रिलोकीकंटकं रक्षः पारयामास तं नखैः॥
पुत्रराज्यं हृतं दृष्ट्वा ह्यदित्या याचितः पुरा वामनत्वमुपागम्य याचया चाहरत्पुनः॥ दुष्टक्षत्रियभूभारनिवृत्त्यै भार्गवोऽभ
वत्॥ स एव जगतां नाथ इदानीं रामतां गतः॥ रावणादीनि रक्षांसि कोटिशो निहनिष्यति॥ मानुषेण वधस्तस्य दृ
रात्मनः॥ राज्ञा दशरथेनापि तपसाराधितो हरिः॥ पुत्रत्वाकांक्षया विष्णुस्तदा पुत्रोऽभवद्धरिः॥ स एव विष्णुः श्रीरामो रा
वणादिवधाय हि॥ जातो राघववरामो लक्ष्मणेन सहाबान्॥ एषा सीता हरेर्माया सृष्टिस्थित्यंतकारिणी॥ राजा वा कै
केयी वापि नात्र कारणमण्वपि॥ पूर्वेद्युर्नारदः प्राह भूभारहरणाय च॥ रामोऽप्याह स्वयं साक्षात् श्वो गमिष्यामि दंडकान्
॥ अतो रामं समुद्दिश्य चिंतां त्यज्य बालिशाः॥ राम रामेति ये नित्यं जपंति मनुजा भुवि॥ तेषां मृत्युभयादीनि
न भवंति कदाचन॥ किं पुनस्तस्य रामस्य दुःखशंका महात्मनः॥ रामनाम्नैव मुक्तिः स्यात्कलौ नान्यत्र कुत्रचित्
॥ मायामानुषरूपेण विडंबयति लोकवृत्॥ भक्तानां भजनार्थाय रावणस्य वधाय च॥ राज्ञश्चाभीष्टसिध्यर्थं मा

नुषं रूपमाश्रितः॥ इत्युक्त्वा विररामाथ वामदेवो महामुनिः॥ श्रुत्वापि द्विजाः सर्वे रामं ज्ञात्वा हरिं विभुं॥ जहुर्हृत्संश
यं ग्रंथिं राममेवान्वचिंतयन्॥ य इदं चिंतयेन्नित्यं रहस्यं रामसीतयोः॥ तस्य रामे दृढा भक्तिर्भवेद्द्विजानपूर्विका॥
रहस्यं गोपनीयं वो यूयं वै राघवप्रियाः॥ इत्युक्त्वा प्रययौ विप्रास्तेपि रामं परं विदुः॥ ततो रामः प्रिया निश्चयणितेगेह
मवारितः॥ राघवजः सीतया गत्वा कैकेयीमिदमब्रवीत्॥ श्रीरघूनंदन उवाच॥ प्राप्ता स्मो वयं मातस्त्रयस्ते स
मतेवन॥ गंतुं कृतधियः शीघ्रमाज्ञापयतु नः पिता॥ इत्युक्त्वा सहसोत्थाय कैकेयी वाक्यमब्रवीत्॥ कैकेयी उवाच
॥ राम वस्त्राणि संत्यज्य वीराणि परिगृह्यतां॥ रामश्च लक्ष्मणश्चाथ सीता चैव पृथक् पृथक्॥ रामस्तु वस्त्रा
ण्युत्सृज्य वन्यचीराणि पर्यधात्॥ लक्ष्मणोपि तथा चक्रे सीता तन्न विजानती हस्ते गृहीत्वा रामस्य लज्जया पार्श्वे
पश्यंती स्थिता॥ रामो गृहीत्वा तच्चीरमंशुकोपरि वेष्टयत्॥ तं दृष्ट्वा रुरुदुः सर्वे राजदाराः समंततः॥ वसिष्ठस्तु तदा के
यीं रुदितमुत्संयन्दरूपा॥ वसिष्ठ उवाच॥ कैकेयी दुर्वृत्ते रामेणैव त्वया दत्तः॥ वनवासाय दुष्टे त्वं सीतायै किं
प्रदास्यसि॥ यदि रामसमं न्वेति सीता भक्त्या पतिव्रता॥ दिव्याबरधरा नित्यं सर्वाभरणभूषिता॥ सर्गि घत्वा निषं
रामं वनदुःखनिवारिणी॥ इत्युक्त्वा विररामाथ वसिष्ठो वदतां वरः॥ दशरथ उवाच॥ हे सुमंत्र सुमंत्रत्रत्य
मानय सुव्रत॥ रथमारुह्य गच्छंतु वनं वनचरप्रियाः॥ इत्युक्त्वा राममालोक्य सीतां चैव सलक्ष्मणं॥ दुःखान्निप
तितो भूमौ रुरोदाश्रुपरिप्लुतः॥ आरुरोह रथं सीता शीघ्रं रामस्य पश्यतः॥ रामः प्रदक्षिणं कृत्वा पितरं मातरं तथा॥ लक्ष्म

णः खड्गाख्गजधनुस्तूणीयुतस्तथा॥ गृहीत्वा रथमारुह्य चोदयामास सारथिं॥ तिष्ठ तिष्ठ सुमंत्रेति राजा दशरथो
ब्रवीत्॥ गच्छ गच्छेति रामेण चोदितो चोदयद्रथं॥ रामे दूरं गते राजा मूर्छितः पतितो भुवि॥ पौरास्तु बालवृद्धाश्च वृद्धा
ब्राह्मणाः सतमाः॥ तिष्ठ तिष्ठेति रामेति क्रोशंतो राममन्वयुः॥ राजा रुदित्वा सुचिरं मां नयंतु गृहं प्रति॥ कौशल्याया रा
ममातुरित्याह परिचारकान्॥ कृच्छ्रेण कालं मे वत्तत्र जीवनं दुःखितस्य मे॥ इत ऊर्ध्वं न जीवामि चिरं राम विनातद्
तः॥ ततो गृहं प्रविश्यैव कौशल्यायाः पपात ह॥ सुमूर्छितश्च चिरं बुध्वा तूष्णीमेवावतस्थिवान्॥ रामस्तु तमसातीरं
गत्वा तत्रावसत्सुखी॥ जलं प्राश्य ततो निराहारो वृक्षमूले स्वपत्प्रभुः॥ प्रातर्यासहधर्मात्मा धनुःपाणिः सलक्ष्मणः
॥ पालयामास धर्मज्ञः सुमित्रेण समन्वितः॥ पौराः सर्वे समागत्य स्थिताः सर्वे विदूरतः॥ शक्ता राम पुरं नेतुं
नो चेद्गच्छामहे वयं॥ इति निश्चयमागाय तेषां रामो विविस्मितः॥ नाहं गच्छामि नगरं मे ते शक्ता मागिनः॥ भविष्य
तीति निश्चित्य सुमंत्रमिदमब्रवीत्॥ इदानीमेव गच्छामि सुमंत्र रथमानय॥ इत्यत्र तत्र सुमंत्रोपि रथं वाहैरयो
जयत्॥ आरुह्य राम सीता च लक्ष्मणोपि ययुर्द्रुतं॥ अयोध्याभिमुखं गत्वा किंचिद्दूरं पुनर्ययुः॥ तेपि राममप
दृष्ट्वैव प्रातरुत्थाय दुःखिता॥ रथनेमिगतं मार्गं पश्यंतस्ते पुरं ययुः॥ हृदि रामं ससीतं ते ध्यायंतस्तस्थुरन्वहं॥
सुमित्रोपि रथं शीघ्रं चोदयामास सादरं॥ स्फीताञ्जनपदान्पश्यन्रामः सीतासमन्वितः॥ गंगातीरं समागच्छ राम. २८॥
न्॥ शृंगवेराविदूरतः॥ गंगां दृष्ट्वा नमस्कृत्य स्नात्वा सानंदमानसः॥ शिंशुपावृक्षमूले सन्निसाद रघूत्तमः॥

ततो गुहो जनैः श्रुत्वा रामागमनमहोत्सवं सखायं स्वामिनं द्रष्टुं हर्षात्तूर्णं समायतत्॥ फलानि मधुपुष्पादि गृहीत्वा भ
क्तिसंयुतः॥ रामस्याग्रे विनिक्षिप्य दंडवत्पतितो भुवि॥ गुहमुत्थाप्य तं तूर्णं राघवः परिषस्वजे॥ स पृष्ट्वा कुशलं रामं
गुहोंजलिरब्रवीत्॥ धन्योहं मम धर्मे जन्म नैषादलोकपावनं॥ तव परमानंद स्पृष्ट्वा ते गं रघूत्तम॥ नैषाद
राज्यमेतत्ते किंकरस्य रघूत्तम॥ त्वदधीनं वसन्तत्र पालयास्मान्रघूद्वह॥ आगच्छ यामो नगरं पावनं कुरु मे गृहं॥ गृ
हाण फलमूलानि त्वदर्थं संचितानि मे॥ अनुगृह्णीष्व भगवन्दासस्तेहं रघूत्तम॥ रामस्तमाह सुप्रीतो वचनं शृ
णु मे सखे॥ न वेक्ष्यामि गृहं ग्रामं वर्षाणि नवपंच च॥ दत्तमन्येन नो भुंजे फलमूलादि किंचन॥ राज्यं ममैव
व तत्ते सर्वं सखा मे त्वं वल्लभः॥ वटक्षीरं समानाय्य जटामुकुटमादरात्॥ बबंध लक्ष्मणेनाथ सहितो रघुन
दनः॥ जलमात्रं तु संप्राश्य सीतया सह राघवः॥ आस्तीर्णं कुशपर्णाद्यैः शयनं लक्ष्मणेन हि उवास तत्र नग
रे प्रासादाये यथा पुरा॥ सुष्वाप तत्र वैदेह्या पर्यंक इव संस्कृते॥ ततो विदूरे परिगृह्य चापं सबाणतूणीरध
रः सलक्ष्मणः॥ ररक्ष रामं परितो विपश्यन्गुहेन सार्धं सशरासनेन॥ ॥इति श्रीमदध्यात्मरामाय
णे उमामहेश्वरसंवादे अयोध्याकांडे पंचमः सर्गः॥ ॥श्रीमहादेव उवाच॥ सुप्तं रामं समालो
क्य गुहः सास्रुपरिप्लुतः॥ लक्ष्मणं प्राह विनयाद्भ्रातः पश्यसि राघवं॥१॥ शयानं कुशपत्रौघसंस्तरे

सीतया सह॥ यस्य स्वर्णपर्यंके स्वास्तीर्णे तवनोत्तमो कैकेयी रामदुःखस्य कारणं विधिना कृता॥ मंदरा बुद्धिमास्थाय
कैकेयी पापमाचरत्॥ तच्छ्रुत्वा लक्ष्मणः प्राह सखे शृणु वचो मम॥ कः कस्य हेतुर्दुःखस्य कस्य हेतुः सुखस्य वा॥ स्वपूर्वा
र्जितकर्मैव कारणं सुखदुःखयोः॥ सुखस्य दुःखस्य न कोपि दाता परो ददातीति कुबुद्धिरेषा॥ अहं करोमीति वृ
था भिमानः॥ स्वकर्मसूत्रग्रथितो हि लोकः सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबांधवाः॥ स्वयमेवाचरन्कर्म तथा तत्र
विभाव्यते॥ सुखं वा यदि वा दुःखं स्वकर्मवशगो नरः॥ यद्यद्यथागतं कर्म भोक्तव्यं तत्र नान्यथा॥ न तेषां गमने वांछा न
ते भोगविवर्जने॥ आगच्छत्व यथागच्छत्व भोगवशगो भवेत्॥ यन्न शोचकाले वयस्माद्येन केन वा॥ तत्तं भुक्ता शुभं
कर्म भोक्तव्यं तत्र नान्यथा॥ अलं हर्षविषादाभ्यां शुभाशुभफलोदये॥ विधात्रा विहितं यद्यत्तदलंघ्यं सुरासुरैः
॥ सर्वदा सुखदुःखाभ्यां नरः प्रत्यवरुध्यते॥ शरीरं पुण्यपापाभ्यां उत्पन्नं सुखदुःखमत्॥ सुखस्यानंतरं दुःखं दु
खस्यानंतरं सुखं॥ द्वयमेतद्धि जंतूनां अलंघ्यं दिनरात्रिवत्॥ सुखमध्ये स्थितं दुःखं दुःखमध्ये स्थितं सुखं द्वय
मन्योन्यसंयुक्तं प्रोच्यते जलपंकवत्॥ तस्माद्धैर्येण विद्वांसः इष्टानिष्टोपपत्तिषु॥ न हृष्यंति मुह्यंसर्वं मायेति भा
वनात्॥ गुहलक्ष्मणयोरेवं भाषतोर्विमलं नभः॥ बभूव रामः सलिलं स्पृष्ट्वा प्रातः समाहितः॥ उवाच शीघ्रं सुदृढां ना
वमानय मे सखे॥ श्रुत्वा रामस्य वचनं निषादाधिपतिर्गुहः॥ स्वयमेव दृढां नावमानिय शुल लक्ष्मण॥ स्वामिन्नारु

ह्यतां नौकासीतया लक्ष्मणेन च॥ बाहयेज्ञातिभिः सार्धमहमेव समाहितः॥ तथेति राघवः सीतामारोप्य शुभलक्षणां॥ गु
हस्य हस्तावलंब्य स्वयं चारुहदच्युतः॥ आयुधादीन्समानीय लक्ष्मणोप्यारुरोह च॥ गुहस्तां वाहयामास ज्ञातिभिः स
हितः स्वयं॥ गंगामध्ये गतां गंगां प्रार्थयामास जानकी॥ देवि गंगे नमस्तेस्तु निवृत्ता वनवासतः॥ रामेण सहिताहं लक्ष
्मणेन च पूजये॥ सुरामांसोपहारैश्च नानाबलिभिरादृता॥ इत्युक्त्वा परकूलं ते शनैरुत्तीर्य जग्मतुः॥ गुहोपि रा
घवं प्राह गमिष्यामि त्वया सह॥ अनुजानीहि राजेंद्र नाचेत्प्राणांस्त्यजाम्यहं॥ श्रुत्वा स्यानुदितं सत्येनाश्वास्य रामभा
षितं॥ इत्युक्त्वालिंगयत भक्तं समाश्वास्य पुनः पुनः॥ निवर्तयामास गुहं सोपि दुःखाद्ययौ गृहं॥ तत्र मेध्यं मृगं हत्वा प
क्त्वा हुत्वा चते त्रयः॥ भुक्त्वा वृक्षदले सुप्त्वा सुखमासत तां निशां॥ ततो रामस्तु वैदेह्या लक्ष्मणेन समन्वितः॥
२ भरद्वाजाश्रमपदं गत्वा बहिरुपस्थिताः॥ तत्रैकं बटुकं दृष्ट्वा रामः प्राह च हे बटो॥ रामो दाशरथिः सीता लक्ष्मणाभ्यां स
मन्वितः॥ आस्ते बहिर्वनस्येति मुच्यतां मुनिसन्निधौ॥ तच्छ्रुत्वा सहसा गत्वा पादयोः पतितो मुनेः॥ स्वामिन्नाम
समागत्य वनाद्बहिरवस्थितः॥ सभार्यः सानुजः श्रीमान् प्राह मां देहसन्निभः॥ भरद्वाजो यमुनये ज्ञापयस्वप यो
दितः॥ तच्छ्रुत्वा सहसोत्थाय भरद्वाजो मुनीश्वरः॥ गृहीत्वार्घ्यं च पाद्यं च रामसामीप्यमाययौ॥ दृष्ट्वा रामं यथान्याय्यं
पूजयित्वा सलक्ष्मणं॥ प्राह मे पर्णशालां भो राम रावलोकन॥ मागच्छ पादरजसा पुनीहि रघुनंदन॥ इत्यु
क्त्वो बजमायैनीय सीतसह राघवो॥ नत्वा पुनः पूजयित्वा सस्नेहम वकारातिथ्यमुमं॥ अद्याहं तत्तपारंगतो

स्मितमसंगमात्॥ ज्ञातं राम त्वयोक्तं तन्मतं चागामि चेयता॥ जानामि त्वां परमात्मानं मायया कायमानुषं॥ यदर्थ
मवतीर्णोसि प्रार्थितो ब्रह्मणा पुरा॥ यदर्थं वनवासस्ते यत्करिष्यसि वै पुरः॥ जानामि ज्ञानदृष्ट्याहं जात
यात्वदुपासनात्॥ इतःपरं त्वां किं वक्ष्ये कृतार्थोहं रघूत्तम॥ यत्त्वां पश्यामि काकुस्थः पुरुषं प्रकृतेः परं॥ रा
मस्तमालिंग्याह सीतालक्ष्मणसंयुतः॥ उषित्वाद्य त्वया ब्रह्मन् वयं सर्वेपि बंधवः॥ इति संभा
ष्यतोन्योन्यमुषित्वा मुनिसन्निधौ॥ प्रातरुत्थाय यमुनामुत्तीर्य मुनिदारकैः॥ कृतप्लवेन मुनिनादि
ष्टमार्गेण राघवः॥ प्रययौ चित्रकूटाद्रिं वाल्मीकेर्यत्र चाश्रमः॥ गत्वा रामोथ वाल्मीकेराश्रमं ऋषिसं
कुलं॥ नानामृगद्विजाकीर्णं नित्यपुष्पफलोपमं॥ तत्र दृष्ट्वा समासीनं वाल्मीकिं मुनिसत्तमं॥ ना
नामुनिरसा रामो लक्ष्मणो नु ब्रसीतया॥ दृष्ट्वा रामं रमानाथं वाल्मीकिर्लोकसुंदरं॥ जानकीलक्ष्मणो
पेतं जटामुकुटमंडितं॥ कंदर्पसदृशाकारं कमनीयांबुजेक्षणं॥ दृष्ट्वैव सहसोत्थाय विस्मयानिमिषे
क्षणः॥ आलिंग्य परमानंदं रामं हर्षाश्रुलोचनः॥ पूजयित्वा जगत्पूज्यं भक्त्यार्घ्यादिभिरादृतः॥ फलैर्मूलै
र्मधुरैर्भोजयित्वाऽऽलिंगितः॥ राघवः प्रांजलिः प्राह वाल्मीकिं विनयान्वितः॥ पितुराज्ञां पुरस्कृत्य दंडकाना रामः
गतावयं॥ भवंतो यदि जानंति किं वक्ष्यामोत्र कारणं॥ यत्र मे सुखवासाय भवेत्स्थानं वदस्व तत्॥ सीतया सहितः का ३०॥
चित्कालं नयाम्यहं॥ इत्युक्तो राघवेण सौ मुनिः सस्मितमब्रवीत्॥ वाल्मीकिरुवाच॥ त्वमेव सर्वलोकानां निवास

स्थानमुत्तमं॥ तथापि सर्वभूतानि निवाससदनानि हि॥ एवं साधारणं स्थानमुक्तं ते रघुपुंगव॥ सीतया सहितस्येति
विशेषं पृष्टतस्तव तद्वदामि रघुश्रेष्ठ यत्ते नियतमंदिरं॥ शांतानां समदृष्टीनामद्वेष्टॄणां च जंतुषु॥ त्वामेव भज
तां नित्यं हृदयं तेधिमंदिरं॥ धर्माधर्मान्परित्यज्य त्वामेव भजतो निशं॥ सीतया सहितस्यायं तस्य हृत्सुखमंदिरं॥ त्वन्मं
त्रजापको यस्तु त्वामेव शरणं गतः॥ निर्द्वंद्वो निस्पृहस्तस्य हृदयं ते सुमंदिरं॥ निरहंकारिणः शांता राग
द्वेषवर्जितां॥ समलोष्टाश्मकनकास्तेषां ते हृदयं गृहं॥ त्वयि दत्तमनोबुद्धिर्यः संतुष्टः सदा भवेत्॥ त्वयि संन्य
स्तकर्मा यस्तन्मनस्तस्य शुभं गृहं॥ यो न द्वेष्ट्यप्रियं प्राप्य न हृष्यति न इष्यति॥ सर्वं मायेति निश्चित्य त्वां भजेत्तन्म
नो गृहं॥ षड्भावादिविकारान्यो देहे पश्यति नात्मनि॥ क्षुत्तृट्सुखं तथा दुःखं प्राणबुद्ध्योर्निरीक्षते॥ संसारधर्मै
र्निर्मुक्तः तस्यते मानसं गृहं॥ पश्यंति ये सर्वगुहाशयस्थं त्वां चिद्घनं सत्यमनंतमेकं॥ अलेपकं सर्वगतं वरेण्यं तेषां
हृदब्जे सह सीतया वस॥ निरंतराभ्यासदृढीकृतानां त्वत्पादसेवापरिनिष्ठितानां॥ त्वन्नामकीर्त्याहतकल्मषात्म
नां सीतासमेतस्य गृहं हृदब्जे॥ राम त्वन्नाममहिमा वर्ण्यते केन वा कथं॥ यत्प्रभावादहं राम ब्रह्मर्षित्वमवाप्तवा
वान्॥ अहं पुरा किरातेषु किरातैः सह वर्धितः॥ जन्ममात्रद्विजत्वं मे शूद्राचाररतः सदा॥ शूद्रायां बहवः पुत्रा उत्पन्ना
मेजितात्मनः॥ ततः स्वोरैश्च संगम्य चोरोहमभवं पुरा॥ धनुर्बाणधरो नित्यं जीवघात्यंतकोपमः॥ एकदा मुनयः सप्त

अ०रामायण
३२॥

ष्टामहतिकानने॥सादृष्टान्नेपाप्रकाशंतो ज्वलनार्कसमप्रभा॥तानन्वधावंल्लोभेनतेषांसर्वपरिछदान्॥ग्रहीतु
कामस्तत्राहंतिष्ठतिष्ठेतिचाब्रुवं॥दृष्ट्वामांमुनयोपृछन्किमायासिद्विजाधम॥इत्युक्तोहंतानवोचंकिंचिद्दातु
मुनिसत्तमाः॥पुत्रदारादयःसंतिबहवोमेबुभुक्षिताः॥तेषांसंरक्षणार्थायचरामिगिरिकानने॥ततोमामूचु
रव्यग्राःपृछगत्वाकुटुंबकं॥योयोमयाप्रतिदिनंक्रियतेपापसंचयः॥यूयंतद्भागिनःकिंवानेतिवेतिपृथक्
पृथक्॥वयंस्थास्यामहेयावद्आगमिष्यसिनिश्चयं॥तथेत्युक्त्वागृहंगत्वामुनिभिर्यदुदीरितं॥अपृछंपु
त्रदारांस्तैरुक्तोहंरघूत्तम॥पापंतवैवतत्सर्वंवयंतुफलभागिनः॥तच्छ्रुत्वाजातनिर्वेदोविचार्यपुनरागमं
॥मुनयोयत्रतिष्ठंतिकरुणापूर्णमानसाः॥मुनीनांदर्शनादेवशुद्धांतःकरणोभवं॥धनुरादीन्परित्यज्यदंडव
त्पतितोस्म्यहं॥रक्षध्वंमांमुनिश्रेष्ठागछंतंनिरयार्णवं॥इत्यग्रेपतितंदृष्ट्वामामूचुर्मुनिसत्तमाः॥उत्तिष्ठोत्तिष्ठ
भद्रंतेसफलःसत्समागमः॥उपदेक्ष्यामहेतुभ्यंकिंचित्तेनैवमोक्ष्यसे॥परस्परंसमालोच्यदुर्वृत्तोयंद्विजाध
मः॥उपेक्ष्यएवसद्वृत्तैस्तथापिशरणंगतः॥रक्षणीयःप्रयत्नेनमोक्षमार्गोपदेशतः॥इत्युक्त्वारामतेनामव्य
त्यस्ताक्षरपूर्वकं॥एकाग्रमनसात्रैवमरेतिजपसर्वदा॥आगछामःपुनर्यावत्तावदुक्तंसदाजप॥इत्युक्त्वा
प्रययुःसर्वेमुनयोदिव्यदर्शनाः॥यथोपदिष्टंतैस्तद्वत्तथाकरवमंजसा॥जपन्नेकाग्रमनसाबाह्यंविस्मृतवानह
मं

श्रीराम
३२॥

नो॥एवंबहुतिथेकालेगतेनिश्चलरूपिणः॥सर्वसंगविहीनस्यवल्मीकोभून्ममोपरि॥ततोयुगसहस्रांतेऋष
यःपुनरागताः॥मामूचुर्निष्क्रमस्वेतितच्छ्रुत्वातूर्णमुत्थितः॥वल्मीकान्निर्गतोवाहंनीहारादिवभास्करः॥मामप्या
हुर्मुनिगणाःवाल्मीकिस्त्वंमुनीश्वर॥वाल्मीकात्संभवोयस्मात्द्वितीयंजन्मतेभवत्॥इत्युक्त्वातेययुर्दिव्यगतिं
रघुकुलोत्तम॥अहंतेरामनाम्नश्चप्रभावादीदृशोभवं॥अद्यसाक्षात्प्रपश्यामिससीतंलक्ष्मणेनच॥रामंराजी
वपत्राक्षंत्वांमुक्तोनात्रसंशयः॥आगछराममद्रंतेस्थलंतेदर्शयाम्यहं॥एवमुक्त्वामुनिश्रेष्ठोरामंलक्ष्मणेन
समन्वितः॥शिष्यैःपरिवृतोगत्वामध्येपर्वतगंगयोः॥तत्रशालांसुविस्तीर्णांकारयामासनाकुभं॥प्राक्प्रत्यदे
दक्षिणोदक्शोभनंमंदिरद्वयं॥जानक्यासहितोरामोलक्ष्मणेनसमन्वितः॥तत्रतेदेवसदृशाःन्यवसन्त्रवनो
त्तमे॥वाल्मीकिनानित्यस्तुपूजितोयंरामःससीतःसलक्ष्मणेनदेवैः॥मुनींद्रसहितोमुदास्तेस्वर्गेयथादेव
पतिःसराघवः॥ ॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेषष्ठःसर्गः॥श्रीमहा
देवउवाच॥सुमंत्रोपितदायोध्यांदिनांतेप्रविवेशह॥वस्त्रेणमुखमाछाद्यबाष्पाकुलितलोचनः॥१॥ब
हिरेवरथंस्थाप्यराजानंद्रष्टुमाययौ॥जयशब्देनराजानंस्तुत्वाप्रणनामच॥२॥ततोराजानमंतंतंसुमंत्रं
विह्वलोब्रवीत्॥सुमंत्ररामक्वास्तेसीतयालक्ष्मणेनच॥कुत्रत्यक्तस्त्वयारामःकिंमांपापिनमब्रवीत्॥सी

अ०रा०

२२॥

+ सुमंत्र उवाच २

ता जल्पमानो वापि निःश्वसन्मां किमब्रवीत् ॥ हा राम हा गुणनिधे हा सीते प्रियवादिनि ॥ दुःखार्णवे निमग्नं मां म्रियमा
णं न पश्यथ ॥ विलप्येवं चिरं राजा निमग्नो दुःखसागरे ॥ एवं मंत्री रुदंतं तं प्रांजलिर्वाक्यमब्रवीत् ॥ रामः सी
ता च सौमित्रिः मया नीता रथेन ते ॥ शृंगिवेरपुराभ्याशे गंगाकूले व्यवस्थिताः ॥ गुहेन किंचिदानीतं फलमू
लादिकं च राघवः ॥ स्पृष्ट्वा हस्तेन संप्रीत्या नाग्रहीद्विससर्ज तत् ॥ वटक्षीरं समानाय्य गुहेन रघुनंदनः ॥ जटामकुटमा
बध्याह मां रघुनंदनः ॥ सुमंत्र ब्रूहि राजानं शोकस्ते स्तु न मत्कृते ॥ साकेतादधिकं सौख्यं विपिने मे भवि
ष्यति ॥ मातुर्मे वंदनं ब्रूहि शोकं त्यजतु मत्कृते ॥ प्रवासजं तु राजानं वृद्धं शोकपरिप्लुतं ॥ सीता साश्रुपरीता
क्षी मामाह नृपसत्तम ॥ दुःखगद्गदया वाचा रामं किंचिदवेक्षती ॥ साष्टांगप्रणिपातं मे ब्रूहि श्वश्र्वपदांबुजे ॥ +
इति ब्रुवंती सीता गता किंचिदवाङ्मुखी ॥ ततः साश्रुपरीताक्षी नावमारुरुहुस्तदा ॥ यावद्गंगां समुत्तीर्य कौशल्यो
गतास्तावदहं स्थितः ॥ ततो दुःखेन महता पुनरेवाहमागतः ॥ ततो रुदंती कौशल्या राजानमिदमब्रवीत् ॥ वाच ४
कैकेय्यै प्रियभार्यायै प्रसन्नो दत्तवान्वरं ॥ त्वं राज्यं देहि तस्यैव मत्पुत्रः किं विवासितः ॥ कृत्वा त्वमेव तत्सर्वं रामः
इदानीं किं नु रोदिषि ॥ कौशल्यावचनं श्रुत्वा सतेस्पृष्ट इवाग्निना ॥ पुनः शोकाश्रुपूर्णाक्षः कौशल्यामिदम ३२॥
ब्रवीत् ॥ दशरथ उवाच ॥ दुःखेन म्रियमाणं मां किं पुनर्दुःखयस्य ते ॥ इदानीमेव मे प्राणा उत्क्रमिष्यंति निश्चयः ॥

राजोवाच ५

स्म
शप्तोहं बालेन केनचिन्मुनिना पुरा ॥ पुराहं यौवनोद्रिक्तः चापबाणधरो निशि ॥ अचरं मृगयासक्तो नद्यास्तीरे महावने ॥ तत्रा
ईदृशो त्रिसंध्यायां मुनिः कश्चित्तृषार्दितः ॥ पिपासार्दितयोः पित्रोः जलमानेतुमुद्यतः ॥ अपूरयज्जले कुंभं तदा शब्दोभवन्म
हान् ॥ गजो विवति पानीयमिति मत्वा महानिशि ॥ बाणं धनुषि संधाय शब्दवेधि तमक्षिपं ॥ हा हतोस्मीति तत्राभूत्
शब्दो मानुषसूचकः ॥ कस्यापि न कृतो दोषो मया केन हतो विधे ॥ प्रतीक्षते मे माता च पिता च जलकांक्षया ॥ तच्छ्रुत्वा
भयसंत्रस्तो गत्वेहं पौनुषं वचः ॥ शनैर्गत्वाथ तं प्राह स्वामिन्दशरथोस्म्यहं ॥ अजानता मया विद्धस्त्वं तु मर्हसि
मां मुने ॥ इत्युक्त्वा पादयोस्तस्य पतितो गद्गदाक्षरः ॥ तदा माह स मुनिः मा भैषीर्नृपसत्तम ब्रह्महत्या स्पृशेन्न त्वां वैश्योहं तपसि स्थि
तः ॥ पितरौ मां प्रतीक्षेते क्षुत्तृड्भ्यां परिपीडितौ ॥ तयोस्त्वमुदकं देहि शीघ्रमेवाविचारयन् ॥ नो चेत्त्वां तं स्मसात्कुर्यात्पि
ता मे यदि कुप्यति ॥ जलं दत्वा तु तौ नत्वा हं तं सर्वं न्यवेदय ॥ शल्यमुद्धर देहान्मे प्राणांस्त्यक्ष्यामि पीडितः ॥ इत्युक्तो मुनिना शी
घ्रं बाणमुत्पाटये देहतः ॥ सजलं कलशं धृत्वा गतोहं यत्र दंपती ॥ अति[illegible] शोकु[illegible]नौ निशि ॥ नायाति सलिलं कृ दंतौ ४
हा पुत्र किं वा त्वकारणं ॥ अनन्यगतिकौ वृद्धौ क्षुत्तृट्परिपीडितौ ॥ आवामुपेक्षसे किं वा तत्किमानावपोहसि ॥ इति चिंता
विचारौ तौ मत्पादन्यसजं ध्वनिं ॥ श्रुत्वा प्राह पिता पुत्र किं विलंबः कृतस्त्वया ॥ देह्यावयोः सुपानीयं पिब वत्स पिपुत्रक ॥ इत्येवं पितरौ सी
त्वा सकाशमगमं शनैः ॥ पादयोः प्रणिपत्याहमब्रवं भयनम्रयान्वितः ॥ नाहं पुत्रस्तयोर्धाराजा दशरथोस्म्यहं ॥ पापोहं

अध्यात्मरामायण:
४२।।

म्रगयासक्तो रात्रौ सरयूतटे विहंसवः।। जलावतारे दूरेहं स्थित्वा तन्नगतं ध्वनिं।। श्रुत्वाहं शब्दवेधित्वादेकं बाणमथोत्सृजं
।। हतोस्मीति ध्वनिं श्रुत्वा भयात्तत्राहमागतः।। जटाविकीर्णपतितं दृष्ट्वाहं मुनिदारकं।। भीतो गृहीत्वा तत्पादौ रक्ष दौर
रक्षेति चाब्रवं मा भैषीरिति माह ब्रह्महत्या न यं न ते।। मत्पित्रोः सलिलं दत्वा नत्वा प्रार्थय माचिरं।। इत्युक्तो।। मुनिना ते
न आगतो मुनिहिंसकः।। रक्षतं मां दयायुक्तौ युवां शरणमागतं।। इति श्रुत्वा तु दुःखार्त्तौ विलप्य बहुशोच्य पति
तौ नौ सुतौ यत्र नयतत्राविलंबयन्।। ततो नीतौ सुतो यत्र मयाता दंपती।। स्पृष्ट्वा सुतौ तौ हस्ताभ्यां बहुशोथ वि
लेपतुः।। ततो मामूचतुः शीघ्रं चितिं रचय भूपते।। मयातदैव रचिता चितिस्तत्र निवेशिताः।। त्रयस्तेग्निना त्व
क्षेदृश्य स्तैत्रदिवं ययुः।। तत्र वृद्धपिता मह्यमशपद्भविष्यसि।। पुत्रशोकेन मरणं प्राप्स्यसे वचनान्मम।। स इदानीं समत्रा
प्तः शापकालो निवारितः।। इत्युक्त्वा विललापाथ राजा शोकसमाकुलः।। हा राम पुत्र हा सीते हा लक्ष्मण गुणानिधे
।। त्वद्वियोगादहं प्राप्तो मृत्युं कैकेयिसंभवं।। वदन्नेवं दशरथः प्राणांस्त्यक्त्वा दिवं गतः।। कौशल्या च सुमित्रा च तथा
ताराजयोषितः।। चुक्रुशुरुरुविलेपुश्च उरस्ताडनपूर्वकं।। वसिष्ठः प्रययौ तत्र प्रातर्मंत्रिभिरावृतः।। तैलद्रोण्यां दशर
थं क्षिप्त्वा दूतानथाब्रवीत्।। गच्छत त्वरितं यूयं युधाजिन्नगरं प्रति।। तत्रास्ते भरतः श्रीमान्शत्रुघ्नसहितः प्रभुः।। रामः
४२।।

उच्यतां भरतं शीघ्रमागच्छतु ममाज्ञया।। अयोध्यां प्रति राजानं कैकेयी [illegible]पिपश्यतु।। इत्युक्तास्त्वरितं दूता गत्वा भरतमा
तुलं।। युधाजितं प्रणम्योचुर्भरतं सानुजं द्रुतं।। वसिष्ठस्त्वब्रवीद्राजन्भरतः सानुजः।। प्रभो।। शीघ्रमागच्छतु पुरीमयो
ध्यामयिरारयन्नृ इत्याज्ञप्तोथ भरतस्त्वरितं नयविह्वलः।। आययौ गुरुणादिष्टस्सहदूतैः ससानुजः।। राज्ञो वा राघवस्या
पि दुःखं किंचिदुपस्थितं।। इति चिन्तापरो मार्गे चिंतयन्नगरं ययौ।। नगरं भ्रष्टलक्ष्मीकं जनसंबाधवर्जितं।। उत्सवैस्त्वपरित्य
क्तं दृष्ट्वा चिन्तापरोभवत्।। प्रविश्य राजभवनं राजलक्ष्मीविवर्जितं।। अपश्यत्कैकयीं तत्र एकामेवासने स्थितां।। ननाम
शिरसा मातुर्भक्तिसमन्वितः।। आगतं भरतं दृष्ट्वा कैकेयी प्रेमसंभ्रमा।। उत्थायालिंग्य रभसा स्वांकमारोप्य संस्थिता।। मूर्ध्नि
व घ्राय पप्रच्छ कुशलं स्वकुलस्य सा।। पिता मे कुशली भ्राता माता वा शुभलक्षणा।। दिष्ट्यात्यमद्य पश्यामीदं मे याश्चे।। सपत्रक।।
इति पृष्टस्स भरतो मात्रा चिंताकुलेंद्रियः।। दयमानेन मनसा मातरं समपृच्छत।। मातः पिता मे कुत्रास्ते एकाकिनीह संस्थि
ता।। त्वया विना न मे तातः कदाचिद्रहसि स्थितः।। इदानीं दृश्यते नैव कुत्र तिष्ठति मे वद।। अदृष्ट्वा ते पितुर्मे नयं दुःखं प्रजाय
ते।। अथाह कैकयी पुत्रं किं दुःखेन तवानघ।। या गतिर्धर्मशीलानामश्वमेधादियाजिनां।। तां गतिं गतवानद्य पिता ते पि
तृवत्सल।। तच्छ्रुत्वा निपपातोर्व्यां भरतः शोकविह्वलः।। हा तात क्व गतोसि त्वं त्यक्त्वा मां वृजिनार्णवे।। असमर्प्यैव रामाय
राज्ञे मां क्व गतोसि तात।। इति विह्वलितं पुत्रं पतितं मुक्तमूर्द्धजं।। उत्थाप्यामृज्य नयने कैकेयी पुत्रमब्रवीत्।। समाश्व

आ॰रा॰
४॥

श्री मते रा
नम॥

खवसि हि भरते सर्वं संपादितं मया॥ तामाह भरतस्तातो मम यत्र गतः किमब्रवीत्॥ तमाह कैकयी देवी भरतं भयवर्जिता
॥ हा राम राम सीते लक्ष्मणेति पुनः पुनः॥ विलपन्नेव सुचिरं देहं त्यक्त्वा दिवं ययौ॥ तामाह भरतो हे व रामः सन्निहितो
न किं॥ तदानीं लक्ष्मणो वापि सीता वा कुत्र ते गता॥ कैकेयी॥ रामस्य यौवराज्यार्थं पित्रा ते संभ्रमः कृतः॥ तव राज्यप्रदा
नाय तदाहं विघ्नमाचरं॥ राज्ञा दत्तं हि मे पूर्वं वरदेन वरद्वयं॥ याचितं॥ तद्वसत्यपरो राजा सम्यक्ला राज्यं रामस्य
चैकेन वनवासो मुनिव्रतः॥ ततः सत्यपरो राजा राज्यं दत्वा तवैव हि॥ रामं संप्रेषयामास वनमेव पिता तव॥ सीताप्यनु
गता रामं पातिव्रत्यमुपाश्रिता॥ सौभ्रात्रं दर्शयन् रामं अनुयातोपि लक्ष्मणः॥ वनं गतेषु सर्वेषु राजा तामेव चिंत
यन्॥ प्रलपन् राम रामेति ममार नृपसत्तमः॥ इति मातुर्वचः श्रुत्वा वज्राहत इव द्रुमः॥ पपात भूमौ निःसंज्ञस्तं दृष्ट्वा दुःखि
ता तदा॥ कैकेयी पुनरप्याह वत्स शोकेन किं तव॥ राज्ये महति संप्राप्ते दुःखस्यावसरः कुतः॥ इति ब्रुवतिमालोक्य मातरं प्र
दहन्निव॥ उवाच भाष्या हे पापे मम घोरे त्वं भर्तृघातिनि पापे त्वद्गर्भजातोहं पापवानस्मि सांप्रतं॥ अहमग्निं प्रवेक्ष्यामि वि
षं वा भक्षयाम्यहं॥ खड्गेन वाथवात्मानं हत्वा यामि यमक्षयं॥ भर्तृघातिनि दुष्टे त्वं कुंभीपाके भविष्यसि॥ इति निर्भर्त्स्य कैकेयीं
कौशल्याभवनं ययौ॥ सापि तं भरतं दृष्ट्वा मुक्तकंठा रुरोद ह॥ पादयोः पतितस्तस्या भरतोपि तदारुदत्॥ आलिंग्य भरतं साध्वी
राममाता यशस्विनी॥ कृशातिदीनवदना साश्रुनेत्रेदमब्रवीत्॥ पुत्र त्वं विगते भूते एवं सर्वमिदं॥ उक्तं मात्रा श्रुतं सर्वं त्वया ते रामः
चेष्टितं॥ ३५२२

त्वचेष्टितं॥ पुत्रः सभार्यो वनमेव यातः सलक्ष्मणो मे रघुरामचंद्रः॥ चीरांबरो बद्धजटाकलापः संत्यज्य मां दुःखसमुद्रम
ग्नां॥ हा राम हा मे रघुवंशनाथ जातोसि मे त्वं परतः परात्मा॥ तथापि दुःखं न जहाति मां वै विधिर्बलीयानिति मे मनीषा॥ भ
रतस्ततो वी॥ विलप्य॥ तीव्रशुचा तरां पादौ गृहीत्वा प्राह हे दे शृणु मातर्वचो मम॥ कैकेय्या यत्कृतं कर्म राज्याभिषेचने॥ अन्यद्वा
यदि जानामि सा मया॥ चोदिता यदि पापं मे स्यात्तदा तः ब्रह्महत्याशतोद्भवं॥ हत्वा वसिष्ठं खड्गेन अरुंधत्या समन्वितं॥ न ४
भूयात्तत्पापमखिलं मम जानामि यद्यपि॥ इत्येवं शपथं कृत्वा रुरोद भरतस्तदा॥ कौशल्या तमथालिंग्य पुत्र जानामि माशु
चः॥ एतस्मिन्नंतरे श्रुत्वा भरतस्य समागमं॥ वसिष्ठो मंत्रिभिः सार्द्धं प्रययौ राजमंदिरं॥ रुदंतं भरतं दृष्ट्वा वसिष्ठः प्रा
ह सादरं॥ वृद्धो राजा दशरथो ज्ञानी सत्यपराक्रमः॥ भुक्त्वा मर्त्यसुखं सर्वं इष्ट्वा विपुलदक्षिणैः॥ अश्वमेधादि
भिर्यज्ञैः लब्ध्वा रामं हरिं सुतं॥ अंते जगाम त्रिदिवं देवेंद्रार्द्धासनं प्रभुः॥ तं शोचसि वृथैव त्वं अशोच्यं मोक्षभाज
नं॥ आत्मा नित्योऽव्ययः शुद्धो जन्मनाशादिवर्जितः॥ शरीरं जडमत्यर्थं अपवित्रं विनश्वरं॥ विचार्यमाणे शोक
स्य नावकाशः कथंचन॥ पिता वा तनयो वापि यदि मृत्युवशं गतः॥ मूढास्तमनुशोचंति स्वात्मताडनपूर्व
कं॥ निःसारे खलु संसारे वियोगो ज्ञानिनां यदा॥ भवेद्वैराग्यहेतुः स शांतिसौख्यं तनोति च॥ जन्मवान्यदि लो
केस्मिन् तर्हि तं मृत्युरन्वगात्॥ तस्मादपरिहार्योयं मृत्युर्जन्मवतां सदा॥ स्वकर्मवशतः सर्वं जंतूनां प्रभवाप्ययौ॥

विज्ञानन्नपिहितात्मनः कथं शोचति बांधवान्॥ ब्रह्मांडाः कोटयो नष्टाः सृष्टयो बहुशो गताः॥ शुष्यंति साग
राः सर्वे कैवास्था क्षणजीविते। चलपत्रांतलग्नांबुबिंदुवत्क्षणभंगुरं॥ आयुस्त्यजत्यवेलायां कस्तत्र प्रत्यय
स्तव॥ देही प्राक्तनदेहोत्थकर्मणा देहवान्पुनः॥ तद्देहोत्थेन च पुनरेवं देहः सदात्मनः॥ यथा त्यजति वै जीर्णं
वासो गृह्णाति नूतनं॥ तथा जीर्णं परित्यज्य देही देहं पुनर्नवं॥ भजत्येव सदा तत्र शोकस्यावसरः कुतः॥ आत्मा
न म्रियते जातु जायते वर्द्धते न च॥ षड्भावरहितोनंतः सत्यप्रज्ञानविग्रहः॥ आनंदरूपो बुद्ध्यादिसाक्षी ल
यविवर्जितः॥ एक एव परो ह्यात्मा ह्यद्वितीयः समः स्थितः॥ इत्यात्मानं दृढं ज्ञात्वा त्यक्त्वा शोकं कुरु क्रियाः॥
तैलद्रोण्याः पितुर्देहमुद्धृत्य सचिवैः सह॥ कृत्यं कुरु यथान्यायमस्माभिः कुलनंदन॥ इति संबोधितः साक्षाद्गु
रुणा भरतस्तदा॥ विसृज्याज्ञानजं शोकं चक्रे सविधिवत्क्रियाः॥ गुरुणोक्तप्रकारेण आहिताग्नेर्यथाविधि॥
संस्कृत्य स पितुर्देहं विधिदृष्टेन कर्मणा॥ एकादशेहनि प्राप्ते ब्राह्मणान्वेदपारगान्॥ भोजयामास विधिव
च्छतशोथ सहस्रशः॥ उद्दिश्य पितरं तत्र ब्राह्मणेभ्यो धनं बहु॥ ददौ गवां सहस्राणि ग्रामान्रत्नांबराणि च॥ राम:
एवं सत्त्वगृहे तत्र राममेवानुचिंतयन्॥ वसिष्ठेन सह भ्रात्रा मातृभिः परिवारितः॥ रामे रण्यं प्रयाते सह जनक ३५॥
सुतालक्ष्मणाभ्यां सुघोरं माता मे राक्षसीव प्रहरति हृदयं दर्शनादेव सद्यः॥ गच्छाम्यारण्यमद्य स्थिरमतिरखिलं

+ भरतागमनं नाम २   + मं २   + रा २

दूरतोपास्य राज्यं रामं सीतासमेतं स्मितरुचिरमुखं नित्यमेवानुसेवे॥ ॥।इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे अयोध्याकांडे सप्तमः सर्गः॥ श्रीमहादेव उवाच॥ वसिष्ठो मुनिभिः सार्द्धं मंत्रिभिः पौरवासिभिः॥ राज्ञः सभां
देवसभासंनिभामरिशासितुः॥ तत्रासने समासीनश्चतुर्मुख इवापरः॥ आनाय्य भरतं तत्र उपवेश्य सहानुजं॥
अब्रवीद्वचनं देशकालोचितमरिंदमं॥ वसिष्ठ उवाच॥ वत्स राज्येभिषेक्ष्यामस्त्वामद्य पितृशासनात्॥ कैकेय्या
चितं राज्यं त्वदर्थे पुरुषर्षभ॥ सत्यसंधो दशरथः प्रतिज्ञाय ददौ किल॥ अभिषेको भवत्वद्य मुनिभिर्मंत्रपूर्वकं॥
तच्छ्रुत्वा भरतो व्याह मम राज्येन किं मुने॥ रामो राजा हि तस्यैव वयं तस्यैव किंकराः॥ श्वः प्रभाते गमिष्यामो रामं मात
तुभं तसा॥ अहं यूयं माता च कैकेयी राक्षसीं विना॥ हनिष्यामि धुनैवाहं कैकेयीं मातृगंधिनीं॥ किंतु मां नो रघुश्रेष्ठः
स्त्रीहंतारं सहिष्यते॥ तच्छ्रुत्वा मूते गमिष्यामि पादचारेण दंडकान्॥ शत्रुघ्नसहितस्तूर्णं यूयं गच्छंतु वा न वा॥ रामो यथा
वनं यातस्तथाहं वल्कलांबरः॥ फलमूलकृताहारः शत्रुघ्नसहितो मुने॥ भूमिशायी जटाधारी यावद्रामो निवर्त्तते॥ इति
निश्चित्य भरतस्तूष्णीमेवावस्थितवान्॥ साधु साध्विति ते सर्वे प्रशशंसुर्मुदान्विताः॥ ततः प्रभाते भरतं गच्छंतं स
र्वसैनिकाः॥ अनुजग्मुः सुमंत्रेण नोदिताः साश्वकुंजराः॥ कौशल्याद्या राजदारा वशिष्ठप्रमुखा द्विजाः॥ छादयंतो चु
वं सर्वोश्चेतः पार्श्वतो ययुः॥ शृंगिवेरपुरं गत्वा गंगाकूले समंततः॥ उवास महती सेना शत्रुघ्नपरिनोदिता॥
आगतं भरतं श्रुत्वा गुहः शंकितमानसः॥ महत्यासेनया सार्द्धमागतो भरतांतिके॥ पापं कर्तुं न वायाति रामस्य वि

वि३

दितात्मना॥ गच्छ तद्हृदयं ज्ञेयं यदि दुष्टं करिष्यति॥ गंगाने चेत्समाकृष्य नावस्तिष्ठंतु सायुधाः॥ ज्ञातयो मे सयत्नाः पश्यंतः
सर्वतो दिशः॥ इति सर्वान्समादिश्य गुहो भरतमागतः॥ उपायनानि संगृह्य विविधानि बहून्यपि॥ त्रययो ज्ञातिभिः
सार्धं बहुभिर्विधायुधैः॥ निवेद्योपायनान्यग्रे भरतस्य समंततः॥ दृष्ट्वा भरतमासीनं सानुजं सहमंत्रिभिः॥ ची
रांबरं घनश्यामं जटामुकुटमंडितं॥ राममेवानुशोचंतं राम रामेति वादिनं॥ ननाम शिरसा भूमौ गुहोहमिति वा
ब्रवीत्॥ शीघ्रमुत्थाप्य भरतो गाढमालिंग्य सादरं॥ पृष्ट्वानामयमव्यग्रः सखायमिदमब्रवीत्॥ भरत उवाच॥
भ्राता त्वं राघवेण त्वं समेतः प्रमवस्थितः॥ रामेणालिंगितः सार्द्रनयनेनामलात्मना॥ धन्योसि कृतकृत्योसि यत्त
या परिभाषितः॥ रामो राजीवपत्राक्षो लक्ष्मणेन च सीतया॥ यत्र सुप्तस्त्वया दृष्टस्तत्र मां नय सुव्रत॥ सीतया
सहितो यत्र स देवतद्दर्शय त्वं मे॥ तं राममस्याभ्रियतमो नन्निमानसिंता ग्यवान्ध्रु॥ इति संस्मृत्य रामं स भरतः साश्रुलोचनः॥
गुहेन सहितस्तत्र यत्र रामः स्थितो निशि॥ ययौ सदर्शशायनं स्थंडिलं कुशसमास्तृतं॥ सीताभरणसंलग्नस्वर्णबिंदुभि
रंचितं॥ दुःखसंतप्तहृदयो भरतः पर्यदेवयत्॥ अहोतिसुकुमारी या सीता जनकनंदिनी॥ प्रासादे रत्नपर्यंके कोमल
स्तरणे शुभे॥ रामेण सहिता शेते सा कथं कुशविस्तरे॥ सीता रामेण सहिता दुःखेन मम दोषतः॥ धिग्जातोस्मि कैकेय
र्यां पापराशिसमानतः॥ मन्निमित्तमिदं क्लेशं रामस्य परमात्मनः॥ अहोतिसफलं जन्म लक्ष्मणस्य महात्मनः॥ राम

मेव सदान्वेति वनस्थमपि हृष्टधीः॥ अहं रामस्य दासा ये तेषां दासस्य किंकरः॥ यदि स्यां सफलं जन्म मम भूयान्न संशयः॥
नाजानासि यदि तत्कथयस्व ममाखिलं॥ यत्र तिष्ठति तत्राहं गच्छाम्यानेतुमंजसा॥ गुहस्तं सुहृदं मत्वा ज्ञात्वा सस्नेहमब्रवी
त्॥ गुह उवाच॥ देव त्वमेव धन्योसि यस्य ते भक्तिरीदृशी॥ रामे राजीवपत्राक्षे सीतया लक्ष्मणेन तथा॥ चित्रकूटाद्रिनिकटे
मंदाकिन्या विदूरतः॥ मुनीनामाश्रमपदे रामस्तिष्ठति सानुजः॥ जानक्या सहितो नंदन्सुखमास्ते किलप्रभुः॥ त
त्र गच्छामहे शीघ्रं गंगां तर्तुमिहार्हसि॥ इत्युक्त्वा त्वरितं गत्वा नावः पंचशतानि च॥ समानयत्स सैन्यं तर्तुं गंगां महानदीं
॥ स्वयमेवानिनायैकां राजनावं गुहस्तदा॥ आरोप्य भरतं तत्र शत्रुघ्नं राममातरं॥ वसिष्ठं च तथान्यान्त्र कैकेयीं
चान्यपोषितः॥ तीर्त्वा गंगां ययौ शीघ्रं भरद्वाजाश्रमं प्रति॥ दूरे स्थाप्य महत्सैन्यं भरतः सानुजो ययौ॥ आश्रमे मु
निमासीनं ज्वलंतमिव पावकं॥ दृष्ट्वा ननाम भरतः साष्टांगमतिभक्तितः॥ ज्ञात्वा दाशरथिं प्रीत्या पूजयामा
स मौनिराट्॥ पप्रच्छ कुशलं दृष्ट्वा जटावल्कलधारिणं॥ राज्यं प्रशासतस्तेघ किमुत हत्वैतादिकं॥ आगतो
सि किमर्थं त्वं विपिनं मुनिसेवितं॥ भरद्वाजवचः श्रुत्वा भरतः साश्रुलोचनः॥ सर्वं जानासि भगव
न्सर्वभूताशयस्थितः तथापि पृच्छसे किंचित्तदनुग्रह एव मे॥ कैकेय्या यत्कृतं कर्म रामराज्यविघात
नं॥ वनवासादिकं वापि नहि जानामि किंचन॥ भवत्पादयुगं मेद्य प्रमाणं मुनिसत्तम॥ इत्युक्त्वा पादयु

गुलं मुनेस्तु द्रष्टुमानसः ॥ ज्ञातुमर्हसि मां देव शुद्धो वा शुद्ध एव वा । मम राज्येन किं स्वामिन् रामे तिष्ठति रा
जनि ॥ किंकरोहं मुनिश्रेष्ठ रामचंद्रस्य शाश्वतः ॥ अतो गत्वा मुनिश्रेष्ठ रामस्य चरणांतिके ॥ पतित्वा रा
ज्यसंभारान्समर्प्यात्रैव राघवं ॥ अभिषेक्ष्ये वसिष्ठाद्यैः पौरजानपदैः सह ॥ नेष्ये अयोध्यां रामं तं दासोस्म्येव
तिनाच वचनं ॥ इत्युदीरितमाकर्ण्य भरतस्य वचो मुनिः ॥ आलिंग्य मूर्ध्न्यवघ्राय प्रशशंस सविस्मयः ॥ ॥
भरद्वाज उवाच ॥ वत्स ज्ञातं पुरैवैतद्भविष्यं ज्ञानचक्षुषा ॥ मा शुचस्त्वं परो भक्तः श्रीरामे लक्ष्मणादपि ॥
आतिथ्यं कर्तुमिच्छामि ससैन्यस्य तवानघ ॥ अद्य भुक्त्वा ससैन्यस्त्वं श्वो गंता रामसंनिधिं ॥ यथाज्ञापय
ति तवान् तथेति भरतोब्रवीत् ॥ भरद्वाजस्त्वपस्पृश्य मौनी होमगृहे स्थितः ॥ दध्यौ कामदुघां कामवर्षि
णीं ... मुनिः ॥ आगता स्मरणादेव ततः कामान्प्रसूयत ॥ असृजत्कामधुक् सर्वं यथाकाममनम्
लौकिकं ॥ भरतस्य ससैन्यस्य यथेष्टं च मनोरथं तथा ववर्ष सकलं तत्तास्ते सर्वे सैनिकाः ॥ वशिष्ठपू
जयित्वाग्रे शास्त्रदृष्टेन कर्मणा ॥ पश्चात्ससैन्यं भरतं तर्पयामास योगिराट् ॥ उषित्वा दिनमेकं ते प्राश्रमे सर्वे
संनिभे ॥ ततः प्रभाते विमले भरद्वाजं सहानुजः ॥ नमस्कृत्वाथ पप्रच्छ रामसंदर्शनोत्सुकः ॥ भरद्वाज कृतानु राम: ३४।
शो वसिष्ठाद्यैः सुमंत्रिभिः ॥ चित्रकूटमनुप्राप्य दूरे संस्थाप्य सैनिकान् ॥ रामसंदर्शनाकांक्षी प्रययौ भरतः स्व
यं ॥ शत्रुघ्नेन सुमंत्रेण गुहेन च परंतप ॥ तपस्विमंडलं सर्वं विचिन्वानोन्वयेषत ॥ उपदृष्टा रामभवनमपृच्छ

दृष्टिमंडलं ॥ भरत उवाच ॥ भो भो मुनिवराः सर्वे श्रूयतां वचनं मम ॥ रामस्त्वत्र समागत्य कुत्रास्ते सीतया सह ॥ ५ ॥ पर्णशाला
कृता तेन वा रण्ये प्रसेवते ॥ कुत्रास्ते सीतया सार्धं लक्ष्मणेन रघूत्तमः ॥ ऋषय ऊचुः ॥ श्रीरामश्चित्रगिरेः पश्चाद्गंगायाश्चोत्तरे तटे
॥ विविक्ते रामसदनं रम्यं काननमंडितं ॥ सफलैराम्रपनसैः कदलीखंडसंयुतं ॥ चंपकैः कोविदारैश्च पुन्नागैर्बकुलैस्तथा ॥
एवं दर्शितमालोक्य मुनिभिर्भरतो ययौ ॥ हर्षाद्ययौ रघुश्रेष्ठभवनं मंत्रिणा सह ॥ ददर्श दूरादतिभासुरं शुभं रामस्य गेहं मु
निवृंदसेवितं ॥ वृक्षाग्रसंलग्नसुवल्कलाजिनं रामाभिरामं भरतः सहानुजः ॥ ॥ ॥ इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे अयोध्याकांडेऽष्टमः सर्गः ॥ ॥ श्री ॥ सूत उवाच ॥ उपेत्य गत्वाश्रमपदसमीपं भरतो मुदा ॥ सीतारामपदै
र्युक्तं पवित्रमतिशोभनं ॥ स तत्र वज्रांकुशवारिजांचितं ध्वजादिचिह्नानि पदानि सर्वतः ॥ ददर्श रामस्य भुवोति मंगलान्य
चेष्टयत्पादरजःसु सानुजः ॥ अहो सुधन्योहममूनि रामपादारविंदांकितभूतलानि ॥ पश्यामि यत्पादरजो विमृग्यं ब्र
ह्मादिदेवैः श्रुतिभिश्च नित्यं ॥ इत्यद्भुतप्रेमरसाप्लुताशयो विगाह्य चेतो रघुनाथभावने ॥ आनंदजाश्रुस्नपित
शनैः शनैरवाप चाश्रमसंनिधिं हरेः ॥ स तत्र दृष्ट्वा रघुनाथमासीनं दूर्वादलश्यामलमायतेक्षणं ॥ जटा
किरीटं नववल्कलांबरं प्रसन्नवक्त्रं तरुणारुणद्युतिं ॥ विलोकयंतं जनकात्मजां मुदा सौमित्रिणा सेवितपादपं
कजं ॥ तदातिदुद्राव रघूत्तमं शुचा हर्षाच्च तत्पादयुगं त्वरा ग्रहीत् ॥ रामस्तमाकृष्य सुदीर्घबाहुर्दोर्भ्यां परिष्व

अध्या॰ रा॰
३८॥

ष्ट्वा सिषिंचुर्नेत्रजैः ॥ अंकैरथांके परिसन्निवेश्य पुनः पुनः संपरिष्वज्य जिघ्रंतु ॥ अथ मातास्तराः सर्वाः स
माजग्मुस्त्वरयान्विताः ॥ राघवं द्रष्टुकामास्ताः स्त्रपार्ता गौर्यथाकुलं ॥ रामस्तु मातरं वीक्ष्य द्रुतं दुःखात्
मग्राय पादयोः ॥ ववंदे सा सुतं पुत्रमालिंग्यातीव दुःखिता ॥ इतराश्च तथा नत्वा जननी रघुनंदनः ॥ त
तः समागतं दृष्ट्वा वसिष्ठं रघुनंदनः ॥ साष्टांगं प्रणिपत्याह धन्योऽस्मीति पुनः पुनः ॥ पश्चाहंसुपवेश्या
ह सर्वानेव रघूत्तमः ॥ श्रीरामउवाच ॥ पिता मे कुशली किं वा मां किमाहातिदुःखितः ॥ वसिष्ठस्तमुवा
चेदं पिता ते रघुनंदन ॥ वसिष्ठउवाच ॥ त्वद्वियोगाग्नितप्तात्मा त्वामेव परिचिंतयन् ॥ राम रामेति सीते
ति लक्ष्मणेति ममार ह ॥ श्रुत्वा तत्कर्णशूलाभं गुरोर्वचनमंजसा ॥ हा हतोऽस्मीति पतितो रुदन्रामः
सलक्ष्मणः ॥ ततोऽनुरुरुदुः सर्वा तरश्च तथापरे ॥ हा तात मां परित्यज्य क्व गतोसि घृणाकर ॥ अनाथोऽस्मि
महाबाहो मां को वा लालयेदितः ॥ सीता च लक्ष्मणश्चैव विलेपतुरतो भृशं ॥ वसिष्ठः शांतवचनैः शा
मयामास तां शुचं ॥ ततो मंदाकिनीं गत्वा स्नात्वा ते वीतकल्मषाः ॥ राज्ञे ददुर्जलं तत्र सर्वे ते जलकांक्षि
णे ॥ पिंडान्निर्वापयामास रामो लक्ष्मणसंयुतः ॥ इंगुदीफलपिण्याककरचितान्नमधुप्लुतान् ॥ राम॰ ३८॥

वयं यस्मात्पितरस्तेदन्नाः स्मृतिचोदिताः ॥ इति दुःखाश्रुपूर्णाक्षः पुनः स्नात्वा गृहं ययौ ॥ सर्वे रुदित्वा सुचिरं स्नात्वा
जग्मुस्तमाश्रमं ॥ तस्मिंस्तु दिवसे सर्वेऽप्युपवासं प्रचक्रिरे ॥ ततः परेद्युर्विमले स्नात्वा मंदाकिनीजले ॥ उपविष्टं समाग
त्य भरतो राममब्रवीत् ॥ भरतउवाच ॥ राम राम महाभाग स्वात्मानमभिषेचय ॥ राज्यं पालय पैत्रं ते ज्येष्ठस्त्वं मे पिता यथा
॥ क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनं ॥ इष्ट्वा यज्ञैर्बहुविधैः पुत्रानुत्पाद्य तंतवे ॥ राज्ये पुत्रं समारोप्य गमिष्य
सि ततो वनं ॥ इदानीं वनवासस्य कालो नैव प्रसीद मे ॥ मातुर्मे दुष्कृतं किंचित् स्मर्तुं नार्हसि पाहि नः ॥ इत्युक्त्वा च
रणौ भ्रातुः शिरस्याधाय भक्तितः ॥ रामस्य पुरतः साक्षाद्दंडवत्पतितो भुवि ॥ उत्थाप्य राघवः शीघ्रमारोप्यांकेति भ
क्तितः ॥ उवाच भरतं रामः स्नेहार्द्रनयनः शनैः ॥ श्रीरामउवाच ॥ शृणु वत्स प्रवक्ष्यामि त्वयोक्तं यत्तथैव च ॥
पि तु मामब्रवीत्तातो नव वर्षाणि पंच च ॥ उषित्वा दंडकारण्ये पुरं पश्चात्समाविश ॥ इदानीं भरतायेदं राज्यं दत्तं
मयाखिलं ॥ ततः पित्रैव सुव्यक्तं राज्यं दत्तं तवैव हि ॥ दंडकारण्यराज्यं मे दत्तं पित्रा तथैव च ॥ अतः पितुर्वचः का
र्यं आवाभ्यामतियत्नतः ॥ पितुर्वचनमुल्लंघ्य स्वतंत्रो यस्तु वर्तते ॥ स जीवन्नेव मृतको देहांते निरयं व्रजेत् ॥ तस्माद्रा
ज्यं प्रशाधि त्वं वयं दंडकपालकाः ॥ भरतस्त्वब्रवीद्रामं विनयेन समन्वितः ॥ भरतउवाच ॥ शृणु राम प्रवक्ष्यामि पथ्यं
यो मूढधीः पिता ॥ स्त्रीजितो भ्रांतहृदय उन्मत्तो यदि वक्ष्यति ॥ तत्सत्यमिति न ग्राह्यं भ्रांतवाक्यं यथा सुधीः ॥ श्रीरा

मउवाच॥ न स्त्रीजितः पिता ब्रूयान्न कामी नैव मूढधीः॥ पूर्वं प्रतिश्रुतं तस्य सत्यवादाद्ददौ भयात्॥ असत्याद्भीतिरधिका महतां॥
न्नरकादपि॥ करोमीत्यहमप्येतत्सत्यं तस्य प्रतिश्रुतं॥ कथं वाक्यमहं कुर्यामसत्यं राघवोऽपि सन्॥ इत्युदीरितमाकर्ण्य रामस्य
भरतोऽब्रवीत्॥ भरत उवाच॥ मयैव चीरवसनो वने वत्स्यामि सुव्रत॥ चतुर्दश समास्त्वं तु राज्यं कुरु यथासुखं॥ श्रीरा
मउवाच॥ पित्रा दत्तं तवैतद्राज्यं मह्यं वनं ददौ॥ व्यत्ययं यः प्रकुर्याच्च असत्यं पूर्ववस्थितं॥ भरत उवाच॥ अहमप्या
गमिष्यामि सेवे त्वां लक्ष्मणो यथा॥ नो चेत्प्रायोपवेशेन त्यजाम्येतत्कलेवरं॥ इत्येवं निश्चयं कृत्वा दर्भानास्तीर्य
वात्मवान्॥ मनसापि विनिश्चित्य प्राङ्मुखोपविवेश सः॥ भरतस्यापि निर्बंधं दृष्ट्वा रामोऽपि विस्मितः॥ नेत्रांत
संज्ञां गुरवे चकार रघुनंदनः॥ वसिष्ठ उवाच॥ एकांते भरतं नीत्वा वसिष्ठो ज्ञानिनां वरः॥ वत्स गुह्यं शृणुष्वेदं ममवा
क्यात्तु निश्चितं॥ रामो नारायणः साक्षाद्ब्रह्मणा याचितः पुरा॥ रावणस्य वधार्थाय जातो दशरथात्मजः॥ योगमाया
पि सीतेति जाता जनकनंदिनी॥ शेषोऽपि लक्ष्मणो जातो राममन्वेति सर्वदा॥ रावणं हंतुकामास्ते गमिष्यंति न संशयः॥ कैके
य्या वरदानादि यच्च निष्ठुरभाषणं॥ सर्वं दैवकृतं नो चेदेवं सा भाषते कथं॥ तस्मात्त्यजाग्रहं तात रामस्य विनिवर्तने॥ नि
वर्तस्व महासैन्यैर्मातृभिः सहितः पुरं॥ रावणं सकुलं हत्वा शीघ्रमेवागमिष्यति॥ इति श्रुत्वा गुरोर्वाक्यं भरतो विस्मयान्वितः॥

गत्वा समीपं रामस्य विस्मयोत्फुल्ललोचनः॥ भरतोऽथ ददर्शाग्रे रामं व्याप्तांडमंडलं॥ अतसीपुष्पसंकाशं पीतवाससमच्युत
तं॥ चतुर्भुजं शंखचक्रगदापंकजधारिणं॥ ब्रह्मत्या सहितं श्यामं सीतया योगमायया॥ दृष्ट्वैव विस्मयाविष्टो साष्टांगं प्रणि
पत्य च॥ भरत उवाच॥ पादुके देहि राजेंद्र राज्याय तव पूजिते॥ तयोः सेवां करोम्येव यावदागमनं तव॥ इत्युक्त्वा पादुके
दिव्ये योजयामास पादयोः॥ रामस्य ते ददौ रामो भरतायाति तत्कितः॥ गृहीत्वा पादुके दिव्ये भरतो रत्नभूषिते॥ रा ३४
मं पुनः परिक्रम्य प्रणनाम पुनः पुनः॥ भरतः पुनराहेदं भक्त्या गद्गदया गिरा॥ नवपंचसमांते तु प्रथमे दिवसे यदि
॥ नागमिष्यसि चेद्राम प्रवेक्ष्यामि महानलं॥ बाढमित्येव तं रामो भरतं संन्यवर्तयत्॥ ससैन्यः सवसिष्ठश्च शत्रुघ्न
सहितः सुधीः॥ मातृभिर्मंत्रिभिः सार्धं गमनायोपचक्रमे॥ कैकेय्युवाच॥ एकांते रामरामेति स्वनेत्रजलाकुला॥
प्रांजलिश्चाब्रवीदेवं तव राज्यविघातनं॥ कृतं मया दुष्टधिया मायया तेऽविमोहिता॥ क्षमस्व मम दौरात्म्यं क्षमासारा हि
साधवः॥ त्वं साक्षाद्विष्णुरव्यक्तः परमात्मा सनातनः॥ मायामानुषरूपेण मोहयस्यखिलं जगत्॥ त्वयैव प्रेरितो लो
कः कुरुते साध्वसाधु वा॥ त्वदधीनमिदं विश्वमस्वतंत्रं करोति किं॥ यथा कृत्रिमनर्तक्यो नृत्यंति कुहकेच्छया॥ त्वदधी
ना तथा माया नर्तकी बहुरूपिणी॥ त्वयैव प्रेरिताहं च देवकार्यं करिष्यता॥ पापिष्ठा पापमनसा कर्माचरमरिंदम॥
अद्य प्रतीतोऽसि मम देवानामप्यगोचरः॥ पाहि विश्वेश्वरानंत जगन्नाथ नमोऽस्तु ते॥ छिंधि स्नेहमयं पाशं पुत्रवित्तादिगो
चरं॥ त्वज्ज्ञानमनलखड्गेन त्वामहं शरणं गता॥ कैकेय्या वचनं श्रुत्वा रामः सस्मितमब्रवीत्॥ श्रीराम उवाच॥

अ॰ध्या॰रा॰
॥५०॥

यदात्थ मां महाभागे नानृतं सत्यमेव तत्॥ मयैव प्रेरिता वाणी तव वक्त्राद्विनिर्गता॥ देवकार्यार्थसिध्यर्थमत्र दो-
षः कुतस्तव॥ श्रीराम उवाच॥ गच्छ त्वं हृदि मां नित्यं भावयंती दिवानिशं॥ सर्वत्र विगतस्नेहा मद्भक्त्या मोक्ष्यसेऽचिरा-
त्॥ अहं सर्वत्र समदृक् द्वेष्यो वा प्रिय एव वा॥ नास्ति मे कल्पकस्येव भजतोनु भजाम्यहं॥ मन्मायामोहित-
धियो मन्वते मनुजाकृतिं॥ सुखदुःखाद्यनुगतं जानंति न तु तत्वतः॥ दिष्ट्या मद्गोचरं ज्ञानमुत्पन्नं ते भवापहं॥
स्मरंती तिष्ठ भवने लिप्यसे न च कर्मभिः॥ इति संबोधिता तेन कैकेयी सास्मितानना॥ कैकेय्युवाच॥
नमो रामाय शुद्धाय बुद्धाय परमेष्ठिने॥ सर्वज्ञायाप्यनंताय निर्गुणायाजिताय च॥ इत्युक्त्वा सा परि-
क्रम्य रामं सानंदविस्मया॥ प्रणम्य शतशो भूमौ ययौ गेहं मुदान्विता॥ भरतस्तु समादाय मातॄर्मंत्रि-
गुरुणा सह॥ अयोध्यामागमच्छीघ्रं रामेवानुचिंतयन्॥ पौरजानपदान्सर्वानयोध्यायामुदार-
धीः॥ स्थापयित्वा यथान्यायं नंदिग्रामं ययौ स्वयं॥ तत्र सिंहासने नित्यं पादुके स्थाप्य भक्तितः॥ पूज-
यित्वा यथा रामं गंधपुष्पाक्षतादिभिः॥ राजोपचारैरखिलैः प्रत्यहं नियतव्रतः॥ फलमूलाशनो दां-
तो जटावल्कलधारकः॥ अधःशायी ब्रह्मचारी शत्रुघ्नसहितस्तदा॥ राजकार्याणि सर्वाणि यावंति श्रीरामः
पृथिवीपतेः॥ तानि पादुकयोः सम्यङ्निवेदयति सर्वशः॥ गणयन्दिवसान्येव रामागमन- ॥५०॥

कांक्षया॥ रामार्पितमना साक्षाद्भरतस्तु मुनिर्यथा॥ रामस्तु चित्रकूटाद्रौ वसन्मुनिभिरादृतः॥ सीतया लक्ष्मणेनापि
कंचित्कालं मुदावसत्॥ नागरस्थसदा यांति रामदर्शनलालसा॥ चित्रकूटस्थितं ज्ञात्वा सीतया लक्ष्मणेन तं॥
दृष्ट्वा तज्जनसंबाधं रामस्त्यक्त्वा तु तं गिरिं॥ दंडकारण्यगमने कार्यमप्यनुचिंतयन्॥ अगात्सीतया भ्रात्रा ह्यत्रेराश्र-
ममुत्तमं॥ सर्वर्तुसुखसंवासं जनसंबाधवर्जितं॥ गत्वा मुनिमुपासीनं नासयंतं तपोधनं॥ दंडवत्प्रणिपत्याह रा-
मोहमस्मि पादयोः॥ श्रीराम उवाच॥ आज्ञादेवसमासेन महाकं सार्वहेतुकं॥ पितुराज्ञां पुरस्कृत्य दंडकानहमागतः॥ वन-
वासमिषेणापि धन्योहं दर्शनात्तव॥ श्रुत्वा रामस्य वचनं ज्ञात्वा रामं हरिं परं॥ अत्रिरुवाच॥ जगत्पूज्योसि तो राम
जगदानंदकारक॥ ममाश्रमपदं पुण्यं कर्तुं वा त्वं समागतः॥ इत्युक्त्वा पीठमानीय तस्योपरि रघूत्तमं॥ उपवेश्यासमो-
ने रम्ये अर्घ्यादिभिरलंकृते॥ पूजयामास विधिवत्तत्रापरमर्षिमुनिः॥ वन्यैः फलैः कृतातिथ्यं सपत्नीकं रघूत्तमं
॥ सीतां च लक्ष्मणं चैव पुनःपुनरथाब्रवीत्॥ अत्रिरुवाच॥ भार्या मे त्वनसूयाख्या तपस्यति विश्रुता॥ स्व अंत-
ती सुरा तथ धर्मज्ञा धर्मवत्सला॥ अंतःस्थिति तिष्ठति तां सीता पश्यत्वरिनिसूदन॥ तथेति जानकीं साह रामो राजीवलो-
चनः॥ गच्छ देवीं नमस्कृत्य आश्रमे ह्यत्र सुस्थिते॥ तथेति रामवचनं सीता गत्वा तथाकरोत्॥ दंडवत्पतितामग्रे
सीतां दृष्ट्वाति हृष्टधीः॥ अनुसूया समालिंग्य वत्से सीतेति सादरं॥ दिव्ये ददौ कुंडले द्वे निर्मिते विश्वकर्मणा॥ दुकू-

दुकूले देददौ तस्यै निर्मले तत्क्षिसंयुता ॥ अंगरागं च सीतायै ददौ दिव्यं शुभानना ॥ न त्यक्ष्यते अंगरागेण शोभा ना
त्याकमलानने ॥ पातिव्रत्यपुरस्कृत्य राममन्वेहि जानकी ॥ कुशली राघवो यातु त्वया सह पुनर्गृहं ॥ ततोऽयिल
पमेथान्याय रामं सीता समन्विता ॥ लक्ष्मणेन तदा रामं पुनः प्राह कृतांजलिः ॥ अत्रिरुवाच ॥ रामत्वमेव भुव
नानि विचार्य तेषां संरक्षणाय सुरमानुषतिर्यगादीन् देहान् बिभर्षि न च देहगुणैर्विलिप्तः त्वत्तो बिभेत्यखिल
मोहकरी च माया ॥ ॥छ॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकाण्डे नवमः स
र्गः ॥ ॥ इत्यध्यात्मरामचरिते अयोध्याकाण्डे नवमः सर्गः ॥ सप्तशतानि श्लोकाः पुराणमोक्षप्रारा पुसा
॥ अयनेन प्रियतां देवो भगवान् जानकीपतिः ॥ श्रीरामचंद्रः पूर्वधामस्थाः कुलदेवता ॥ ॥ अयोध्याकांडः समा
प्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीकुंदराजाय नमः ॥ अथ तत्र
दिनं स्थित्वा अत्रिणा तेन रघुनंदनः ॥ स्नात्वा मुनिं समामंत्र्य प्रयातुमुपचक्रमे ॥ श्रीराम उवाच ॥ मुने गच्छामहे सर्वे मुनिमं
ण्डलमंडितं ॥ विपिनं दंडकं यत्र त्वमाज्ञप्तुमिहार्हसि ॥ मार्गप्रदर्शनार्थाय शिष्यानाज्ञप्तुमर्हसि ॥ श्रुत्वा रामस्य वचनं अ श्रीराम ४२॥
हस्यात्रिर्महायशाः ॥ सर्वस्य मार्गदर्शी त्वं तव को मार्गदर्शकः ॥ तथापि दर्शयिष्यंति तव लोकानुसारिणः ॥ इति शिष्यान् स

मादिश्य स्वयं किंचिदनुजगात ॥ रामेण वारितः प्रीत्या अत्रिः स्वभवनं ययौ ॥ क्रोशमात्रं ततो गत्वा ददर्श महतीं नदीं ॥
अत्रेः शिष्याननुवाचेदं मोराजीवलोचनः ॥ श्रीराम उवाच ॥ न चास्ति तरणे कश्चिदुपायो विद्यते न वा ॥ शिष्या ऊ
चुः ॥ श्रीरामं विद्यते नौका सुदृढा जलतारणे ॥ तारयिष्यामहे युष्मान् वयमेव क्षणादिह ततो नावि समारोप्य
सीता राघवलक्ष्मणौ ॥ क्षणात्संतारयामासुर्नदीं मुनिकुमारकाः ॥ रामानुज्ञां ततः सर्वे जग्मुरत्रेरथाश्रमं ॥
ततोऽतिविपिनं घोरं झिल्लीसंकारनादितं ॥ नानामृगगणाकीर्णं सिंहव्याघ्रादिभीषणं ॥ राक्षसैर्घोररूपैश्च
सेवितं भीमदर्शनं ॥ प्रविश्य विपिनं घोरं रामो लक्ष्मणमब्रवीत् ॥ श्रीराम उवाच ॥ इतः परं प्रयत्नेन गंतव्यं स
बलेचने ॥ धनुर्गुणेन संयोज्य शरानपि करे धृत ॥ अग्रे यास्याम्यहं पश्चात्त्वमन्वेहि धनुर्धरः ॥ आवयोर्म
ध्यगा सीता मायेवात्मपरात्मनोः ॥ चक्षुश्चारय सर्वत्र दुष्टरक्षोभयं महत् ॥ विद्यते दंडकारण्ये श्रुतं पू
र्वमरिंदम ॥ इत्येवं तावुभौ गत्वा गम्यतुः सार्धयोजनं ॥ तत्रैका पुष्करिण्यासीत् कल्हारकुमुदोत्पलैः ॥ अंबु
जैः शीतलोदेन शोभमाना व्यदृश्यत ॥ तत्समीपमथो गत्वा तत्सलिलं शुभं ॥ ऊषुस्ते सलिलं पीत्वा वृक्ष
च्छायामुपाश्रिताः ॥ ददृशुस्ते दूरायां तं महासत्त्वं भयानकं ॥ करालदंष्ट्रवदनं भीषयंतं स्वगर्जितैः ॥
वामांसन्यस्तशूलाग्रग्रथितानेकमानुषं ॥ भक्षयंतं गजं व्याघ्रं महिषं वनगोचरं ॥ आरोपितधनुर्बा

रामो लक्ष्मणमब्रवीत्॥ श्रीराम उवाच॥ कोऽपि पुष्पान्तु महाकायो राक्षसो यमुपागतः॥ अर्थौत्यत्ति मुखं नो घनी
तोत्सयमावहत्॥ सज्जीकुरु धनुस्तिष्ठ मा भैर्जनकनंदिनी॥ इत्युक्त्वा बाणमादाय स्थितो राम इवाचलः॥ स दृष्ट्वा पुरमा
घं लक्ष्मणं जानकीं तदा॥ अट्टहासं ततः कृत्वा भीषयन्निदमब्रवीत्॥ राक्षस उवाच॥ कौ युवां चापतूणीरजवल्क
धारिणौ मुनी सयोषौ सुदुर्मदौ॥ सुंदरौ बत मे वक्त्रं प्रविष्टौ कवलोपमौ॥ किमर्थमागमुनिवेष[illegible]रो बालौ तौ स्त्रीयुतं
वने व्यालनिषेवितं॥ श्रुत्वा रक्षो वचो रामः स्मयमानो वाचेतं॥ श्रीराम उवाच॥ अहं रामस्त्वयं भ्राता लक्ष्मणो
म ममसुतः॥ एषा सीता मम प्राणवल्लभा वयमागताः॥ पित्रवाक्यं पुरस्कृत्य शरणार्थं न गोहरा॥ आज्ञात द्राम वचनं तत्कृत्वा
ट्टहासमथाकरोत्॥ व्यादाय वक्त्रं बाहुभ्यां शूलमादाय सत्वरः॥ राम किं मां न जानासि विराधं लोकविश्रुतं॥ मद्भयान्मुनयः
सर्वे वनं त्यक्त्वा गताः॥ यदि जीवितुमिच्छास्ति त्यक्त्वा सीतां निरायुधौ॥ पलायतं न चेच्छीघ्रं भक्षयामि युवामहं॥ इत्युक्त्वा राक्षसो
मायां तुमनिद्रुद्रुवे राम श्छित्वे द[illegible]ते श्वारेण च हसन्निव॥ ततः क्रोधपरीतात्मा व्यादाय विकटं
मुखं॥ रामायाद्रवद्रक्षः छित्त्वेद परिधावतः॥ पदद्वयं विराधस्य तद्भुतमिवाभवत्॥ ततः सर्पस्त्वास्येन ग्रसितुं राममापेत
रे ततोऽर्धचंद्राकारेण बाणेनास्य महाशिरः॥ चिछेद रुधिरौघेण पपात धरणीतले॥ ततः सीतां समालिंग्य प्रशशंस रघु
त्तमं॥ ततो दुंदुभयो नेदुर्दिवि देवगणेरिताः॥ ननृतुश्चाप्सरो हृष्टा जगुर्गंधर्वकिन्नराः॥ विराधकायादति सुंदराकृति

मानुं ४

विराध उवाच २

भ्राजमानोतिविमलांबरावृतः॥ प्रतप्तचामीकरचारुभूषणो व्यदृश्यत व्योमगतो रविर्यथा॥ विद्याधर उवाच॥ प्रणमस्य रामं प्रणतोस्मि हि प्र
हो णं त्वपवर्गपरमं घृणाकरं॥ प्रणम्य भूयः प्रणनाम दंडवत् प्रसन्नसर्वेन्द्रियहर्षितान्तर्धीः॥ श्रीराम राजीवदलायताक्ष विद्याधरो
र हं विमलप्रकाशः॥ दुर्वाससाकारणकोपमूर्तिना शप्तः पुरा सोऽद्य विमोचितस्त्वया॥ इतः परं त्वच्चरणारविंदयोः स्मृतिः सदा मेऽस्तु
तवोपशांतये॥ त्वन्नामकीर्तनं एव वाणी करोतु मे कर्णपुटं त्वदीयं॥ कथामृतं पातु करद्वयं ते पादारविंदार्चनमेव कुर्यात्॥ शि
रश्च ते पादयुगप्रणामं करोतु नित्यं भवदीयमेव॥ नमस्तुभ्यं भगवते विशुद्धज्ञानमूर्तये॥ आत्मारामाय रामाय सीतारामाय
वेधसे॥ प्रपन्नं पाहि मां राम यास्यामि त्वदनुज्ञया॥ देवलोकं रघुश्रेष्ठ मायामां मावृणोतु ते॥ इति विज्ञापितस्तेन प्रसन्नो रघुनंद
नः॥ ददौ वरं तदा प्रीतो विराधाय महामतिः॥ श्रीराम उवाच॥ प्रसन्नोस्मि महाबाहो वरं वरय सुव्रत॥ सर्वदास्यामि नद्दंते यते
मनसि वर्तते॥ विद्याधर उवाच॥ प्रैरत्नं हतं॥ शरभंगगतं दृष्ट्वा ऋषयो विस्मिता बभुः॥ ततो मुनिगणाः सर्वे दंडकारण्यवा
सिनः॥ आजग्मू राघवं द्रष्टुं शरभंगनिवेशनं॥ दृष्ट्वा मुनिसमूहं ते जानकीरामलक्ष्मणाः॥ प्रणेमुः सहसा तेभ्यो मायामानुषरू
पिणः॥ आशीर्भिरभिनंद्याथ राम सर्वहृदि स्थितं॥ ऊचुः प्रांजलयः सर्वे धनुर्बाणधरं हरिं॥ ऋषय ऊचुः॥ भूमेर्भारावतारणा
य जातोसि ब्रह्मणार्थितः॥ जानीमस्त्वां हरिं लक्ष्मीं जानकीं लक्ष्मणं तथा॥ शेषांशं शंखचक्रे द्वे भरतं सानुजं तथा॥ अतो राम वृष
णां त्वेदुःखं मोक्तुमिहार्हसि॥ आगच्छ रामो मुनिसेवितानि वनानि सप्रीतिं दृष्टुमात्मनः क्रमात्॥ इत्युक्तो मित्र आस्तु तदानं च॥

याचेहं रघुवीराद्य भक्तिमव्यभिचारिणीं॥ इदमेव महं याचे न त्वन्यध्द्वं

तदारस्यास्मा सुदृढा नविश्वति॥ इति विज्ञापितो रामः सीतांजलिपुटैर्विभुः॥ [illegible]जगाम मुनिभिः सार्धं द्रष्टुं मुनिवनानि सः॥ ददर्श
तत्र पतितान्यनेकानि शिरांसि सः॥ तानि सर्वेश्वरो सोवचनमब्रवीत्॥ श्रीरामउवाच॥ अस्थीनि केन मेतानि किमर्थं प
तितानि वै। किं न व्यापातितानीति प्रभुर्वै मुनयोऽब्रुवन्॥ मुनयऊचुः॥ श्रीराम ऋषिवर्याणां मस्तकानि निबोधय॥ राक्ष
सैर्भक्षितानां हि समाधिसंस्थितात्मनां॥ मयाहि प्रमुखा दैत्याः पश्यंतो विचरंति हि॥ श्रुत्वा वाक्यं मुनीनां स भयदैन्यसम
न्वितं॥ प्रतिज्ञामकरोद्रामो वधायाशेषरक्षसां॥ श्रीरामउवाच॥ अपि सर्वेऽपि मुनिगणा जानंतु मम भाषितं॥ सकलं
राक्षसकुलं नाशयिष्याम्यसंशयं॥ अथ अरण्यके मयः सुखिनः संतु दंडके॥ एतदर्थमहं जातो ब्रह्मणा प्रार्थितः पुरा॥ यो
गमायाप्रसंजाता एषा जनकनंदिनी॥ अनया लक्ष्मणेनापि करिष्ये राक्षसक्षयं॥ इत्युक्त्वा मुनिभिः सार्धं कंचित्कालमु
वास ह॥ पूज्यमानः सदा तत्र मुनिभिर्वनवासिभिः॥ जानक्या सहितो रामो याचेऽहं रघुराघव भक्तिं परव्यभिचारिणीं॥ हर
मेव महं याचे नातोऽन्यद्वरयाम्यहं॥ श्रीरामचंद्रउवाच॥ गच्छ विद्याधराशेषमायादोषगुणाजिताः॥ त्वया मद्दर्शना
त्सद्यो मुक्तोऽज्ञानबंधनात्॥ मद्भक्तिर्दुर्लभा लोके जायेन्मुदंति रायतः॥ अतस्त्वं भक्तिसंपन्नो परं याहि हि मत्पदं॥ या
रामेणारक्षसो निघ्नन्सुघोरं शापाद्विमुक्तो वरदानमेव॥ विद्याधरत्वं पुनरेव लब्धुं रामं प्रणम्य [illegible] तिजरोखिलाघाः
॥ ॥६०॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अरण्यकांडे प्रथमः सर्गः॥ ॥१॥ ॥सूतउव
च॥ विराधे स्वर्गते रामो लक्ष्मणेन च सीतया॥ जगाम शरभंगस्य वनं सर्वसुखावहं॥१॥ शरभंगस्ततो दृष्ट्वा रामं सौमित्रि

णा सह॥ उपायांतं सीतया सार्धं संभ्रमाद्दुःखितः सुधीः॥ उपगम्य समुत्संपूज्य विष्टरे समुपवेशयत्॥ आतिथ्यमक
रोत्तेषां कंदमूलफलादिभिः॥ प्रीत्या हि शरभंगोपि रामं भक्तपरायणं॥ शरभंगउवाच॥ बहुकालमिहैवासे तपसे
कृतनिश्चयः॥ तव संदर्शनाकांक्षी राम त्वं परमेश्वर॥ उपपन्नं तपसा सिद्धिं प्रत्युता बहुविघ्नैः॥ तत्सर्वं तव दास्या
मि ततो मुक्तिं व्रजाम्यहं॥ समर्प्य रामस्य महत्सुपुण्यफलं विरक्तः शरभंगयोगी॥ चितिं समारोहयदप्रमेयं राम
ससीतं सहसा प्रणम्य॥ ध्यायेच्चिरं राममबेधहस्तं दूर्वादलश्यामलमंबुजाक्षं॥ चीरांबरं स्निग्धजटाकलापं
सीतासहायं सहलक्ष्मणं च॥ को वा दयालुः स्मृतकामधेनुरन्यो जगत्यां रघुनायकाद्धो॥ स्मृतो मया नित्यम
नन्यभाजा ज्ञात्वा मृतिं मे स्वयमेव यातः॥ पश्यत्वारानिमेवेशो रामो दाशरथिः प्रभुः॥ दग्ध्वा स्वदेहं गच्छामि
ब्रह्मलोकमकल्मषः॥ अयोध्याधिपतिर्मेऽस्तु हृदये राघवः सदा॥ यद्वामांकस्थिता सीता मेघस्येव तडिद्भृत
वृति रामं चिरं ध्यात्वा दग्ध्वा वपुरतः स्थितः॥ प्रउवाच्य सहसा वह्निं दग्ध्वा पंचात्मकं वपुः॥ दिव्यदेहधरः सोऽसाद्य
यौ लोकपतेः पदं॥ दिव्यं विमानमारुह्य यद्दिव्यनारिनरैर्वृतं॥ चामरैर्वीज्यमाने विस्तुतैः समावृते॥ विद्याध
रैः स्तूयमाने दिव्यपुष्पैः [illegible]
[illegible]

ध्या·रा·
४५॥

राममागतमाकर्ण्य सुतीक्ष्णः स्वयमागतः॥ अगस्त्यशिष्यो रामस्य मंत्रोपासनतत्परः॥ विधिवत्पूजयामास भ-
क्त्युत्फुल्लविलोचनः॥ सुतीक्ष्ण उवाच॥ त्वन्मंत्रजाप्यहमनंतगुणाप्रमेय सीतापते शिवविरिंचिसमाश्रितांघ्रे
॥ संसारसिंधुतरणामलपोतपादो रामाभिराम सततं तव दासदासः॥ मामद्य सर्वजगतामविगोचरस्त्वं त्वन्मा-
यया सुतकलत्रगृहांधकूपे॥ मग्नं निरीक्ष्य मलपुद्गलपिंडमोहपाशानुबद्धहृदयं स्वयमागतोसि
त्वं सर्वभूतहृदयेषु कृतालयोपि त्वन्मंत्रजाप्यविमुखेषु तनोषि मायां॥ त्वन्मंत्रसाधनपरेष्वपया-
ति माया सेवानुरूपफलदोसि यथा महीपः॥ विश्वस्य सृष्टिलयसंस्थितिहेतुरेकस्त्वं मायया त्रिगुणया वि-
धिरीशविष्णुः॥ भासीश मोहितधियां विविधाकृतिस्त्वं यद्वद्रविः सलिलपात्रगतो ह्यनेकः॥ प्रत्यक्षतोद्य भव-
तश्चरणारविंदं पश्यामि राम तमसः परतः स्थितस्य॥ दृष्टिस्त्वमसतां नहि गोचरोसि त्वन्मंत्रपूतहृदयेषु सदा
प्रसन्नः॥ पश्यामि राम तव रूपमरूपिणोपि मायाविडंबनकृतं सुमनुष्यवेषं॥ कंदर्पकोटिसुभगं कमनीय-
चापबाणं दयार्द्रहृदयं स्मितचारुवक्त्रं॥ सीतासमेतमजिनांबरमप्रधृष्यं सौमित्रिणा नियतसेवितपादपद्मं
नीलोत्पलद्युतिमनंतगुणं प्रशांतं मद्भागधेयमनिशं प्रणमामि रामं॥ जानंतु राम तव रूपमशेषदेशकालो
द्युपाधिरहितं घनचित्प्रकाशं॥ प्रत्यक्षतोद्य मम गोचरमेतदेव रूपं विभातु हृदये न परं विकांक्षे॥ इत्येवं स्तु-

वतस्तस्य रामः सस्मितमब्रवीत्॥ श्रीराम उवाच॥ मुने जानामि ते चित्तं निर्मलं मदुपासनात्॥ अतोह-
मागतो द्रष्टुं मदृते नान्यसाधनं॥ मन्मंत्रोपासका लोके मामेव शरणं गताः॥ निरपेक्षा नान्यगतास्तेषां दृ-
श्योहमन्वहं॥ स्तोत्रमेतत्पठेद्यस्तु त्वत्कृतं मत्प्रियं सदा॥ सद्भक्तिर्मे भवेत्तस्य ज्ञानं च विमलं भवेत्
त्वं ममोपासनादेव विमुक्तोसीह सर्वतः॥ देहांते मम सायुज्यं लप्स्यते नात्र संशयः॥ गुरुं ते द्रष्टुमिच्छामि
अगस्त्यं मुनिनायकं॥ किंचित्कालं तत्र वस्तुं मनो मे त्वरतेत्यलं॥ सुतीक्ष्णोपि तथेत्याह श्वो गमिष्यसि राघव
॥ अहमप्यागमिष्यामि चिराद्दृष्टो महामुनिः॥ अथ प्रभाते मुनिना रामः ससीतः सहलक्ष्मणे-
ना॥ अगस्त्यसंभाषणलोलमानसः शनैरगस्त्यानुजमंदिरं ययौ॥ ॥ इति श्रीमदध्यात्मरामायणे उमा-
महेश्वरसंवादे आरण्यकांडे द्वितीयः सर्गः॥ ॥२॥ ॥ सूत उवाच॥ अथ रामस्तु तीक्ष्णेन जानकी-
लक्ष्मणेन च॥ अगस्त्यानुजवेश्माथ हे समपद्यत॥ तेन संपूजितस्तत्र भुक्त्वा मूलफलानि [illegible]॥ परेद्युः प्रात-
रुत्थाय जग्मुस्तेऽगस्त्यमंडलं॥ सर्वर्तुफलपुष्पाढ्यं नानामृगगणैर्युतं॥ पक्षिसंघैश्च विविधैः नादितं नंदनो-
पमं॥ ब्रह्मर्षिभिस्तथा देवऋषिभिः सेवितं शुभं॥ सर्वतोऽ[illegible] ब्रह्मलोकमिवापरं॥ बहिरेवाश्रम-
स्याधः स्थित्वा रामोऽब्रवीन्मुनिं॥ श्रीराम उवाच॥ सुतीक्ष्ण गच्छ शीघ्रं त्वमागतं मां निवेदय॥ अगस्त्य-
मुनिवर्याय सीतया लक्ष्मणेन च॥ महाप्रसाद इत्युक्त्वा सुतीक्ष्णः प्रययौ गुरोः॥ आश्रमं त्वरया तत्र कृ-

संघसमावृतं॥ उपविष्टं रामचन्द्रं विशेषेण समावृतं॥ व्याख्यांतं राममंत्रार्थं शिष्येभ्यश्चातिभक्तितः॥ दृष्ट्वागस्त्यं मुनि
श्रेष्ठं सुतीक्ष्णः प्रययौ मुनिः॥ दंडवत्प्रणिपत्याह विनयावनतः सुधीः॥ सुतीक्ष्ण उवाच॥ रामो दाशरथिर्ब्रह्मन्सीत
या लक्ष्मणेन च॥ आगतो दर्शनार्थं ते बहिस्तिष्ठति सांजलिः॥ अगस्त्य उवाच॥ शीघ्रमानय भद्रं ते रामं मम हृदि स्थितं॥ त
मेव ध्यायमानोहं कांक्षमाणोत्र संस्थितः॥ इत्युक्तो विनयं कृत्वा मुनिभिः सहितो द्रुतं॥ अगस्त्यस्त्वरयागत्वा रामं प्र
त्याब्रवीत्॥ अगस्त्य उवाच॥ आगच्छ राम भद्रं ते दिष्ट्या ते प्रियमागमः॥ प्रियोतिथिर्मम प्राप्तोद्य मे सफलं दिनं॥ रामोपि
मुनिमायांतं दृष्ट्वा हर्षसमाकुलः॥ सीतया लक्ष्मणेनापि दंडवत्पतितो भुवि॥ द्रुतमुत्थाप्य मुनिराट् राममालिंग्य भक्तितः॥ तद्गा
त्रस्पर्शजाह्लाद स्रवन्नेत्रजलाकुलः॥ गृहीत्वा करमेकेन करेण रघुनंदनं॥ जगाम स्वाश्रमं हृष्टो मनसा मुनिपुंगवः॥
सुखोपविष्टं संपूज्य पूजया बहुविस्तरं॥ भोजयित्वा यथान्यायं भक्ष्यैर्वन्यैरनेकधा॥ सुखोपविष्टमेकांते रामं शशिनिभा
ननं॥ कृतांजलिरुवाचेदमगस्त्यो भगवानृषिः॥ अगस्त्य उवाच॥ त्वदागमनमेवाहं प्रतीक्षन्समवस्थितः॥ यदा क्षीरसमु
द्रांते ब्रह्मणा प्रार्थितः पुरा॥ भूमेर्भारापनुत्त्यर्थं रावणस्य वधाय च॥ तदादि दर्शनाकांक्षी तव राम तपश्चरन्॥ वसामि मुनिभिः सा
र्धं त्वामेव परिचिंतयन्॥ सृष्टेः प्रागेक एवासं निर्विकल्पोनुपाधिकः॥ तदाश्रया त्वद्विषया माया ते शक्तिरुच्यते॥
त्वामेव निर्गुणं शक्तिरावृणोति यदा तदा॥ अव्याकृतमिति प्राहुर्वेदांतपरिनिष्ठिताः॥ मूलप्रकृतिरित्येके प्राहुर्मायेति के
चन॥ अविद्या संसृतिर्बंधः इत्यादि बहुधोच्यते॥ त्वया संक्षोभ्यमाणा सा महत्तत्त्वं प्रसूयते॥ महत्तत्त्वादहंकारस्त्वत्संक्षो

त्तेऽविद्यावशवर्तिनोप्रवृत्तिमार्गनि

नं

लोरी
:~~~~

तात्तत्त्व॥ अहंकारो महत्तत्त्वसंवृतस्त्रिविधोभवत्॥ सात्त्विको राजसश्चैव तामसश्चेति भण्यते॥ तामसात्सूक्ष्मतन्मात्रा
संभूतान्यतः परं॥ स्थूलानि क्रमशो राम क्रमोत्तरगुणानि हि॥ राजसानींद्रियाण्येव सात्त्विका देवता मनः॥ तेभ्योभवत्सूत्र
रूपं लिंगं सर्वगतं महत्॥ विराट् पुरुषात्सर्वं जगत्स्थावरजंगमं॥ देवतिर्यङ्मनुष्याश्च कालकर्मक्रमेण तु॥ त्वं रजोगुणतो
ब्रह्मा जगतः सर्गकारणं॥ सत्त्वाद्विष्णुस्त्वमेवास्य पालकः सद्भिरुच्यते॥ लये रुद्रस्त्वमेवासि त्वन्मायागुणभेदतः॥ जाग्रत्स्व
प्नसुषुप्त्याख्या वृत्तयो बुद्धिजा गुणैः॥ तासां विलक्षणो राम त्वं साक्षी चिन्मयोव्ययः॥ सृष्टिलीलां यदा कर्तुमीहसे रघुनंदन॥ अं
गीकरोषि मायां त्वं तदा वै गुणवानिव॥ राम माया द्विधा भाति विद्याविद्येति ते सदा॥ प्रवृत्तिमार्गनिरता अविद्यावशवर्तिनः॥ नि
वृत्तिमार्गनिरता वेदांतार्थविचारकाः॥ त्वद्भक्तिनिरता ये च ते वै विद्यामयाः स्मृताः॥ अविद्यावशगा ये तु नित्यं संसारिणश्च ते॥ वि
द्याभ्यासरता ये तु नित्यमुक्तास्त एव हि॥ लोके त्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्च ये॥ विद्या प्रादुर्भवेत्तेषां नेतरेषां कदाचन॥ अ
तस्त्वद्भक्तिसंपन्ना मुक्ता एव न संशयः॥ त्वद्भक्त्यमृतहीनानां मोक्षः स्वप्नेपि नो भवेत्॥ किं राम बहुनोक्तेन सारं किंचिद्ब्रवी
मि ते॥ साधुसंगतिरेवात्र मोक्षहेतुरुदाहृता॥ साधवः समचित्ता ये निःस्पृहा विगतैषणाः॥ दांताः प्रशांतास्त्वद्भक्ता नि
वृत्ताखिलकामनाः॥ इष्टप्राप्तिविपत्त्योश्च समाः संगविवर्जिताः॥ संन्यस्ताखिलकर्माणः सर्वदा ब्रह्मतत्पराः॥ यमादिगुणसं

बेत ४

अध्या.रा०
अध्या.रा.
४६

पन्नाः संतु शापेन केनचित्॥ सत्संगो मे भवेद्यर्हि त्वत्कथाश्रवणे रतिः॥ समुदेति ततो भक्तिस्त्वयि राम सनातने॥ त्वद्भक्त्यामुप
संपन्नायां विज्ञानं विपुलं स्फुटं॥ उदेति मुक्तिमार्गोयमाद्यश्चतुरसेवितः॥ तस्माद्राघव सद्भक्तिस्त्वयि मे प्रेमलक्षणा
॥ सदा भूयाद्धरे संगस्त्वद्भक्तेषु विशेषतः॥ अद्य मे सफलं जन्म भवत्संदर्शनाद्धरे॥ एते वे क्रतवः सीते बभूवुः सफला
प्रभो॥ दीर्घकालं मया तप्तमनन्यमतिना तपः॥ तस्यैतत्तपसो राम फलं तव पदर्शनं॥ सदा मे सीतया सार्द्धं हृदये वस
राघव॥ गच्छतस्तिष्ठतो वापि स्मृतिः स्यान्मे सदा त्वयि॥ इति स्तुत्वा रमानाथं अगस्त्यो मुनिसत्तम॥ ददौ चापं महेंद्रेण रामा
र्थे चितं पुरा॥ अक्षय्यौ बाणतूणीरौ खड्गं रत्नविभूषितं॥ जहि राघव भूभारभूतं राक्षसमंडलं॥ यदर्थमवतीर्णोसि मा
यया मनुजाकृतिः॥ इतो योजनयुग्मे तु पुण्यकाननमंडितः॥ अस्ति पंचवटी नाम्ना आश्रमो गौतमीतटे॥ नेतव्यस्तत्र
ते कालः शेषो रघुकुलोद्वह॥ तत्र वहु कार्याणि देवानां कुरु सत्पते॥ श्रुत्वा तदागस्त्यसुभाषितं तोत्रं चलत्वा श्रममि
तीर्विभुः॥ मुनिं समाभाष्य मुदान्वितो ययौ प्रदर्शितेमार्गमशेषदृग्घरिः॥ ॥छ॥ ॥ इति श्रीमदध्यात्मरामायणे उ
मामहेश्वरसंवादे आरण्यकांडे तृतीयः सर्गः॥ ॥ॐ॥ ॥ सूत उवाच॥ मार्गे व्रजन्ददर्शाथ शैलशृंगमिवापरं
वृक्षं जटायुषं रामः किमेतदिति विस्मितः॥ धनुरानय सौमित्रे राक्षसो मे पुरः स्थितः॥ इत्याह लक्ष्मणं रामो ह[…]व्यासप

वनः४ नि

षित्तसकः॥ तच्छ्रुत्वा रामवचनं गृध्रो राक्षसपीडितः॥ वधार्होहं न ते राम पितुस्तेहं प्रियः सखा॥ जटायुर्नाम भद्रं ते गृध्रोहं प्रियकृत्वे
त्तव॥ पंचवट्यामहं वत्स्यामि तवैव प्रियकाम्यया॥ मृगयायां कदाचित्त्वं याते लक्ष्मणे पिच॥ सीता जनककन्या मे रक्षितव्या
वचनं प्रयत्नतः॥ श्रुत्वा तद्गृध्रवर्यं रामः सस्नेहमब्रवीत्॥ साधु गृध्र महाराज तथैव कुरु मे प्रियं॥ अत्रैव मे समीपस्थो नातिदूरे
नैव सर्वं कृत्वा संस्तुतमालिंग्य ययौ पंचवटीं प्रभुः॥ लक्ष्मणेन सह भ्रात्रा सीतया रघुनंदनः॥ गत्वा तु गौतमीतीरं पंचवट्यां सुवि
स्तरं॥ मंदिरं कारयामास लक्ष्मणेन सुबुद्धिना॥ तत्र ते न्यवसन् सर्वे गंगाया उत्तरे तटे॥ कंदवनसोम्यादिकल्पस्वर्गसमाकुले
विविक्ते जनसंबाधवर्जिते निरुपद्रवे॥ विनोदयन् जानकीं लक्ष्मणेन विनयस्थिता॥ अध्यवात्सुखं रामो देवलोक इवाम
रः॥ कंदमूलफलादीनि लक्ष्मणेन दिने दिने॥ आनीय प्रददौ रामसेवातत्परमानसः॥ धनुर्बाणकरो नित्यं रात्रौ जागृति
तः॥ स्नानं कुर्वन्नुदिनं त्रयस्ते गौतमीजले॥ उभयोर्मध्यगा सीता कुरुते वै गमागमौ॥ आनीय सलिलं नित्यं लक्ष्मण
प्रीतमानसः॥ सेवते हरहः प्रीत्या एवमासन्सुखं त्रयः॥ एकदा लक्ष्मणो राममेकांते समुपस्थितं॥ विनयावनतो भूत्वा
पप्रच्छ परमेश्वरं॥ लक्ष्मण उवाच॥ भगवन् श्रोतुमिच्छामि मोक्षस्यैकांतिकीं गतिं॥ त्वत्तः कमलपत्राक्ष संक्षेपाद्वक्तुमर्हसि
ज्ञानं विज्ञानसहितं भक्तिवैराग्यबृंहितं॥ आचक्ष्व मे रघुश्रेष्ठ वक्ता नान्योस्ति भूतले॥ श्रीराम उवाच॥ शृणु वक्ष्या

प्रितेवसगुह्यात्गुह्यतरंपरं।।यद्विज्ञायनरोजह्यात्सद्योवैकल्पितंभ्रमं।।३पादौमायास्वरूपंतेवक्ष्यामितदनंतरं।।ज्ञानं
साधनंपश्चात्तोनौविज्ञानसंयुतं।।ज्ञेयंचपरमात्मानंयज्ज्ञात्वामुच्यतेभयात्।।अनात्मनिशरीरादावात्मबुद्धिस्तुया
भवेत्।।सैवमायातयैवासौसंसारःपरिकल्पते।।रूपेद्वेनिश्चितेपूर्वंमायायाःकुलनंदन।।विक्षेपावरणेतत्रप्रथमंक
ल्प्यतेजगत्।।लिंगाद्यंब्रह्मपर्यंतंस्थूलसूक्ष्मविभेदतः।।३परंसर्वविज्ञानरूपमावृत्यतिष्ठति।।मायायाकल्पितं
विश्वंपरमात्मनिकेवले।।रज्जौभुजंगवद्भ्रांत्याविचारेनास्तिकिंचन।।श्रूयतेदृश्यतेयद्यत्स्मर्यतेवानरैःसदा।।असं
देवहितत्सर्वंयथास्वप्नमनोरथौ।।देहएवहिसंसारवृक्षमूलंदृढंस्मृतं।।तन्मूलःपुत्रदारादिबंधःकोन्यथात्म
नः।।देहस्तुस्थूलभूतानांपंचतन्मात्रपंचकं।।३अहंकारश्चबुद्धिश्चइंद्रियाणितथादश।।चिदाभासोमनश्चैव
मूलप्रकृतिरेवच।।एतत्क्षेत्रमितिज्ञेयंदेहमित्यभिधीयते।।एतैर्विलक्षणोजीवःपरमात्मानिरामयः।।त
स्यजीवस्यविज्ञानेसाधनान्यपिमेशृणु।।जीवश्चपरमात्माचपर्यायोनात्रभेदधीः।।मानाभावस्तथादंभ
हिंसादिपरिवर्जनं।।पराक्षेपादिसहनंसर्वत्रावक्रतातथा।।मनोवाक्कायसद्भक्त्यासद्गुरोःपरिसेवनं।।बाह्या
भ्यंतरसंशुद्धिःस्थिरतासत्क्रियादिषु।।मनोवाक्कायदंडश्चविषयेषुनिरीहता।।निरहंकारताजन्मजराद्यालोच

८२
९४

नंतथा।।असक्तिःस्नेहशून्यत्वंपुत्रदारधनादिषु।।इष्टानिष्टागमेनित्यंचित्तस्यसमतातथा।।मयिसर्वात्मकेरामेह्यनन्यविषया
मतिः।।जनसंबाधरहितशुद्धदेशनिषेवणं।।प्राकृतैर्जनसंघैश्चह्यरतिःसर्वदाभवेत्।।आत्मज्ञानेसदोद्योगोवेदांतार्थावलो
कनं।।उक्तैरेतैर्भवेज्ज्ञानंविपरीतैर्विपर्ययः।।बुद्धिप्राणमनोदेहाहंकृतिभ्योविलक्षणः।।चिदात्माहंनित्यशुद्धोबुद्धएवेतिनिश्चयं
४न येनज्ञानेनसंवेत्तितज्ज्ञानंनिश्चितंचमे।।विज्ञानंचतदेवैतत्साक्षादनुभवेद्यथा।।आत्मासर्वत्रपूर्णःस्याच्चिदानंदात्मकोऽव्ययः
।।बुद्ध्याद्युपाधिरहितःपरिणामादिवर्जितः।।स्वप्रकाशेनदेहादीन्भासयन्ननयावृतः।।एकएवाद्वितीयश्चसत्यज्ञानादिलक्षण
ः।।असंगःस्वप्रभोद्रष्टाविज्ञानेनावगम्यते।।आचार्यशास्त्रोपदेशादैक्यज्ञानंयदाभवेत्।।आत्मनोजीवपरयोर्मूलाविद्या
तदैवहि।।लीयतेकार्यकरणैःसहैवपरमात्मनि।।सावस्थामुक्तिरित्युक्ताह्युपचारोयमात्मनि।।इदंमोक्षस्वरूपं
तेकथितंरघुनंदन।।ज्ञानविज्ञानवैराग्यसहितंमेपरात्मना।।किंत्वेतद्दुर्लभंमन्येमद्भक्तिविमुखात्मनां।।चक्षुष्मतां
च मपियथारात्रौसम्यङ्नदृश्यते।।पदंदीपसमेतानांदृश्यतेसम्यगेवहि।।एवंमद्भक्तियुक्तानामात्मासम्यक्प्रकाशते
मद्भक्तेःकारणंकिंचिद्वक्ष्यामिशृणुतत्वतः।।मद्भक्तसंगोमत्सेवामद्भक्तानांनिरंतरं।।एकादश्युपवासादिममपर्वानु
मोदनं।।मत्कथाश्रवणेपाठेव्याख्यानेसर्वदारतिः।।मत्पूजापरिनिष्ठाचममनामानुकीर्तनं।।एवंसततयुक्तानांभ
क्तिरव्यभिचारिणी।।मयिसंजायतेनित्यंततःकिमवशिष्यते।।अतोमद्भक्तियुक्तस्यज्ञानंविज्ञानमेवच।।वै
राग्यंचभवेच्छीघ्रंततोमुक्तिमवाप्नुयात्।।कथितंसर्वमेतत्तेतवप्रश्नानुसारतः।।अस्मिन्मनःसमाधाययस्तिष्ठेत्सतुमु

नि२

त्रितापं॥ नवक्तव्यमिदं यत्नान्मद्भक्तिविमुखाद्बहिः॥ मद्भक्तायप्रदातव्यमाहूयापिप्रयत्नतः॥ य इदं तु पठेन्नित्यं श्रद्धाभक्तिसमंत
तः॥ अज्ञानजनितं ध्वांतं विधूय परिमुच्यते॥ भक्तानां मम योगिनां सुविमलस्वांतातिशांतात्मनां मत्सेवाभिरतात्मनां
च विमलज्ञानात्मनां सर्वदा॥ संगं यः कुरुते सदोद्यतमतिस्तस्यैव नान्यैर्नधीमि तस्य स्वस्य करे स्थितोहमनिशं दृश्यो भवे
नान्यथा॥ ॥ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे चतुर्थः सर्गः॥ ॥ सूत उवाच॥ ॥
तस्मिन्काले महारण्ये राक्षसी कामरूपिणी॥ विचचार महासत्त्वा जनस्थाननिवासिनी॥ एकदा गौतमीतीरे पंचवट्याः
समीपतः॥ पद्मवज्रांकुशांकानि पदानि जगतीपतेः॥ दृष्ट्वा कामपरीतात्मा पदसौंदर्यमोहिता॥ पश्यंती सा शनैरायाद्राघव
स्य निवेशनं॥ तत्र दृष्ट्वा रमानाथं सीतया सह संस्थितं॥ कंदर्पसदृशं रामं दृष्ट्वा कामविमोहिता॥ राक्षस्युवाच॥ कस्यत्वं
कुत आयातः आश्रमः कस्य वा ऽपयौ॥ मुक्तोजयवल्कलधृक् साध्वी किं तेन मे वद॥ श्रीराम उवाच॥ ॥ को त्वं कस्य सुभाचारे
किं त्वयात्र समीहितं॥ किमर्थमागतासि त्वं वद कल्याणि तत्त्वतः॥ सूर्पणखा उवाच॥ ॥ अहं सूर्पणखा नाम राक्षसी का
मरूपिणी॥ भगिनी राक्षसेंद्रस्य रावणस्य महात्मनः॥ खरेण सहिता भ्रात्रा वसाम्यत्रैव सद्वने॥ राजा दत्तं च मे सर्वं मुनिभ
क्ष्या वसाम्यहं॥ त्वां तु वेदितुमिच्छामि वद ते वदतां वरः॥ ॥ श्रीराम उवाच॥ अहं दाशरथी रामो हमयोध्याधिपतेः सु
तः॥ एषा मे सुंदरी भार्या सीता जनकनंदिनी॥ स तु भ्राता कनीयान्मे लक्ष्मणोतीव सुंदरः॥ किं कृत्यं ते मया ब्रूहि कार्यं भुव
सुंदरि॥ इति रामवचः श्रुत्वा कामार्ता साब्रवीदिदं॥ सूर्पणखा उवाच॥ एहि राम मया सार्धं रमस्व गिरिकानने॥ कामार्तां हि

न शक्नोमि त्यक्तुं त्वां कमलेक्षण॥ रामः सीतां कटाक्षेण पश्यन्स्मितमब्रवीत्॥ भार्या ममैषा कल्याणि विद्यते ह्यनपायिनि
॥ त्वं तु सापत्न्यदुःखेन कथं स्थास्यसि सुंदरि॥ बहिरास्ते मम भ्राता लक्ष्मणोतीव सुंदरः॥ तवानुरूपो भविता पति
स्तेनैव संचर॥ इत्युक्ता सा ततो गत्वा लक्ष्मणं प्रत्यभाषत॥ न वीतस्ति ह्रुति ते भ्राता तेनाहं प्रेषिता विभो॥ भार्या भव मे
ते वीर पतिर्मे भव सुंदर॥ भ्रातुराज्ञां पुरस्कृत्य संगच्छ त्वं ममाचिरं॥ इत्याह राक्षसी घोरा लक्ष्मणं काममोहिता॥ लक्ष्मण
उवाच॥ अहं तु साध्वि भृत्यः स्यामि दासोहं तस्य धीमतः॥ त्वमे भार्या यदा भद्रे तदा दासी भविष्यसि॥ दासी भविष्यसि त्वं तु त
तो दुःखतरं नु किं॥ तमेव गच्छ भद्रं ते स तु राजाखिलेश्वर॥ तच्छ्रुत्वा पुनरेवागाद्राघवं दुष्टमानसा॥ क्रोधाद्रामं किमर्थं मां
भ्रामयस्यनवस्थितः॥ इदानीमेव तां सीतां भक्षयामि तवाग्रजः॥ इत्युक्त्वा विकटाकारा जानकीमनुधावति॥ श्रीराम
उवाच॥ लक्ष्मण गच्छ वै शीघ्रं खड्गेन संयुतः॥ ततो रामाज्ञया खड्गमादाय परिगृह्य तां॥ चिच्छेद कर्णौ नासां च
लक्ष्मणो लघुविक्रमः॥ ततो घोरध्वनिं कृत्वा रुधिराक्तवपुर्द्रुतं॥ क्रंदमाना पपाताग्रे खरस्य परुषाक्षरा॥ तदुवाच
लख्यापि स्वकुटः शिरोपतत्॥ खर उवाच॥ किमेतदिति निर्भर्त्स्य खरः खरतरस्वनः॥ केनैवं कारितासि त्वं मृत्योर्व
शवर्तिना॥ वद मे तं वधिष्यामि कालेनान्यमपि क्षणात्॥ सूर्पणखा उवाच॥ हे भ्रातरागतो ह्यत्र रामः सीतासम
न्वितः॥ लक्ष्मणेन सह भ्रात्रा तापं च वषा सातिष्ठति॥ दंडकं निर्भयं कुर्वन्नास्ते गोदावरीतटे॥ मामेवं कृतवान्तस्य भ्राता ते मे
वचोदितः॥ यदि त्वं कुलजातोसि वीरोसि जहि तौ रिपू॥ तच्छ्रुत्वा त्वरितः प्रागात्खरः कोपेन मूर्छितः॥ चतुर्दशसहस्रा

म

तिरस्सां भीमकर्मणां॥ चोदयामास रामस्य समीपं युद्धकोविदः॥ खरश्च त्रिशिराश्चैव दूषणश्चैव राक्षसः॥ सर्वे रा
मं प्रदुद्रुवुः शीघ्रं नानाप्रहरणोद्यताः॥ श्रुत्वा कोलाहलं तेषां रामः सौमित्रिमब्रवीत्॥ श्रीभगवानुवाच॥ श्रूयते विपुलः शब्दो
मा नूनं यांति राक्षसाः॥ भविष्यति महद्युद्धं नूनमद्य मया सह॥ सीतां नीत्वा गुहां गत्वा तत्र तिष्ठ महाबल॥ हंतुमिच्छाम्यहं सर्वान् राक्ष
सान् घोररूपिणः॥ अत्र किंचिन्न वक्तव्यं शापितोसि ममोपरि॥ तथेति सीतामादाय लक्ष्मणो गह्वरं ययौ॥ रामः परिकरं बद्ध्वा
धनुरादाय निष्ठुरं॥ तूणीरावक्षयशरौ बद्ध्वा यत्तोभवत्प्रभुः॥ ततः आगत्य रक्षांसि रामस्योपरि चिक्षिपुः॥ आयु
धानि विचित्राणि पाषाणान्पादपानपि॥ तानि चिच्छेद रामोपि लीलया तिलशः क्षणात्॥ ततो बाणसहस्रेण
हत्वा तान्सर्वराक्षसान्॥ खरं त्रिशिरसं चैव दूषणं चैव राक्षसं॥ जघान प्रहरार्धेन सर्वानेव रघूत्तमः॥ लक्ष्मणः
गिरिगुहां गत्वा सीतामादाय राघवे॥ समर्पयित्वा रक्षांसि हतानि विस्मयं ययौ॥ सीता रामं समालिंग्य प्रस
न्नमुखपंकजा॥ शस्त्रव्रणानि चांगेषु ममार्ज जनकात्मजा॥ सापि दुद्राव दृष्ट्वा तान्हतान् राक्षसपुंगवान्॥ लंकां
गत्वा सभामध्ये क्रोशंती पादसन्निधौ॥ रावणस्य पपातोर्व्यां भगिनी तस्य रक्षसः॥ दृष्ट्वा तां रावणः प्राह भगिनीं
भयविह्वलां॥ रावण उवाच॥ उत्तिष्ठोत्तिष्ठ वत्से त्वं विरूपकरणं तव॥ कृतं शक्रेण वा भद्रे यमेन वरुणेन वा॥ कु
बेरेण वा ब्रूहि भस्मीकुर्यां क्षणेन तं॥ शूर्पणखा उवाच॥ रे रे रावण मत्तोसि न जानीषे प्रमूढधीः॥ पानासक्तः स्त्री
विजितो शठः सर्वत्र स स्यसे॥ चारचक्षुर्विहीनस्त्वं कथं राजा भविष्यसि॥ खरश्च निहतः संख्ये दूषणस्त्रिशिरास्त
था॥ चतुर्दशसहस्राणि राक्षसानां महात्मनां॥ निहतानि क्षणेनैव रामेणासुरशत्रुणा॥ जनस्थानमशेषेण मुनीनां

त

निर्भयं कृतं॥ न जानासि विमूढस्त्वं अत एव मयोच्यते॥ राक्षसाधिप उवाच॥ को वा रामः किमर्थं वा कथं तेनासुरा हताः॥ सम्यक् कथय
मे तेषां मूलच्छेदं करोम्यहं॥ शूर्पणखा उवाच॥ जनस्थानमहं याता कदाचित्तत्र गौतमीतटे॥ तत्र पंचवटी नाम पुराणमुनिराश्रमा॥ त
त्राश्रमे मया दृष्टो रामो राजीवलोचनः॥ धनुर्बाणधरः श्रीमान् जटावल्कलमंडितः॥ कनीयाननुजस्तस्य लक्ष्मणो
पि तथाविधः॥ तस्य भार्या विशालाक्षी रूपिणी श्रीरिवापरा॥ देवगंधर्वनागानां मनुष्याणां तथा प्रिया॥ न दृष्टा न श्रुता
राजन् द्योतयंतीव तं वनं॥ आनेतुमहमुद्युक्ता तां भार्यार्थं तवानघ॥ लक्ष्मणो नाम तद्भ्राता चिच्छेद मम नासिकां॥ का
र्णौ च चोदितस्तेन रामेण स महाबलः॥ ततोहमतिदुःखेन रुदंती खरमन्वगां॥ सोपि रामं समासाद्य युद्धे राक्षसयूथ
पैः॥ क्षणेन रामेण तेनैव बलशालिना॥ सर्वे ते निहता वीरा राक्षसा भीमविक्रमाः॥ यदि रामो मनः कुर्यात् त्रैलो
क्यं निमिषार्धतः॥ भस्मीकुर्यान्न संदेह इति भाति मम भ्रातः॥ यदि सा तव भार्या स्यात्सफलं तव जीवितं॥ अतो य
तस्व राजेंद्र यथा ते वल्लभा भवेत्॥ सीता राजीवपत्राक्षी सर्वलोकैकसुंदरी॥ साक्षाद्रामस्य पुरतः स्थातुं त्वं न क्षमः
प्रभो॥ मायया मोहयित्वा तु प्राप्स्यसे तां रघूत्तमं॥ श्रुत्वा तत्स्ववचोमेश्वरो दानमानादिभिस्तदा॥ आश्वास्य भगिनीं रा
जा प्रविवेश गृहं स्वकं॥ तत्र चिंतापरो भूत्वा निद्रां रात्रौ न लब्धवान्॥ एकेन रामेण कथं मनुष्यमात्रेण नष्टः सबलः
खरो मे॥ भ्राता कथं मे बलवीर्यदर्पयुतो विनष्टो बत राघवेण॥ यद्वा न रामो मनुजः परेशो मां हंतुकामः सबलं
लोकैः॥ संप्रार्थितो यं द्रुहिणेन पूर्वं मनुष्यरूपो रघवोः कुले जातः॥ वध्यो यदि स्यां परमात्मना हं वैकुंठराज्यं प
रिपालयेयं॥ नो चेदिदं राक्षसराज्यमेव भोक्ष्ये चिरं राम मतो व्रजामि॥ इत्थं विचिंत्याखिलराक्षसेंद्रो रामं विदि

त्वा रमेश्वरं हरिं ॥ विदेहबुध्यैव हरिं प्रयामि हृतं न जन्ता भगवान्प्रसीदतु ॥ ॥ इति श्रीमदध्यात्मरामायणे उमा
महेश्वरसंवादे आरण्यकांडे पंचमः सर्गः ॥ ॥ सूत उवाच ॥ विचिंत्यैवं निश्चयं सः प्रभाते रथमास्थितः
ततो हृष्टेन मनसा मारीचाश्रममागमत् ॥ मारीचस्तत्र मुनिवज्जटावल्कलधारकः ॥ ध्यायन् हृदि परात्मानं नि
र्गुणं गुणभासकं ॥ समाधिविरमेपश्यद्रावणं गृहमागतं ॥ तं दृष्ट्वा सहसोत्थाय चालिंग्य पूजयित्वा यथाविधि ॥
कृतातिथ्यं सुखासीनं मारीचो वाक्यमब्रवीत् ॥ मारीच उवाच ॥ समागमनमेतत्ते रथेनैकेन रावण ॥ चिंता
पर इवाभासि हृदि कार्यं विचिंतयन् ॥ ब्रूहि मे न हि गोप्यं चेत्करवाणि तवेप्सितं ॥ न्याय्यं चेद्ब्रूहि राजेंद्र व जि
तं मा स्पृशेन्न हि ॥ रावण उवाच ॥ अस्ति राजा दशरथः साकेताधिपतिः किल ॥ राम नामा सुतस्तस्य ज्येष्ठः स त
पराक्रमः ॥ विवासयामास सुतं वनं वजनप्रियं ॥ भार्यया सहितं भ्रात्रा लक्ष्मणेन समन्वितं ॥ स आस्ते विपिने
घोरे पंचवट्याश्रमे शुभे ॥ तस्य भार्या विशालाक्षी सीता लोकविमोहिनी ॥ रामो निरपराधान्मे राक्षसान्भीम
विक्रमान् ॥ खरं च हत्वा विपिने सुखमास्ते तिनिर्भयः ॥ भगिन्या मे शूर्पणखा निर्दोषायाश्च नासिकां ॥ कर्णौ
छेदयदुष्टात्मा वने तिष्ठति निर्भयः ॥ अतस्त्वया सहायेन गत्वा तत्प्राणवल्लभां ॥ आनयिष्यामि विपिने रहिते राघवे
ण तां ॥ त्वं तु मायामृगो भूत्वा ह्याश्रमादपनेष्यसि ॥ रामं च लक्ष्मणं चैव तदा सीतां हराम्यहं ॥ त्वं तु तावच्च सहा
यं मे कृत्वा स्थास्यसि पूर्ववत् ॥ इत्येवं भाषमाणं तं रावणं वीक्ष्य विस्मितः ॥ मारीच उवाच ॥ केनेदमुपदिष्टं ते मूल
घातकरं वचः ॥ स एव शत्रुर्वध्यश्च यस्त्वन्नाशं प्रतीक्षते ॥ रामस्य पौरुषं स्मृत्वा बिभेम्यद्यापि रावण ॥ बाल्येपि मां

कौशिकस्य यज्ञसंरक्षणाय सः ॥ आगतस्त्विषुणैकेन पातयामास सागरे ॥ योजनानां शते रामस्तदादि भयविह्वलः ॥
स्मृत्वा स्मृत्वा तदेवाहं रामं पश्यामि सर्वतः ॥ रकारादीनि नामानि रामत्रस्तस्य रावण ॥ रत्नानि च रथ
श्च संत्रासं जनयंति मे ॥ दंडकेपि पुनरप्यहं वने पूर्ववैरमनुचिंतयन् हृदि ॥ तीक्ष्णशृंगमृगरूपमेकदा
ना ऋषिभिर्हृतिराद्रुतोन्वगां ॥ राघवं जनकजासमन्वितं लक्ष्मणेन सहितं त्वरान्वितः ॥ आगतोहमथ हंतुमु
घतो मां विलोक्य शरमेकमक्षिपत् ॥ तेन विद्धहृदयोहमुद्भ्रमन् राक्षसेंद्र पतितोस्मि सागरे ॥ तत्प्रभृत्यहमिदं
समाश्रितः स्थानमूर्जितमिदं भयार्दितः ॥ राममेव सततं विभावये भीतभीत इव भोगराशितः ॥ राज
रत्नरमणीरथादिकं श्रोत्रयोर्यदि गतं भयं भवेत् ॥ राम आगत इहेति शंकया बाह्यकार्यमपि सर्वमत्यजं ॥ नि
द्रया परिवृतो यदा स्वपे राममेव मनसा चिंतयन् ॥ स्वप्नदृष्टगतराघवं तदा बोधितो विगतनिद्र आस्थितः ॥
तद्भवानपि विमुच्य चाग्रहं राघवं प्रति गृहं प्रयाहि नो ॥ रक्ष राक्षसकुलं चिरागतं त्वत्कृते सकलमेव नं
क्ष्यति ॥ तव हितं वदतो मम शाधि तं परिगृहाण परात्मनि राघवे ॥ त्यज विरोधमतिं नरजातितः परमकारु
णिको रघुनंदनः ॥ अहमशेषमिदं मुनिवाक्यतोऽश्रवमवमादियुगे परमेश्वरः ॥ ब्रह्मणार्थित उवाच त
द्धरिः किं तवेप्सितमहं करवाणि तत् ॥ ब्रह्मणोक्तमरविंदलोचन त्वं प्रयाहि मनुजं त्वं वपुः ॥ दशरथा

त्मजन्मभयं मन्ये साजाहि रिपुं दशकंधर हृदे। अतो न मानुषो रामः साक्षान्नारायणोऽव्ययः॥ मायामानुषवेषेण वै-
नं यातोति निर्भयः॥ स भारहरणार्थाय गच्छ गता तव हे सुखी॥ श्रुत्वा मारीचवचनं रावणः प्रत्यभाषत॥ रावण उ-
वाच॥ परमात्मा यदा रामो प्रार्थितो ब्रह्मणा दिवि। मां हंतुं मानुषो भूत्वा यत्नाद् इहि समागतः॥ करिष्यत्यचिराद्देवस्-
तत्सत्यं परमेश्वरः। अतोहं यत्नतः सीतामानेष्याम्येव राघवात्॥ वधे प्राप्ते स्थिरो वीरः प्राप्स्यामि परमं प-
दं॥ यदा रामेण रोहत्वा सीतां प्राप्स्यामि निर्भयः॥ उत्तिष्ठ महाभाग विचित्रमृगरूपधृक्॥ रामं च लक्ष्म-
णं शीघ्रं आश्रमादतिदूरतः॥ आकृष्य गच्छ शीघ्रं त्वं सुखं तिष्ठ यथापुरा। इतः परं तु यदि चिद्द्रावसे मद्वि-
भीषली॥ हनिष्याम्यसिनानेन त्वामत्रैव न संशयः॥ मारीचस्तद्वचनं श्रुत्वा चात्मनेवाव चिंतयत्॥ यदि मां रा-
घवो हन्यात्तदा मुक्तो भवाम्यहं॥ मां हंता यदि चेद्दुष्टस्तदा मे निरयो ध्रुवं॥ इति निश्चित्य मरणं रा-
मात् स्यायवेगवान्। उत्तिष्ठ वीर करोमीति राजन् करोम्याशीतं वच प्रभो॥ इत्यारुह्य रथं तस्याथ यातो रामाश्र-
मं प्रति। स्थुद्भूत्वा जीवनलक्ष्यमृगो भवत् रौप्यबिंदुकः॥ रत्नशृंगो मणिखुरो नीलरत्नविलोचनः॥ विद्युत्प्रभो-
ति विघ्नास्यो विचचार वनांतरे॥ रामाश्रमपदस्यांते सीता दृष्टिपथे चरन्॥ क्षणं धावन् प्रतिष्ठंते स्थितां
समीपमागत्य पुनर्भयाद्भृतं॥ एवं स मायामृगवेशरूपधृक् चचार सीतां प्रति मोहयन्वने॥ ॥ ॥

॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकाण्डे षष्ठः सर्गः॥ ॥[illegible]॥ शंकर उवाच॥
उपधरामोपि सर्वज्ञो ज्ञात्वा रावणचेष्टितं॥ उवाच सीतामेकांते शृणु जानकि तत्वतः॥ श्रीराम उवाच॥ रावणो भि-
क्षुरूपेण आगमिष्यति तेंतिकं॥ त्वं तु छायां तत्र कारा स्थापयित्वोटजे विश॥ अग्नावदृश्यरूपेण वर्षं तिष्ठ म-
माज्ञया॥ रावणस्य वधांते मां पूर्ववत्प्राप्स्यसे शुभे॥ श्रुत्वा रामेरितं वाक्यं सापि तत्र तथाकरोत्॥ मायासीतां
बहिः स्थाप्य स्वयमंतर्दधेऽनले॥ मायासीता तदापश्यन्मृगं मायाविनिर्मितं॥ हसंती राममभ्येत्य प्रोवाच वि-
नयान्विता॥ सीतोवाच॥ पश्य राम मृगं चित्रं कनकं रत्नभूषितं॥ विचित्रबिंदुभिर्युक्तं चरंतमकुतोभयं॥
बध्वा देहि मम क्रीडामृगो भवतु सुंदर॥ तथेति धनुरादाय गच्छन् लक्ष्मणमब्रवीत्॥ श्रीरामचंद्र उवा-
च॥ रक्ष त्वमतियत्नेन सीतां मत्प्राणवल्लभां॥ मायिनः संति विपिने राक्षसा घोरदर्शनाः॥ अप्रमत्तो बहिः सा-
रक्ष सीतां मनिंदितां॥ लक्ष्मण उवाच॥ एष सुरमम मे दैव राक्षसो मृगरूपधृक्॥ मारीचोत्र न संदेहो ऐवंभूतमृ-
गोकुतः॥ श्रीरामचंद्र उवाच॥ ॥ यदि मारीच एवायं तदा हन्मि न संशयः॥ मृगश्चेदानयिष्यामि सीताविश्रमहे-

तैवे॥ गमिष्याम्यंगं बध्वा ह्यानयिष्यामि सत्वरः॥ तं दृष्ट्वा त्वेन संतिष्ठ सीतां संरक्ष्य लक्ष्मणेघतः॥ इत्युक्त्वा प्रययौ
रामो यावत्मृगमनुद्रुतः॥ मायाचयदाश्रया लोकमोहिनी जगदाकृतिः॥ निर्विकारश्चिदानंदपूर्णोपि मृ
गमन्वगात॥ भक्तानुकंपी भगवानिति सत्यं व्यधाद्धरिः॥ कृतं सीताप्रियार्थाय जानन्नमृगं य
यौ॥ अन्यथा पूर्णकामस्य रामस्य विदितात्मनः॥ मृगेण वा स्त्रिया वापि किं कार्यं परमात्मनः॥ कदाचिद्द
श्यते भ्यासे क्षणं धावति लीयते॥ दृश्यते च ततो दूरादेवं रामं समाहरत्॥ ततो रामोपि विज्ञाय राक्षसो
यमिति स्फुटं॥ विव्याध शरमादाय राक्षसं मृगरूपिणं॥ पपात रुधिराक्तास्यो मारीचः पूर्वरूपधृक्॥ हा
हतोस्मि महाबाहो त्राहि लक्ष्मण मां द्रुतं॥ इत्युक्त्वा रामवद्वाचा पपात रुधिराननः॥ यन्नाम ज्ञोपि मरणे
स्मृत्वा तत्साम्यमाप्नुयात्॥ किमुताग्रे हरिं पश्यन् तेनैव हतो सुरः॥ तद्देहादुत्थितं तेजः सर्वलोकस्य प
श्यतः॥ रामसेवाविशद्देवा विस्मयं परमं ययुः॥ किं कर्म कृत्वा किं प्राप्तः पापी मुनिहिंसकः॥ अथवा रामपूर्व
स्यायं महिमा नात्र संशयः॥ रामबाणेन संविद्धः पूर्वं राममनुस्मरन्॥ तयासर्वं परित्यज्य गृहवित्तादिकं पत

हृदि रामं सदा ध्यात्वा निर्धूताशेषकल्मषः॥ अंते रामेण निहतः पश्यन्राममवाप सः॥ द्विजो वा राक्षसो वापि पापी धा
र्मिक एव वा॥ त्यजन् कलेवरं रामं स्मृत्वा याति परं पदं॥ इति ते मन्यमानाश्च ततो देवा दिवं ययुः॥ रवावमर
रामस्य मार्गपुष्पमनुव्रजः॥ रामश्च चिंतयामास ह्रियमाणो सुराधमः॥ हा लक्ष्मणेपि मद्वाक्यमनुकुर्वत्या
कां मद्वाक्यसदृशं वाक्यं सीतापि किं न वेत्॥ इति चिंतापरीतात्मा रामो दूरात्प्रवर्त्तत॥ सीता श्रुत्वाथ तं
मारीचस्य दुरात्मनः॥ सीताति दुःखसंविग्ना लक्ष्मणं त्विदमब्रवीत्॥ सीतोवाच॥ गच्छ लक्ष्मण वेगेन
तः तां ते सुरपीडितः॥ हा लक्ष्मणेति वचनं भ्रातुस्ते न शृणोषि किं॥ लक्ष्मण उवाच॥ श्रुत्वादे विवचोर्हमे
राम२ कं न द्रवेत्॥ यः कश्चिद्राक्षसो देवि म्रियमाणो ब्रवीद्वचः॥ रामः त्रैलोक्यमपि यः क्रुद्धो नाशयति क्षणात्
द्॥ स कथं दीनवचनं भाषते सुरपूजितः॥ कृद्धा लक्ष्मणमालोक्य सीता बाष्पविलोचना॥ सीतोवाच
भो सौहस्त्वं लक्ष्मण दुर्बुद्धे भ्रातुर्व्यसनकांक्षसी॥ प्रेषितो भरतेनैव रामनाशाभिकांक्षिणा॥ मां नेतुमागतेन
रामनाश उपस्थिते॥ न प्राप्स्यसे त्वं मां स्वप्ने पश्य प्राणान् त्यजाम्यहं॥ नजानाति दृश्यो रामो त्वां नाथाहर
णेघते॥ रामादन्यं न स्पृशामि त्वां वा भरतमेव वा॥ इत्युक्त्वा वक्ष्यमाणा सा स्वबाहुभ्यां तदोदरं॥ तत् श्रुत्वा
लक्ष्मणः कर्णौ पिधायातीव दुःखितः॥ लक्ष्मण उवाच॥ मामेवं भाषसे चंडि धिक्त्वां नाशमुपैष्यसि

इत्युक्त्वा वनदेवित्यः समर्प्य जनकात्मजां ॥ ययौ दुःखातिसंविग्नो राममेव शनैः शनैः ॥ ततोंतरं समाले
क्य रावणो भिक्षुवेषधृक् ॥ सीतासमीपमगमत्स्फुरद्दंडकमंडलुः ॥ सीता तमवलोक्याशु नत्वा सं
पूज्य भक्तितः ॥ कंदमूलफलादीनि दत्वा स्वागतमब्रवीत् ॥ मुने भुंक्ष्व फलादीनि विश्रमस्व यथासुखं
॥ इदानीमेव मे भर्ता आगमिष्यति ते प्रियं । करिष्यति विसृष्टोसौ तिष्ठ त्वं यदि रोचते ॥ भिक्षुरुवाच ॥
का त्वं कमलपत्राक्षी को वा भर्ता तवानघे ॥ किमर्थमत्र ते वासो वने राक्षससेविते ॥ ब्रूहि भद्रे ततः
सर्वं कारणं त्वं मद्गतः ॥ सीतोवाच ॥ अयोध्याधिपतिः श्रीमानजपादशरथो महान् । तस्य ज्येष्ठः सुत
रामः सर्वलक्षणलक्षितः ॥ तस्याहं धर्मतः पत्नी सीता जनकनंदिनी ॥ तस्य भ्राता कनीयांश्च लक्ष्मणो भ्रा
तृवत्सलः ॥ पितुराज्ञां पुरस्कृत्य दंडकेवकं त्वागताः ॥ चतुर्दश समास्त्वा तु ज्ञातुमिच्छामि मे वद ॥ भिक्षु
रुवाच ॥ ॥ पौलस्त्यतनयो हं रावणो राक्षसाधिपः ॥ त्वत्कामपरितप्तो हं त्वां नेतुं पुरमागतः ॥ मुनिवेषेण रामे
ण किं करिष्यसि मां भज ॥ भुंक्ष्व भोगान्मया सार्धं त्यज दुःखं वनोद्भवं ॥ श्रुत्वा तद्वचनं सीता भीता किंचिदु
वाच तं ॥ सीतोवाच ॥ यद्येवं भाषसे मां त्वं नाशमेष्यसि राघवात् ॥ आगमिष्यति रामोपि क्षणेन ते सहे
सानुजः ॥ मां को धर्षयितुं शक्तो हरेः पत्नीं शशो यथा ॥ रामबाणैर्विभिन्नस्त्वं पतिष्यसि महीतले ॥ इ
ति तद्वचः श्रुत्वा रावणः क्रोधमूर्छितः ॥ स्वरूपं दर्शयामास महापर्वतसन्निभं ॥ दशास्यं विंशति

भुजैः कालमेघसमद्युतिं ॥ दृष्ट्वा च वनदेव्यश्च भूतानि च वितत्रसुः ॥ ततो विदार्य धरणीं नखैरुद्धृत्य बाहुभिः ॥
तोलयित्वा रथे क्षिप्त्वा ययौ क्षिप्रं विहायसा ॥ हा राम हा लक्ष्मणेति रुदंती जनकात्मजा ॥ भयोद्भ्रमना दीना प
श्यंती भुवमेव सा ॥ श्रुत्वा तद्रुदितं दीनं सीतायाः पक्षिसत्तमः ॥ जटायुरुत्थितः शीघ्रं नगाग्रात्तीक्ष्णतुं
डकः ॥ तिष्ठ तिष्ठेति स प्राह को गच्छसि ममाग्रतः ॥ मुषित्वा कौ लोकनाथस्य भार्यां शून्यालयात् ॥ शुन
को मंत्रपूतं त्वं पुरोडाशमिवाध्वरे ॥ इत्युक्ता तीक्ष्णतुंडेन चूर्णयामास तद्रथं ॥ चंच्वा चिच्छेद पादाभ्यां चूर्णया
मास तद्धनुः ॥ ततः सीतां परित्यज्य रावणः खड्गमाददे ॥ चिच्छेद पक्षौ सामर्षं पक्षिराजस्य धीमतः ॥ पपात
किंचिच्छेषेण प्राणेन पक्षिराट् ॥ पुनरन्यद्रथेनाशु सीतामादाय राक्षसः ॥ क्रोशंती राम रामेति त्रातारं नाधि
गच्छति ॥ हा राम हा जगन्नाथ मां न पश्यसि दुःखितां ॥ रक्षसा नीयमानां स्वां भार्यामेव च राघव ॥ हा लक्ष्म
ण महाभाग त्राहि मामपराधिनीं ॥ वाक्शरेणाहतस्त्वं मे क्षंतुमर्हसि ॥ इत्येवं क्रोशमानां तां रामागमनशंक
या ॥ जगाम वायुवेगेन सीतामादाय सत्वरः ॥ विहायसा नीयमाना सीता पश्यदधो भुवि ॥ पर्वता
ग्रेस्थितान्पंच वानरान्वायुनंदना ॥ उत्तरीयार्धखंडेन विमुच्याभरणादिकं ॥ बध्वा चिक्षेप रामा

आ॰रा॰
पं॥

यकथयंत्विति प्रवीते॥ ततः समुद्रमुल्लंघ्य लंकामागत्य स रावणः॥ स्वांतःपुरे रहस्येतामशोकविपिने
क्षिपत्॥ राक्षसीभिः परिवृतां मातृबुध्यान्वपालयत्॥ कृशातिदीना परिकर्मवर्जिता दुःखेन शुष्य
द्वदनातिविह्वला॥ हा राम रामेति विलप्यमाना सीता स्थिरा राक्षसीवृंदमध्ये॥ ॥
॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे सप्तमः सर्गः॥ ॥ ॥ ॥
सूत उवाच॥ रामो मायाविनं हत्वा राक्षसं कामरूपिणं॥ प्रतस्थे स्वाश्रमं गंतुं ततो दूराद्ददर्श नं॥ आयांतं ल
क्ष्मणं दीनं मुखेन परिशुष्यता॥ राघवश्चिंतयामास स्वात्मन्येव महामतिः॥ लक्ष्मणस्तु न जानाति मायासी
तां मया कृतां॥ ज्ञात्वाप्येनं वंचयित्वा शोचामि प्राकृतो यथा॥ यद्यहं विरतो भूत्वा तूष्णीं स्थास्यामि मंदिरे॥
तदा राक्षसकोटीनां वधोपायः कथं भवेत्॥ तदा क्रमेणानुचिन्वन्सीतां यास्य पुरा नवी॥ रावणं सकुलं ह
त्वा सीतामग्नौ स्थितां पुनः॥ यथैव स्थापितां नीत्वा यास्येऽयोध्यामतंद्रितः॥ अहं मनुजभावेन जातोऽस्मि ब्रह्मणा
र्थितः॥ मनुष्यभावमापन्नः किंचित्कालं वसामि कौ॥ ततो मायामनुष्यभावचरितं मे मनुष्यवत्॥ मुक्तिः स्याद
प्रयासेन भक्तिमार्गानुवर्तिनां॥ निश्चित्यैवं तदा दृष्ट्वा लक्ष्मणं चेदमब्रवीत्॥ श्रीरामचंद्र उवाच॥ किमर्थमागतो
श्रीराम

सि त्वं सीतां त्यक्त्वा मम प्रियां॥ नीता वा भक्षिता वापि राक्षसैर्जनकात्मजा॥ लक्ष्मण उवाच॥ शृणु मे प्रां
जलिः प्राह सीता यादृग्वचोरुदत्॥ हा लक्ष्मणेति वचनं राक्षसोक्तं श्रुतं तया॥ त्वद्वाक्यसदृशं श्रुत्वा मां गच्छे
ति त्वराब्रवीत्॥ रुदंती सा मया प्रोक्ता देवि राक्षसभाषितं॥ नेदं रामस्य वचनं स्वस्था भव शुभानने॥ इत्यु
क्तापि तदा साध्वी मया प्रोवाच मां पुनः॥ यदुक्तं तद्वचो रामद्रोही वक्ष्ये पुरतस्तव॥ ततोऽपि धावन्निर्गत्य
यातोऽहं त्वां समीक्षितुं॥ श्रीरामचंद्र उवाच॥ शृणु लक्ष्मण यत्नेन तत्तोऽप्यनुचितं कृतं॥ त्वया स्त्रीभाषितं स
त्यं कृत्वा त्यक्ता सुशोभना॥ नीता वा भक्षिता वा सा राक्षसैर्नात्र संशयः॥ इति चिंतापरो रामः स्वाश्रमं परितो
ययौ॥ तत्रादृष्ट्वा जनकजां विललापातिदुःखितः॥ हा प्रिये क्व गतासि त्वं नासि पूर्ववदाश्रमे॥ अथवा मद्वि
मोहार्थं लीलया क्व विलीयसे॥ इत्यन्विष्यन्ददर्शापि नापश्यज्जानकीं तदा॥ वनदेव्यः कुतः सीता ब्रुवंतु मम व
ल्लभां॥ मृगाश्च पक्षिणो वृक्षाः संदर्शयत मे प्रियां॥ इत्येवं विलपन्नेव रामः सीतां न कुत्र चित्॥ सर्वज्ञः सर्वदृग्व्या
पी नापश्यद्रघुनंदनः॥ आनंदोऽप्यन्वशोचत्तामचलोऽप्यनुधावति॥ निर्ममो निरहंकारोऽप्यखंडानंदरूपवान्॥
मम जायेति सीतेति विललापातिदुःखितः॥ एवमन्यामनुचरन्नसक्तोऽपि रघूत्तमः॥ आसक्त इव मूढानां भा
ति तत्त्वविदां नहि॥ एवं विचिन्वन्सकलं वनं रामः सलक्ष्मणः॥ भग्नं रथं छत्रं चापं कूबरं पतितं भुवि॥ दृष्ट्वाल

हस्तेण मोहेदं पश्य लक्ष्मणेन केन वितु।।नीयमानां जनकजातां पीत्वान्यो जहारतां।।ततः चिद्रूवोत्तागंगत्वा पर्वतसं
न्निभं।।रुधिरार्द्रं वपुर्दृष्ट्वा रामो वाक्यमथाब्रवीत्।।एषवै नष्टं भक्षयित्वा तां जानकीं शुभदर्शनां।।शेते विविक्तेऽ
तिल्वनः पश्यहन्मि राक्षसं।।चापमानं पश्री घंनेवारणरघुनंदनः।।तच्छ्रुत्वा रामवचनं जटायुः प्राह निर्दितवत्।।
मांनमरपत्तद्रंते म्रियमाणं स्वकर्मणा।।अहं जटायुस्ते भार्याहारिणं समनुद्रुतः।।रावणं तत्र युद्धमेवतत्स्वारि
विमर्दनं।।तस्य वाहान्रथं चापं छित्वाहं तेन पातितः।।पतितोस्मि जगन्नाथ प्राणांस्त्यक्ष्याम्यपि पश्यमां।।तच्छ्रुत्वा
राघवो दीनं कंठप्राणं ददर्श ह।।हस्ताभ्यां संस्पृशन्रामो दुःखाश्रुव्रतलोचनः।।जटायो ब्रूहि भार्या मे केन नीता शु हि ६
भाननाः।।मत्कार्ये थ्रे हतोसित्वमतो मे प्रियबांधवः।।जटायुःसन्नपावा वाक्चास्त्वंसमुद्वहन्।।उवाचराव
णो नाम राक्षसो भीमविक्रमः।।आदाय मैथिलीं सीतां दक्षिणाभिमुखो ययौ।।इतो वक्तुं न मे शक्तिः प्राणं
स्त्यक्ष्यामि तेग्रतः।।दिष्ट्या दृष्टोसि रामत्वं म्रियमाणेन मेनघ।।परमात्मासि विष्णुस्त्वं मायामनुजरूपधृक्
।।अंतकालेपि दृष्ट्वा त्वां मुक्तोहं रघुसत्तम।।हस्ताभ्यां स्पृश मां राम पुनर्यास्याम्यतेपदं।।तथेतिरामः
संस्पर्श तदंगं पाणिना स्मयन्।।ततः प्राणान्परित्यज्य जटायुः पतितो भुवि।।रामस्तमनुशोचित्वा बाष्पस्ता
श्रुलोचनः।।लक्ष्मणेन समानाय्य काष्ठानि प्रददाह तं।।स्नात्वा दुःखेन रामोपि लक्ष्मणेन समन्वितः।।

हत्वा वनेमृगं तत्र मांस खंडान्समं जतः।।शाड्वले प्राक्षिपद्रामः पृथक्पृथगनेकधा।।भक्षंतु पक्षिणः सर्वे तत्सर्वे भवतु
पक्षिराड्।।इत्युक्त्वा राघव प्राह जटायो गच्छ मत्पदं।।मत्सारूप्यं भजस्वाद्य सर्वलोकस्य पश्यतः।।ततो नंदमेवा सौ दिव्य
रूपधरः शुभः।।विमानवरमारुह्य भास्वरं तानुसन्निभं।।शंखचक्रगदापद्मकिरीटवरभूषणैः।।द्योतयत्स्वप्रका
शेन पीतांबरधरोमलः।।चतुर्भिः पार्षदैर्विष्णोस्तादृशैरभिपूजितः।।स्तूयमानो योगिगणैः राममाभाष्य सन्नितः।।
स्तपस्थि मानो योगिगणे राममाभ्यसन्नित।।कृतांजलिपुटो भूत्वा तुष्टाव रघुनंदनं।।जटायुरुवाच।।अगणितगु
णमप्रमेयमाद्यं सकलजगत्स्थितिसंयमादिहेतुं।।उपरमं परमं परात्मभूतं सततमहं प्रणतोस्मि रामचंद्रं।।निरव
धिसुखमिंदिराकटाक्षं क्षपितसुरेंद्रचतुर्मुखादिदुःखं।।नरवरमनिशं नतोस्मि रामं वरदमहं वरचापबाण
हस्तं।।त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानं।।शरणदमनिशं सुरागमूले कृतनिल
यं रघुनंदनं प्रपद्ये।।भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं दयालुं।।दनुजपतिसहस्रको
टिनाशं रवितनयासदृशं हरिं प्रपद्ये।।अविरतभवभावनातिदूरं भवविमुखैर्मुनिभिः सदैवदृश्यं।
भवजलधिसुतारकांघ्रिपोतं शरणमहं रघुनंदनं प्रपद्ये।।गिरिशगिरिसुतामनोनिवासं गिवर

अध्या० रा०
५६

धारिणमाहितात्रिरामं॥ सुरवरदनुजेंद्रसेवितांघ्रिं सुरवरदं रघुनायकं प्रपद्ये॥ परधनपरदारवर्जि-
तानां परगुणभूतिषु तुष्टमानसानां॥ परहितनिरतात्मनां सुसेव्यं रघुवरमंबुजलोचनं प्रपद्ये॥
स्मितरुचिरविकासिताननाब्जमतिसुलभं सुरराजनीलनीलं॥ सितजलरुहचारुनेत्रशो-
भं॥ रघुपतिमीशगुरोर्गुरुं प्रपद्ये॥ हरिकमलजशंभुरूपभेदात्त्वमिह विभासि गुणत्रयानु-
वृत्तः॥ रविरिव जलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे॥ रतिपतिशतकोटिसुंदरां-
गं शतपथगोचरभावनाविदूरं॥ यतिपतिहृदये सदा विभातं रघुपतिमार्तिहरं प्रभुं प्रपद्ये॥
इत्येवं स्तुवतस्तस्य प्रसन्नोभूद्रघूत्तमः॥ श्रीरघुनाथ उ०॥ जटायो गच्छ भद्रं ते मम विष्णोः परं पदं॥ शृ-
णोति यस्त्विदं स्तोत्रं लिखेद्वादरतः पठेत्॥ स याति मम सारूप्यं यथा त्वं मत्परायणः॥ इति रा-
घवभाषितं तदा॥ श्रुतवान्हर्षसमाकुलो द्विजः॥ रघुनंदनसाम्यमास्थितः॥ प्रययौ ब्रह्मसुपूजि-
तपदं॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे ऽरण्यकांडे ऽष्टमः सर्गः॥ महादेव उवाच॥ ५६
ततो रामो लक्ष्मणेन जगाम विपिनांतरं॥ पुनर्दुःखं समाश्रित्य सीतान्वेषणतत्परः॥ तत्रा-

द्भुतं तस्मात्कबंधो राक्षसः प्रत्यदृश्यत॥ वक्षस्येव महावक्त्रः शिरःपादादिवर्जितः॥ बाहू योजनमात्रेण व्याप्तौ तस्य
रक्षसः॥ कबंधो नाम दैत्येंद्रः सर्वसत्वविहिंसकः॥ तद्बाह्वोर्मध्यदेशे तौ भ्रातरौ रामलक्ष्मणौ॥ ददर्शतुर्महासत्वं तद्बा-
हुपरिवेष्टितौ॥ श्रीराम उवाच॥ पश्य लक्ष्मण मायांतं विकटं राक्षसाधमं॥ शिरःपादविहीनोयं यस्य वक्षसि चा-
ननं॥ बाहुभ्यां लभ्यते यद्यत्तद्भक्षयति ध्रुवं॥ आवामपि तयोर्बाह्वोर्मध्ये संकलितौ ध्रुवं॥ गंतुमन्यत्र मार्गो न दृश्यते ते३
रघुनंदन॥ किं कर्तव्यमितोस्माभिरिदानीं भक्षयेत्स नौ॥ श्रीलक्ष्मण उ०॥ कुगुष्वनो महाभाग किं विचारेण रा-
घव॥ आवामेकैकमव्यग्रौ छिंद्वो रक्षो भुजौ ध्रुवं॥ तथेति रामः खड्गेन भुजं दक्षिणमच्छिनत्॥ तथैव लक्ष्म-
णो वामं चिच्छेद भुजमंजसा॥ ततोतिविस्मितो दैत्यः पप्रच्छ विपिने वसन्॥ राक्षस उ०॥ कौ युवां नरशार्दूलौ माया-
मानुषविग्रहौ॥ मद्बाहुच्छेदकौ लोके दिवि देवेषु वा कुतः॥ ततो ब्रवीत्स सन्नो रामो राजीवलोचनः॥ श्रीराम
उ०॥ अयोध्याधिपतिः श्रीमान्राजा दशरथो महान्॥ रामोहं तस्य पुत्रोसौ भ्राता मे लक्ष्मणः सुधीः॥ म-
म भार्या जनकजा सीता त्रैलोक्यसुंदरी॥ आवां मृगयया यातौ तदा केनापि रक्षसा॥ नीता सा तां विचि-
न्वंतावागतौ घोरकाननं॥ बाहुभ्यां वेष्टितावत्र तव प्राणरिरक्षया॥ छिन्नौ तव भुजौ त्वं च को वा विकृ-
तरूपधृक्॥ गंधर्व उवाच॥ धन्योहं यदि रामोसि आगतोसि ममांतिके॥ पुरा गंधर्वराजोहं रूपयौव-

न्दर्पितः॥ विचरन्लोकमखिलंवरनारीमनोहरः॥ तपसाब्रह्मणोलब्धमवध्यत्वंरघूत्तम॥ अष्टावक्रमुनिं
दृष्ट्वाकदाचिदहसंपुरा॥ क्रुद्धःसचाहदुष्टत्वंराक्षसोभवदुर्मते॥ अष्टावक्रःपुनःप्राहवंदितोमदयापरः॥
शापस्यांतंचमेप्राहतपसाद्योतितप्रभः॥ त्रेतायुगेदाशरथिर्भूत्वानारायणःस्वयं॥ आगमिष्यति
तेबाहूयोजनायतविस्तृतौ॥ छिंघतेवनमध्यस्थःसीतान्वेषणतत्परः॥ तेनशापाद्विनिर्मुक्तोभवि
ष्यसियथापुरा॥ इतिशप्तोहमद्राक्षंराक्षसींतनुमात्मनः॥ कदाचिद्देवराजानमभ्यद्रवमहंरुषा॥
सोपिवज्रेणमांराजन्शिरोदेशेभ्यताडयत्॥ ततश्शिरोगतंकुक्षिंपादौचरघुनंदन॥ ब्रह्मदत्तवरान्मे
मृत्युर्नाभूत्सैवजन्ताडनात्॥ मुखाभावेकथंजीवेदयमित्यमराधिपं॥ प्रोचुःसर्वेदयाविष्टाःमांविलोक्य
स्यवर्जितं॥ ततोमांप्राहमघवान्जठरेतेमुखंभवेत्॥ बाहूतेयोजनायामौभविष्यतइत्तवुजः॥
रूपत्कोत्रवसन्नित्यंबाहुभ्यांवनगोचरान्॥ भक्षयाम्यधुनाबाहूखंडितौमेत्वयानघ॥ इत्यःप
रं मांस्वत्रास्यतिक्षिप्याग्नौधनाहृते॥ अग्निनादह्यमानोहंत्वयारघुकुलोद्वह॥ पूर्वरूपमनुप्राप्य प्रा
र्थामिमार्गंवदामिते॥ रूत्यक्तोलक्ष्मणस्सएषाश्वभ्रंनिर्मायतद्वपुः॥ निक्षिप्यप्रादहत्काष्ठैस्ततो
देहात्समुत्थितः॥ कंदर्पसदृशाकारःसर्वाभरणभूषितः॥ रामंप्रदक्षिणंकृत्वासाष्टांगंप्रणिपत्यसः॥ ५७

कृतांजलिरुवाचेदंभक्तिगद्गदयागिरा॥ गंधर्वउवाच॥ ॥ सोमुत्सहतेमेघमन्तोरामातिसंस्तमानं॥ त्वामनंत
नमाद्यंतंमनोवाचामगोचरं॥ सूक्ष्मंतेरूपमव्यक्तंदेहद्वयविलक्षणं॥ दृग्रूपमितरत्सर्वंदृश्यंजडमनात्मकं॥ तत्कथं
त्वांविजानीयाद्व्यतिरिक्तमनःपथ॥ बुध्यात्मभासयोरैक्यंजीवइत्यभिधीयते॥ बुध्यादिसाक्षीब्रह्मैवतस्मिन्निर्वि
षयेखिलं॥ आरोप्यतेज्ञानवशान्निर्विकारेखिलात्मनि॥ हैरण्यगर्भंतेसूक्ष्मंदेहंस्थूलंविराट्स्मृतं॥ भावना ले४
विषयोरामसूक्ष्मंतेध्यातृमंगलं॥ भूतंभव्यंभविष्यच्च॥ यत्रेदंदृश्यतेजगत्॥ स्थूलेंडकोशेदेहेतेमहदादिभिरा
वृते॥ सप्तभिरुत्तरैर्गुणैर्वैराजोधारणाश्रयः॥ त्वमेवसर्वकैवल्यंलोकास्तेऽवयवाःस्मृताः॥ पातालंतेपादमूलंपा
र्ष्णिस्तथमहातलं॥ रसातलंतेमहाराम गुल्फौचतलातलमितीर्यते॥ जानुनीसुतलंराम ऊरूतेवितलंतथा॥ जघनं
तेमहीरामजघनंनाभिर्गगनंतः॥ ~~उरस्थलमाकाश॥ कदाचिद्देवराजानमभ्यद्रवमहंरुषा॥ सोपिवज्रेणमांराजन्शिरो~~
उरस्थलंतेज्योतींषिग्रीवातेमहउच्यते॥ वदनंजनलोकस्तेशंखदेशगं॥ सत्यलोकोरघुश्रेष्ठशीर्षण्यास्तेसदाप्रभो॥
इंद्रादयोलोकपालाबाहवस्तेदिशःश्रुती॥ अश्विनौनासिकेरामवक्त्रंतेग्निरुदाहृतः॥ चक्षुस्तेसविताराम
मनश्चंद्रउदाहृतः॥ भ्रूभंगएवकालस्तेबुद्धिस्तेवाक्पतिर्भवेत्॥ रुद्रोहंकाररूपस्तेवाचश्छंदांसितेव्यय॥
यमस्तेदंष्ट्रदेशस्थोनक्षत्राणिद्विजालयः॥ महामोहकरीमायाहसितंतेपांगमोक्षणं॥ धर्मःपुरस्तेधर्मश्च
पृष्ठभागउदाहृतः॥ निमेषोन्मेषणेरात्रिर्दिवाचैवरघूत्तम॥ समुद्राःसप्ततेकुक्षिर्नाड्योनद्यस्तवप्रभो॥ महि

तपस्ते

मानोप्यशक्तिस्त्वेवं स्थूलवपुस्तव ॥ यदिदं स्थूलरूपं ते तेन मनः संधार्यते श्रुते ॥ अनायासेन मुक्तिः स्यात्ततोन्यन्न हि
किंचन ॥ अतो हे राम ते रूपं स्थूलमेवानुचिंतये ॥ यस्मिन्ध्याते प्रेमरसः सरोमपुलको भवेत् ॥ तदैव मुक्तिः
साक्षात्प्रदाति स्थूलत्वानघः ॥ तदप्यास्तां तवैवाहं एतद्रूपं विचिंतये ॥ धनुर्बाणकरं श्यामं जटावल्कलभू
षणं ॥ अपीच्यवयसं सीतां विचिन्वंतं सलक्ष्मणं ॥ इदमेव सदा मे स्यान्मानसे रघुनंदन ॥ सर्वज्ञः शंकरः सा २:४
क्षात्पार्वत्या सहितः सदा ॥ त्वद्रूपमेव सततं ध्यायन्नास्ते रघूत्तम ॥ मुमूर्षूणां सदा काश्यां तारकं ब्रह्म वाच
कं ॥ रामरामेत्युपदिशन्सदा संतुष्टमानसः ॥ अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः ॥ सर्वे ते माय
या मूढास्त्वां न जानंति तत्त्वतः ॥ नमस्ते रामभद्राय वेधसे परमात्मने ॥ अयोध्याधिपते तुभ्यं नमः सौ
मित्रिसेवित ॥ त्राहि त्राहि जगन्नाथ मायया मां मावृणोतु ते ॥ श्रीरामचंद्र उ० ॥ तुष्टोहं दिव्यगंधर्व नत्या स्तु
त्या च तेनघ ॥ याहि मे परमं स्थानं योगिगम्यं सनातनं ॥ जपंति ये नित्यमनन्यबुध्या भक्त्या त्वदुक्तं स्त
वमागमोक्तं ॥ विज्ञानसंभूतभवं विहाय मां यांति नित्यानुभवानुमेयं ॥ ॥ इति श्रीमदध्यात्मरामायणे
उमामहेश्वरसंवादे आरण्यकांडे नवमः सर्गः ॥ ॥ महादेव उवाच ॥ ततो वरः स गंधर्वः प्रयास्यन्राममब्रवीत् ॥ श
बर्यास्ते पुरो नाग आश्रमे रघुनंदन ॥ नत्वा त्वत्पादकमले न हि मार्गविशारदा ॥ तां याहि महाभाग स
र्वं ते कथयिष्यति ॥ इत्युक्त्वा स ययौ सोपि विमानेनार्कवर्चसा ॥ विष्णोः पदं रामनामस्मरणफलमीदृशं ॥

५८

लात हि पितं घोरं हित्वा धृतादिकार्चितं ॥ रामः प्रापाश्रमपदं शबर्या रघुनंदनः ॥ शबरी राममालोक्य
लक्ष्मणेन समन्वितं ॥ आयांतमाराद्धर्षेण गत्वा प्रत्युत्थायाचिरेण सा ॥ पतित्वा पादयोरग्रे हर्षपूर्णाश्रुलोचना
॥ स्वागतेनाभिनंद्याथ स्वासने संन्यवेशयत् ॥ रामलक्ष्मणयोः सम्यक्पादौ प्रक्षाल्य भक्तितः ॥ तज्जले २४
नाभिषिच्यांगमथार्घ्यादिभिरादृता ॥ संपूज्य विधिवद्रामं ससौमित्रिं सपर्यया ॥ संगृहीतानि दिव्यानि रामा
र्थं शबरी मुदा ॥ फलान्यमृतकल्पानि ददौ रामाय भक्तितः ॥ पादौ संपूज्य कुसुमैः सुगंधैः सानुलेपनैः ॥ कृताति
थ्यं रघुश्रेष्ठमुपविष्टं सहानुजं ॥ शबरी भक्तिसंपन्ना प्रांजलिर्वाक्यमब्रवीत् ॥ अत्राश्रमे रघुश्रेष्ठ गुरवो मे मह
र्षयः ॥ स्थिताः सतीत्यध्याहारः शुश्रूषणं तेषां कुर्वती समुपस्थिता ॥ बहुवर्षसहस्राणि गतास्ते ब्रह्मणः पदं ॥
ध्यंतो ब्रुवन्मां त्वं वसात्रैव समाहिता ॥ रामो दाशरथिर्जातः परमात्मा सनातनः ॥ राक्षसानां वधार्थाय
ऋषीणां रक्षणाय च ॥ आगमिष्यति सर्वात्मा ध्यानान्निष्ठा स्थिरा भव ॥ इदानीं चित्रकूटाद्रावागतोसीति मे
श्रुतं ॥ कलेवरं तु रक्षामि त्वदागमनकांक्षया ॥ ~~[illegible]~~
~~[illegible]~~ ॥ दृष्ट्वैव राघवं दग्ध्वा देहं यास्यामि तत्पदं ॥ तथैवाकरवं राम त्वद्ध्यानपराय
णा ॥ अतीव गमनं तेद्य सफलं गुरुसत्तमचित्त ॥ तत्सर्वं राम त्वद्ध्यानेकपरायणमयि मे न हि ॥ यो
षिन्मूढाधमे यास्मिन्हीनजातिसमुद्भवा ॥ तव दासस्य दासानां शतसंख्योत्तरस्य वा ॥ दासीत्वे नाधिका

दोस्मि कुतः साक्षात्त्वैव वाहं। कथं रामा घनेह स्तस्त मनोवाग गोचरः॥ स्तोतुं न जाने देवेशा किं करोमि प्रसी
द मे॥ श्रीराम उवाच॥ पुंस्त्वे स्त्रीत्वे विशेषो वा जातिनामाश्रमादयः॥ न कारणं मद्भजने भक्तिरेव हि कारणं॥ य
ज्ञदानतपोभिर्वा वेदाध्ययनकर्मभिः॥ नैव द्रष्टुमहं शक्यो मद्भक्तिविमुखैः सदा॥ तस्माद्भामिनि सं
क्षेपाद्वक्ष्येहं भक्तिसाधनं॥ सतां संगतिरेवात्र साधनं प्रथमं स्मृतं॥ द्वितीयं मत्कथालापस्तृती
यं मद्गुणेरणं॥ व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत्॥ आचार्योपासनं भद्रे मद्बुध्यामाययास राम
दा॥ पंचमं पुण्यशीलत्वं यमादि नियमादि च॥ रतिर्मत्पूजने नित्यं षष्ठं साधनमीरितं॥ मम मंत्रो
पासकत्वं सांगं सप्तममुच्यते॥ मद्भक्तेष्वधिका पूजा सर्वभूतेषु मन्मतिः॥ बाह्यार्थेषु विरागित्वं श
मादिसहितं तथा॥ अष्टमं नवमं तत्त्वविचार [illegible] पित मम भामिनि॥ एवं नवविधा भ
क्तिः साधनं यस्य कस्य वा॥ स्त्रियो वा पुरुषस्यापि तिर्यग्योनिगतस्य वा॥ भक्तिः संजायते प्रेम
लक्षणा शुभलक्षणे॥ भक्तौ संजातमात्रायां मत्तत्त्वानुभवस्तदा॥ ममानुभवसिद्धस्य मुक्तिस्त
त्रैव जन्मनि॥ स्यात्तस्मात्कारणं भक्तिर्मोक्षस्येति सुनिश्चितं॥ प्रथमं साधनं यस्य भवेत्तस्य क्र
मेण तु॥ भवेत्सर्वं ततो भक्तिर्मुक्तिरेवेति निश्चिता॥ तस्मान्मद्भक्तियुक्ता त्वं ततोहं त्वामुपस्थि
तः॥ इतो मद्दर्शनान्मुक्तिस्तव नास्त्यत्र संशयः॥ यदि जानासि मे ब्रूहि सीता कमललोचना॥ कुत्रास्ते ५६

क्रोशमात्रं सुविस्तीर्णमगाधामलसंवरं॥ उत्फुल्लांबुजकल्हारकुमुदोत्पलमंडितं॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितं
जलकुक्कुटकोयष्टिक्रौंचनादोपनादितं॥ नानापुष्पलताकीर्णं नानाफलसमावृतं॥ मनः सतां यथा स्वच्छं पद्मकिंजल्क
वासितं॥ तत्रोपस्पृश्य सलिलं पीत्वा अहरं विभुः॥ सानुजः सरसस्तीरे शीतले नयथाययै॥ ऋष्यमूकगिरेः पा
र्श्वे गच्छंतौ रामलक्ष्मणौ॥ धनुर्बाणकरौ दांतौ जटावल्कलमंडितौ॥ पश्यंतौ विविधान्वृक्षान्गिरेः शोभां सुविस्मि
तौ॥ सुग्रीवस्तु गिरेर्मूर्ध्नि चतुर्भिः सह वानरैः॥ स्थित्वा ददर्श तौ यांतौ आरुरोह गिरेः शिरः॥ भयादाह हनूमंतं कौ
तौ वीरवरौ सखे॥ सुग्रीव उवाच॥ गच्छ जानीहि भद्रं ते बटुर्भूत्वा द्विजाकृतिः॥ वालिना प्रेषितौ किं ह्यौ संज्ञातुं मे रु
कराग्यतः॥ ताविंचू यात तथा त्वं वक्रो ह्रस्वं जानीहि निश्चयं॥ तथेति बटुरूपेण हनुमान्समुपागतः॥ विनयावन राम
तो भूत्वा राममन्त्वेदमब्रवीत्॥ कौ युवां पुरुषव्याघ्रौ युवानौ वीरसंमितौ॥ द्योतयंतौ दिशः सर्वाः प्रभया भा
स्कराविव॥ युवां त्रैलोक्यकर्त्ताराविति भाति मनो मम॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ॥ मायया मानु
षाकारौ चरंताविव लीलया॥ भूभारहरणार्थाय भक्तानां पालनाय च॥ अवतीर्णाविवरौ चरंतौ क्षत्रियाकृती॥
जगत्स्थितिलयौ सर्गं लीलया कर्तुमुद्यतौ॥ स्वतंत्रौ प्रेरकौ सर्वहृदयस्थाविवेश्वरौ॥ नरनारायणौ लो
के चरंताविति मे मतिः॥ श्रीरामो लक्ष्मणं प्राह पश्यैनं बटुरूपिणं॥ शब्दशास्त्रमशेषेण श्रुतं नूनमनेकधा॥
अनेन भाषितं कृत्स्नं न किंचिदपशब्दितं॥ ततः प्राह हनूमंतं राघवो ज्ञानविग्रहः॥ अहं दाशरथी रामस्त्वयं मे लक्ष्मणो
नुजः॥ सीतया भार्यया सार्द्धं पितुर्वचनगौरवात्॥ आगतस्तत्र विपिने स्थितोहं दंडके द्विज॥ तत्र भार्या हृता सीता र

३०२

केनवानीताप्रियामेप्रियदर्शना॥ शबर्युवाच॥ देवत्वंकिंनजानासिसर्वज्ञोविश्वभावन॥ तथापिपृ
ष्ठसेयन्मांलोकाननुसृतःप्रभो॥ अतोहंवच्मिधास्यामिसीतायत्राधुनास्थिता॥ रावणेनहृतासीतालंका
यांवर्ततेधुना॥ इतःसमीपेरामास्तेपंपानामसरोवरं॥ ऋष्यमूकगिरिर्नामतत्समीपेमहान्नगः॥ चतु
र्भिर्मंत्रिभिःसार्धंसुग्रीवोवानराधिपः॥ भीतभीतःसदातत्रतिष्ठत्यनिलविक्रमः॥ वालिनश्चैवत
च्छापात्तदगम्यमशेषतः॥ वालिनस्तत्रगन्तव्येतेनसख्यंकुरुप्रभो॥ सुग्रीवेणससर्वंतेका
र्यंसंपादयिष्यति॥ अहंत्वग्निंप्रवेक्ष्यामितवाग्रेरघुनंदन॥ मुहूर्तंतिष्ठराजेंद्रयावद्दग्ध्वाकलेवरं॥
न यास्यामितवनंरामतवविष्णोःपरंपदं॥ इतिरामंसमाभाष्यसाविवेशहुताशनं॥ क्षणान्निर्धूयसकल
मविद्याकृतबंधनं॥ रामप्रसादाच्छबरीमोक्षंप्राप्तातिदुर्लभं॥ किंदुष्करंजगन्नाथेश्रीरामेभक्तव
त्सले॥ प्रसन्नेऽधमजन्मापिशबरीमुक्तिमापसा॥ किंपुनर्ब्राह्मणमुख्याःपुण्याःश्रीरामचिंतकाः॥ मुक्ति
यांतीतितद्भक्तिर्मुक्तिरेवनसंशयः॥ भक्तिर्मुक्तिविधायिनीभगवतःश्रीरामचंद्रस्यहेलोकाःकामदुघाङ्घ्रि
पद्मयुगलंसेवध्वमत्युत्सुकाः॥ नानाज्ञानविशेषमंत्रविततिंत्यक्त्वासुदूरेभृशंरामंश्यामतनुंस्म
रारिहृदयेभांतंभजध्वंबुधाः॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेदशमःसर्गः॥ ॥ आ
रण्यमध्यमाश्लोकविपर्यस्ता॥ पंचशतानिश्लोकाःपापहरापार्वतिप्रोक्ताः॥ [illegible] ॥ [illegible] ॥ आरण्य
कांडसमाप्त॥ शिवउवाच॥ ततःसलक्ष्मणोरामःशनैःपंपातरःस्थलं॥ आगत्यसरसांश्रेष्ठंदृष्ट्वाविस्मयमाययौ॥ १॥

म्रसाकेनचिन्मम॥ तामन्वेष्टुमिहायातौत्वंकोवाकस्यवानोवद॥ हनूमानुवाच॥ सुग्रीवोनामराजास्तेवानराणांमहा
मते॥ चतुर्भिर्मंत्रिभिःसार्द्धंगिरिमूर्द्धनितिष्ठति॥ भ्राताकनीयान्सुग्रीवोवालिनःपापचेतसः॥ तेननिःकासि
ताभार्याहृतातस्यैवधार्षिता॥ तद्भयादृष्यमूकाख्यंगिरिंनित्यंसमास्थितः॥ अहंसुग्रीवसचिवोवायुपुत्रो
महामते॥ हनूमान्नामविख्यातोअंजनीगर्भसंभवः॥ तेनसख्यंत्वयाकुर्यात्सुग्रीवेणरघूत्तम॥ भार्यापहा
रिणंहंतुंसहायस्तेभविष्यति॥ इदानीमेवगच्छामआगच्छयदिरोचते॥ श्रीरामउवाच॥ अहमप्यागतस्तेनसख्यं
र्तुंकपीश्वर॥ सख्युस्तस्यापियत्कार्यंतत्कारिष्याम्यशेषतः॥ हनूमान्स्वस्वरूपेणस्थितोराममथाब्रवीत्॥
आरोहतममस्कंधौगच्छामःपर्वतोपरि॥ यत्रतिष्ठतिसुग्रीवोमंत्रिभिर्वालिनोभयात्॥ तथेतितस्यारुरो
हस्कंधंरामोथलक्ष्मणः॥ उत्पपातगिरेर्मूर्ध्निक्षणादेवमहाकपिः॥ वृक्षछायांसमाश्रित्यस्थितौतौरामलक्ष्म
णौ॥ हनूमानपिसुग्रीवमुपगम्यकृतांजलिः॥ व्येतुतेभयमायातौराजन्श्रीरामलक्ष्मणौ॥ शीघ्रमुत्तिष्ठरामे
णसख्यंतेयोजितंमया॥ अग्निंसाक्षिणमारोप्यतेनसख्यंद्रुतंकुरु॥ ततोतिहर्षात्सुग्रीवःसमागम्यर
घूत्तमं॥ वृक्षशाखांस्वयंछित्वाविष्टरंसंददौमुदा॥ हनूमाँल्लक्ष्मणायादात्सुग्रीवायचलक्ष्मणः॥ ह
र्षेणमुहूर्ताविष्टाःसर्वएवावतस्थिरे॥ लक्ष्मणस्त्वब्रवीत्सर्वंरामवृत्तान्तमादितः॥ वनवासाभिगमनंसी
ताहरणमेवच॥ लक्ष्मणेनैवमुक्तस्तुसुग्रीवोराममब्रवीत्॥ सुग्रीवउवाच॥ अहंकरिष्येराजेंद्रसीतायाःपरिम

र्गलं॥ सहायमप्यितेराम करिष्ये शत्रुघातिनः॥ शृणु राम मया दृष्टं किंचिच्चिह्नं कथाम्यहं॥ एकदा मंत्रिभिः सा
र्धं स्थितोहं गिरिमूर्धनि॥ विहायसा नीयमाना केनचित्प्रमदोत्तमा॥ क्रोशंती राम रामेति दृष्ट्वास्मान्पर्वतोप
रि॥ विमुच्याभरणान्याशु स्वोत्तरीयेण भामिनी॥ निरीक्ष्याधो विसृज्याथ क्रोशंती तेन रक्षसा॥ नीताहं तु भूषणा
न्याशु गुहायामक्षिपं तदा॥ इदानीमपि पश्य त्वं जानीहि तव वा न वा॥ इत्युक्त्वानीय रामाय दर्शयामास
वानरः॥ विमुच्य रामस्तद्दृष्ट्वा हा सीतेति मुहुर्मुहुः॥ हृदि निक्षिप्य तत्सर्वं रुरोद प्राकृतो यथा॥ आश्वास्य राघ
वं भ्राता लक्ष्मणो वाक्यमब्रवीत्॥ लक्ष्मण उवाच॥ अचिरेणैव ते राम प्राप्स्यते जानकी शुभा॥ वानरेंद्रसहा
येन हत्वा रावणमाहवे॥ सुग्रीव उवाच॥ राम राम महाबाहो शृणु मे वचनं परं॥ रावणं तं हनिष्यामि सादात्त
वसुव्रत॥ ततो हनूमान्प्रज्वाल्य तयोरग्निं समीपतः॥ तावुभौ रामसुग्रीवौ अग्नौ साक्षिणि तिष्ठति॥ बाहू प्र
सार्य चालिंग्य परस्परमकल्मषौ॥ समीपे रघुनाथस्य सुग्रीवः समुपाविशत्॥ वितत्थितुं दुःखं कथया
मास रघुनायके॥ सख्ये शृणु मनो दुःखं वालिना यत्कृतं पुरा॥ मयपुत्रोथ मायावी नाम्नापरम
दुर्मदः॥ किष्किंधां समुपागत्य वालिनं समुपाह्वयत्॥ सिंहनादेन महता वाली तु तदमर्षणः॥ निर्ययौ क्रो
धताम्राक्षो जघान दृढमुष्टिना॥ दुद्राव तेन संविग्नो मायावी स्वगुहां प्रति॥ अनुदुद्राव तं वाली मायाविनं महत्तथा॥ त
तः प्रविष्टमालोक्य गुहां मायाविनं रुषा॥ वाली मामाह तिष्ठ त्वं बहिर्गत्वाद्य हं गुहां॥ इत्युक्त्वा विवेश स गुहां

राम

मासमेकं विनिर्ययौ॥ मासादूर्ध्वं गुहद्वारान्निर्गतं रुधिरं बहु॥ तद्दृष्ट्वा परितप्तांगो मृतो वालीति दुःखितः॥ गु
हाद्वारि शिलामेकां पिधाय गृहमागतः॥ ततो ब्रवन्मृतो वाली गुहायां रक्षसा हतः॥ तच्छ्रुत्वा दुःखिताः सर्वे
मामभिषेतमच्युत॥ राज्याभिषेचनं चक्रुः सर्वे वानरमंत्रिणः॥ किंचित्कालं मया राज्ये कृते समरिंदम
॥ ततः समागतो वाली मामाह परुषं रुषा॥ बहुधा भर्त्सयित्वा मां निजघान समुष्टिभिः॥ ततो निर्गत्य नग
राद्धावं परयापरया भिया॥ लोकान्सर्वान्परिक्रम्य ऋष्यमूकमुपाश्रितः॥ ऋषेः शापभयात्सोपि नाया
तीम गिरिं प्रति॥ तदादि मम भार्यां स स्वयं भुंक्ते विमूढधीः॥ अतो दुःखितसंतप्तो हृतदारो हताश्रयः॥
न साम्यद्य तव पादस्पर्शात्सुखितो ह्यहं॥ मित्रदुःखेन संतप्तो रामो राजीवलोचनः॥ हनिष्यामि
तव द्वेष्टारं शीघ्रं भार्यापहारिणं॥ इति प्रतिज्ञामकरोत्सुग्रीवस्य पुरस्तदा॥ सुग्रीवोप्याह राजेंद्र वा
ली बलवतां बली॥ कथं हनिष्यसि त्वं तं देवैरपि दुरासदं॥ सुग्रीव उवाच॥ शृणु तत्कथयिष्यामि तद्बलं व
नावर॥ कदाचिद्दुंदुभिर्नाम महाकायो महाबलः॥ किष्किंधामगमद्राम महामहिषरूपधृक्॥ युद्धा
य वालिनं रात्रौ समाह्वयत भीषणः॥ तच्छ्रुत्वा सहमानोसौ वाली परमकोपनः॥ महिषं शृंगयोर्धृ
त्वा तं पातयामास भूतले॥ पादेनैकेन तत्कायमाक्रम्यास्य शिरो महत्॥ हस्ताभ्यां भ्रामयित्वा तो
लयित्वाक्षिपद्भुवि॥ पपात तच्छिरो राम मातंगाश्रमसंनिधौ॥ योजनाद्यति तं तस्माद्रुधिराश्च मंड
लैरक्तबिंदुः प्रपीतोन्यैः महष्टातां क्रोधमूर्छितः॥ मातंगो वालिनं प्राह यदागंतासि मे गिरिं॥ इतः परं न

य छिदो मरिष्यामि न संशयः॥ एवं शप्तस्तदारभ्य ऋष्यमूकं न यात्यसौ॥ एतज्ज्ञात्वाहमप्यत्र वसामि भयवर्जितः॥
रामं पश्य शिरस्तस्य दुंदुभेः पर्वतोपमं॥ तत्क्षेपे परा शक्तिः शक्तः स्याद्वालिनो वधे॥ इत्युक्त्वा दर्शयामास शि-
रस्तद्गिरिसन्निभं॥ दृष्ट्वा रामः स्मितं कृत्वा पादांगुष्ठेन चाक्षिपत्॥ दशयोजनपर्यंतं तदद्भुतमिवाभवत्॥ साधु
साध्विति तं प्राह सुग्रीवो मंत्रिभिः सह॥ पुनरप्याह सुग्रीवो रामं भक्तपरायणं॥ एते ताला महासाराः सप्त पश्य र-
घूत्तम॥ एकैकं चालयित्वासौ निःसत्वं कुरुते क्षणात्॥ यदि त्वमेकबाणेन विध्वा छिद्रं करोषि चेत्॥ हतस्त-
या वाली विश्वासो मे प्रजायते॥ तथेति धनुरादाय सायकं तत्र संदधे॥ बिभेद च तदा रामः सप्ततालान्महा-
बलः तालान्सप्त विनिर्भिद्य गिरिं भूमिं च सायकः॥ पुनरागत्य रामस्य तूणीरे पूर्ववत्स्थितः॥ ततोऽतिहर्षात्सुग्री- रा०५
वो राममाहातिविस्मितः। देव त्वं जगतां नाथः परमात्मा न संशयः॥ मत्पूर्वकृतपुण्यौघैः संगतोऽद्य मया सह।
त्वां भजंति महात्मानः संसारविनिवृत्तये॥ त्वां प्राप्य मोक्षसचिवं प्रार्थयेऽहं कथं भवं॥ दाराः पुत्रा धनं राज्यं सर्वं त्वन्माययाकृतं॥
हं अतोऽहं देवदेवेश नाकांक्षेऽन्यत्प्रसीद मे॥ आनंदानुभवं त्वाद्य प्राप्तोऽहं भाग्यगौरवात्॥ मृदर्थं यतमानेन निधानमिव सत्पते
अनाद्यविद्यासंसिद्धं बंधनं छिन्नमद्य नः॥ यज्ञदानतपःकर्मपूर्तेष्टादिभिरप्यसौ॥ न जीर्यं पुनर्दीर्घं न जंते संस्थिति-
प्रभो त्वत्पाददर्शनात्सद्यो नाशमेति न संशयः॥ क्षणार्धमपि यच्चित्तं त्वयि तिष्ठत्यचंचलं॥ तस्याज्ञानमनर्थानां मूलं नश्य-
ति तत्क्षणात्॥ तत्तिष्ठतु मनो राम त्वयि वान्यत्र वा सदा॥ राम रामेति यद्वाणी मधुरं गायति क्षणं॥ स ब्रह्महा सुरापो वा मु-
च्यते सर्वपातकैः॥ न कांक्षे विजयं राम न दारसुखबांधवान्॥ भक्तिमेव सदा कांक्षे त्वयि बंधविमोचनीं॥ त्वन्मायाकृतसंसारस्त्वदंशोऽहं

रघूत्तम॥ त्वत्पादभक्तिमुद्दिश्य ग्राहिसांत्वसंकटात्॥ पूर्वं मित्रार्युदासीनास्त्वन्मायावृतचेतसः॥ आसन्मेऽद्य भवत्पाददर्शना-
देव राघव॥ सर्वं ब्रह्मैव मे भाति क्व मित्रं क्व च मे रिपुः॥ यावत्त्वन्मायया बद्धस्तावद्गुणविशेषता॥ सा यावदस्ति नानात्वं
तावद्भवति नान्यथा॥ यावन्नानात्वमज्ञानात्तावत्कालकृतं भयं॥ अतोऽविद्यामुपास्ते यः सोऽन्धे तमसि मज्जति॥ मायामू-
लमिदं सर्वं पुत्रदारादिबंधनं॥ तदुत्सारय मायां त्वं दासीं तव रघूत्तम॥ त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वन्नामसंगीत-
रसार्द्रवाणी॥ त्वद्भक्तिसेवानिरतौ करौ मे त्वदंगसंगं लभतां मदंगं॥ त्वन्मूर्तिभक्तान्स्वगुरुं च चक्षुः पश्यत्वजस्रं स शृ-
णोतु कर्णः॥ त्वज्जन्मकर्माणि च पादयुग्मं व्रजत्वजस्रं तव मंदिराणि॥ अंगानि ते पादरजोविमिश्रतीर्थानि बिभर्त्वहि-
शत्रुकेतो॥ शिरस्त्वदीयं भवपद्मजाद्यैर्जुष्टं पदं राम नमत्वजस्रं॥ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधा-
कांडे सुग्रीवसमागमो नाम प्रथमः सर्गः॥ ॥ ॥ श्री तदुपाख्या॥ ॥श्री॥ कृते स्वात्मपरिष्वंगनिर्धूताशेषकल्मषः॥ रामः सुग्री-
वमालोक्य सस्मितं वाक्यमब्रवीत्॥ श्रीरामचंद्र उवाच॥ मायां मोहकरीं तस्मिन्वितन्वन्कार्यसिद्धये॥ सखे त्वदुक्तं यत्तन्मे
सत्यमेव न संशयः॥ किंतु लोका वदिष्यंति मामेवं रघुनंदनः॥ कृतवान्किं कपींद्राय सख्यं कृत्वाग्निसाक्षिकं॥ इति लो-
कापवादो मे भविष्यति न संशयः॥ तस्मादाह्वय भद्रं ते गत्वा युद्धाय वालिनं॥ बाणेनैकेन तं हत्वा राज्ये त्वामभिषे-
चये॥ तथेति गत्वा सुग्रीवः किष्किंधोपवनं द्रुतं॥ गत्वा शब्दं महानादं तमाह्वयत वालिनं॥ तच्छ्रुत्वा भ्रात-
निनदं रोषताम्रायतेक्षणः॥ निर्जगाम गृहाच्छीघ्रं सुग्रीवो यत्र वानरः॥ तमापतंतं सुग्रीवः शीघ्रं वक्षस्यताड-
यत्॥ सुग्रीवमपि मुष्टिभ्यां जघान क्रोधमूर्छितः॥ वाली तमपि सुग्रीव एवं क्रुद्धौ परस्परं॥ अयुध्येतामेव

रूपेणैकसूत्रो रामोऽतिविस्मितः ॥ न मुमोच तदा बाणं सुग्रीववधशंकया ॥ ततो द्रुतं ससुग्रीवो वनमत्रं स्तंभयाकुलः ॥ वालिना हन्यमानेषु यथा सुग्री-
वो राममब्रवीत् ॥ सुग्रीव उ० ॥ किमां घातयसे राम शत्रुणा भ्रातृरूपिणा ॥ यदि मद्हननेच्छा त्वमेव ब्रूहि मां स्थितो ॥ एवमेव त्यजे
प्राणांस्तवाग्रे रघूत्तम ॥ उपेक्षसे किमर्थं त्वं शरणागतवत्सल ॥ श्रुत्वा सुग्रीववचनं रामः साश्रुविलोचनः ॥ क्षमा-
पये समाश्लिष्य [illegible] द्दृष्ट्वा वामेकरूपिणौ ॥ मित्रघातित्वभयतो मुक्तो वा सायको न हि ॥ इदानीमेव ते वीर चि-
ह्नं [illegible] तमश्रान्तये ॥ गत्वाहूय पुनः शत्रुं हतं द्रक्ष्यसि वालिनं ॥ रामोऽहं त्वां शपे भ्रातर्हनिष्यामि रिपुं क्षणान्
॥ इत्युक्त्वाश्वासयन् सुग्रीवं रामो लक्ष्मणमब्रवीत् ॥ श्रीराम उवाच ॥ सुग्रीवस्य गले पुष्पमालामामुच्य स्थितं ॥
प्रेषयस्व महाभागं सुग्रीवं वालिनं प्रति ॥ लक्ष्मणस्तु तदा बद्ध्वा गच्छ गच्छेति सादरं ॥ प्रेषयामास सुग्रीवं सोपि
गत्वा तथाकरोत् ॥ पुनरप्यद्भुतं शब्दं कृत्वा वालिनमाह्वयत् ॥ तच्छ्रुत्वा विस्मितो वाली क्रोधेन महतावृतः ॥
बद्ध्वा परिकरं सम्यक् गमनायोपचक्रमे ॥ गच्छंतं वालिनं तारा निश्चित्य वेधतं ॥ न गंतव्यं त्वयेदानीं शंका
मे तीव्र जायते ॥ इदानीमेव ते भग्नः पुनः रायाति सत्वरं ॥ सहायो बलवान् तस्य कश्चिन्नूनं समागतः ॥
॥ वाली तामाह सुश्रोणि कातरत्वे तु साध्विये ॥ करसंत्यज मे शीघ्रं गच्छामि तं रिपुं ॥ हत्वा शीघ्रं समायास्ये
सहाय तस्य यो भवेत् ॥ स सहायो यदि त्राता तातो हत्वा नयं [illegible] ॥ ताराया मिमा वचः श्रु[illegible] कथयति ष्ट
[illegible] ॥ तारा उ० ॥ मत्तो न्य[illegible] राजेंद्र [illegible] यचोचितं ॥ [illegible]

६२

यांचक्रुस्ते वचः ॥ अयोध्याधिपतिः श्रीमान् रामो दाशरथिः किल ॥ लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥ आगतो दंडकारण्यं तत्र सीता
हृता किल ॥ रावणेन स सह भ्रात्रा मार्गमाणोऽथ जानकीं ॥ आगतोऽत्र [illegible] कपिः सुग्रीवेण समागतः ॥ चकार तेन सुग्रीवः सख्यं चा-
नलसाक्षिकं ॥ प्रतिज्ञा कृतवान् रामः सुग्रीवाय सलक्ष्मणः ॥ हत्वा वालिनं समरे हत्वा राजानं त्वां करोम्यहं ॥ इति निश्चित्य तौ याता तो याता
निश्चयं शृणु मद्वचः ॥ इदानीमेव ते भग्नः कथं पुनरुपागतः ॥ अतस्त्वं सर्ववैरं त्यक्त्वा सुग्रीवमानय ॥ यौवराज्ये निधाय त्वां पु-
रामं तं शरणं व्रज ॥ पाहि मामंगदं राज्यं कुलं हरिपुंगव ॥ अन्यच्च ते शृणु प्राज्ञ दुर्मद हत्कारणमुच्यते ॥ मातंगाद्रिसमीपे तु स्थापितं दुं-
दुभेः शिरः ॥ अंगुष्ठाग्रेण रामेण क्षिप्तं तद्दृश्यो जनं ॥ सप्ततालाश्च [illegible] ॥ इत्युक्त्वाश्रुमुखी तारा पादयोः प्र-
णिपत्य तं ॥ हस्ताभ्यां चरणौ धृत्वा हरोदनयविह्वला ॥ तामालिंग्य तदा वाली सस्नेहमिदमब्रवीत् ॥ वालि उ० ॥ स्त्रीस्वभावा-
द्बिभेषि त्वं प्रिये नास्ति भयं मम ॥ रामो यदि समायातो लक्ष्मणेन सह प्रभुः ॥ तदा रामेण मे स्नेहो भविष्यति संशयः ॥ रामो ना-
रायणः साक्षाद्देवताः सर्वे विलक्षणः ॥ नूनं नारदेनाख्यातं श्रुतं पूर्वं मयानघे ॥ स्वपरः परयश्चौ वा नास्ति तस्य परात्मनः ॥
आनेष्यामि गृहं साधिन त्वात् [illegible] शरणं बुजे ॥ भजेतानुभजत्येष भक्तिगम्यः परेश्वरः ॥ यदा स्वयं समायाति सुग्रीवो हन्मि तं
क्षणात् ॥ युद्धं कृत्वा यौवराज्याय सुग्रीवस्याभिषेचनं ॥ कथमाहूयमानोऽहं युद्धाय रिपुणा प्रिये ॥ शूरोऽहं सर्वलोकानां संमतः
शत्रुलक्षणे ॥ नीतानीत इदं वाक्यं कथं वालीवदेत् प्रिये ॥ तस्माच्छोकं परित्यज्य तिष्ठ सुंदरि वेश्मनि ॥ एवमाश्वास्य तां तारां शो-

दंतीमश्रुलोचनां ॥ ततो वाली समुद्युक्तः सुग्रीवस्य वधाय सः ॥ दृष्ट्वा वालिनमायांतं सुग्रीवो भीमविक्रमः ॥ उत्पपात गले बद्धपुष्पमा
लः पतंगवत् ॥ मुष्टिभ्यां ताडयामास वालिनं सोपि तं तथा ॥ अहन्वाली च सुग्रीवं सुग्रीवो वालिनं तथा ॥ रामं विलोकयन्नेव सुग्री
वो मुहुर्मुहुः ॥ इत्येवं युध्यमानौ तौ दृष्ट्वा रामः प्रतापवान् ॥ बाणमादाय तूणीरात् ॥ एतं धनुषि संदधे ॥ अहूय कर्णपर्यंतमदृश्यो
वृक्षखंडगः ॥ निरीक्ष्य वालिनं सम्यग्लक्ष्यं कृत्वा तद्धृदयं हरिः ॥ उत्ससर्जाशनिसमं महावेगं महाबलः ॥ विनेद सशरो वक्षो वालिनः राम
कंपयन्महीं ॥ उत्पतन्महाशब्दं मुंचन्सन्निपपात ह ॥ तदा मुहूर्तं निःसंज्ञो भूत्वा चेतनमाप सः ॥ ततो वाली ददर्शाग्रे रामं राजीवलो
चनं ॥ धनुरालंब्य वामेन हस्तेनान्येन सायकं ॥ बिभ्राणं चीरवसनं जटामुकुटधारिणं ॥ विशालवक्षसं भ्राजद्वनमालावि
भूषितं ॥ पीनचार्वायतभुजं नवदूर्वादलच्छविं ॥ सुग्रीवलक्ष्मणाभ्यां च पार्श्वयोः परिसेवितं ॥ विलोक्य शनकैः प्राह वाली रामं वि
गर्हयन् ॥ वालि उवाच ॥ किं मया पकृतं राम तव येन हतोस्म्यहं ॥ राजधर्ममविज्ञाय गर्हितं कर्म ते कृतं ॥ वृक्षखंडे तिरोभूत्वा ६६
त्यजता मयि सायकं ॥ यशः किं लप्स्यसे राम चौरवत्कृतसंगरः ॥ यदि क्षत्रियदायादो मनुवंशसमुद्भवः ॥ युद्धं कृत्वा समं मेऽश
स्यते तत्कृतं तदा ॥ सुग्रीवेण कृतं किं ते मया वा न कृतं किमु ॥ रावणेन हृता भार्या तव राम महावने ॥ सुग्रीवं शरणं यातस्त्वद
र्थमिति शुश्रुम ॥ बत राम न जानीषे मद्बलं लोकविश्रुतं ॥ रावणं सकुलं बध्वा ससीतं लंकया सह ॥ आनयामि मुहूर्ते
धीतया दिवैकांति राघव ॥ धर्मिष्ठ इति लोकेस्मिन्कथ्यसे रघुनंदन ॥ वानरं व्याधवद्धत्वा धर्मं किं लप्स्यसे वद ॥ अभक्ष्यं वानरं
मांसं हत्वा मां किं करिष्यसि ॥ इत्येवं बहु भाषंतं वालिनं राघवोब्रवीत् ॥ धर्मस्य गोप्ता लोकेस्मिंश्चरामि सशरासनः ॥ अधर्म

एहत्वा सद्धर्मं पालयाम्यहं ॥ दुहिता भगिनी चानुज भार्या चैव तथा स्नुषा ॥ समा यो रमते तासामेकयापि विमूढधीः ॥ पातकी स
मि विज्ञेयः स वध्यो राजभिः सदा ॥ त्वं तु कनिष्ठस्य भार्यायां रमसे बलात् ॥ अतो मया धर्मविदा हतोसि वनगोचर ॥ त्वं कपि
जानीषे महान्विचरति हि ॥ लोकं पुनानाः संचारैरतस्त्वं नातिभाषयेत् ॥ तच्छ्रुत्वा भयसंविग्नो ज्ञात्वा रामं रमा
त्वा पतिं ॥ वालिः प्रणम्य रभसा रामं वचनमब्रवीत् ॥ वालि उवाच ॥ राम राम महाभाग जाने त्वां परमेश्वरं ॥ अज्ञा
प नया किंचिदुक्तं तत्क्षंतुमर्हसि ॥ साक्षात्वत्करघातेन विशेषेन वाग्यः ॥ त्यजाम्यसून्महायोगिन्दुर्लभं तव दर्श
नत नं नामविवशो गृन्ह्नियमाणः परं पदं ॥ याति साक्षात्स त्वाद्य मुमूर्षोर्मे पुरःस्थितः ॥ देव जानामि पुरु
नं षं श्रियं जानकीं शुभां ॥ रावणस्य वधार्थाय जातं त्वां ब्रह्मणार्थितं ॥ अनुजानीहि मां राम यांतं त्वत्पद मु त्त
ष मत्तुल्यबले बाले अंगदे त्वं दयां कुरु ॥ विशल्यं कुरु मे राम हृदयं पाणिना स्पृशन् ॥ तथेति तद्बाणमु ति
ते द्धृत्य रामः पस्पर्श पाणिना ॥ त्यक्त्वा तद्वानरं देहं अमरेंद्रोऽभवत्क्षणात् ॥ वाली रघूत्तमशराभिहतो विमृष्टो रा
द तलवरेण सुखाकरेण ॥ सद्यो विमुच्य कपिदेहमनन्यलभ्यं प्राप्तः पदं परमहंसगणैर्दुरापं ॥ ८ ॥ ॥ ७ ॥
भा॥ श्रीमदध्यात्मरामायणे उ० किष्किंधाकांडे वालिवधो नाम द्वितीयः सर्गः ॥ ॥ श्रीमहादेव उवाच ॥ ततो वार्षिकदिनानि
~~कोतैलक्ष्यमसि मुहुर्मुहुः संचरन् ॥ पक्वमूलफलं लक्ष्मणेन सह कोविलसुखं ॥ बनकुलतलपूरितं नेव~~
~~रस्ततितविघ्नदंदवान् ॥ वीक्षा विस्मय नगाकुंज मुद्यान्यव्हदाहितसुकोचनवहयान् ॥ नवघासंसमासरे~~

निहते वालिनि रणे रामेण परमात्मना ॥ दुद्रुवुर्वानराः सर्वे किंष्किंधां भयविह्वलाः ॥ तारामूचुर्महाभागे ह
तो वाली रणाजिरे ॥ अंगदं कुं परिरक्ष मंत्रिः परिचोदय ॥ चतुर्द्वारकपाटादीन्बद्ध्वा रक्षामहे पुरं ॥ वानरा
णां तु राजानं अंगदं कुरु भामिनि ॥ निहतं वलिनं श्रुत्वा तारा शोकविमूर्छिता ॥ अताडयत्स्वपाणिभ्यां शि
रो वक्षश्च भूरिशः ॥ किमंगदेन राज्येन नगरेण धनेन वा ॥ इदानीमेव निधनं यास्यामि पतिना सह ॥ इत्यु
क्त्वा त्वरिता तत्र रुदती मुक्तमूर्धजा ॥ ययौ तारातिशोकार्ता यत्र भर्तृकलेवरं ॥ पतितं वालिनं दृष्ट्वा रक्तैः पां
शुभिरावृतं ॥ रुदंती नाथ नाथेति पतिता तस्य पादयोः ॥ करुणं विलपंती सा ददर्श रघुनंदनं ॥ तारो
वाच ॥ राम मां जहि बाणेन येन वाली हतस्त्वया ॥ गच्छामि पतिसालोक्यं पतिर्मामभिकांक्षते ॥ स्वर्गेपि न सु
खं तस्य मां विना रघुनंदन ॥ पत्नीवियोगजं दुःखं अनुभूतं त्वयानघ ॥ वालिने मां प्रयच्छाशु पत्नीदा
नफलं भवेत् ॥ सुग्रीवस्त्वं सुखं राज्यं दत्तं यद्वालिघातिना ॥ रामेण रमया साकं त्वं सापत्न्यवर्जितं ॥
इत्येवं विलपंतीं तां तारां रामो महामनाः ॥ सांत्वयामास दयया तत्वज्ञानोपदेशतः ॥ किं भीरु शोचसि
व्यर्थं शोकस्याविषयं पतिं ॥ पतिस्तवायं देहो वा जीवो वा वद तत्वतः ॥ पंचात्मको जडो देहस्त्वङ्मांसरुधि
रास्थिमान् ॥ कालकर्मगुणोत्पन्नः सोप्यास्ते चापि ते पुरः ॥ मन्यसे जीवमात्मानं जीवस्तर्हि निरामयः ॥ न जाय

ते न म्रियते न तिष्ठति न गच्छति ॥ न स्त्री पुमान्वा षंढो वा जीवः सर्वगतोऽव्ययः ॥ एक एवाद्वितीयोयं आकाशवदलेपकः ॥ नित्यो ज्ञा
नमयः शुद्धः स कथं शोकमर्हति ॥ तारोवाच ॥ देहोऽचित्काष्ठवद्राम जीवो नित्यश्चिदात्मकः ॥ सुखदुःखादिसंबंध
स्तस्य राम मे वद ॥ श्रीरामचंद्र उवाच ॥ अहंकारादिसंबंधो यावद्देहेंद्रियैः सह ॥ संसारस्तावदेवास्यात्मनस्त्वविवेकि
नः ॥ मिथ्यारोपितसंसारो न स्वयं विनिवर्तते ॥ विषयान्ध्यायमानस्य स्वप्ने मिथ्यागमो यथा ॥ अनाद्यविद्यासंबं
धात्तत्कार्याहंकृतेस्तथा ॥ संसारोऽपवर्गोपि स्याद्रागद्वेषादिसंकुलः ॥ मन एव हि संसारो बंधश्चैव मनः शुभे ॥ आत्मा
नः संसृतिर्वशात् ॥ आत्मा स्वयं तु मनसः परिगृह्य तद्दुःखवान् ॥ कासाज्जुषन्गुणैर्बद्धः संसारे वर्तते वशः ॥ आ
सक्तो गुणस्फुटातः कर्माण्येव नेयः ॥ शुक्ललोहितकृष्णानि गतयस्तस्य मानिनः ॥ एवं कर्मवशाज्जं
तुर्भ्रमत्या भूतसंप्लवं ॥ सर्वोपसंहृतौ जीवो वासनाभिः स्वकर्मभिः ॥ अनाद्यविद्यावशगस्तिष्ठत्यभिनिवे
शतः ॥ सृष्टिकाले पुनः पूर्ववासनामानसैः सह ॥ जायते पुनरप्येवं घटीयंत्रमिवावशः ॥ यदा पुण्यविशे
षेण लभते संगतिं सतां ॥ मद्भक्तानां सुशांतानां तदा मद्विषया मतिः ॥ मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः
ततः स्वरूपविज्ञानमनायासेन जायते ॥ तदाचार्यप्रसादेन वाक्यार्थज्ञानतः क्षणात् ॥ देहेंद्रियमनःप्राणाहंकृतिभ्यः पृ
थक् स्थितं ॥ स्वात्मानुभवतः सत्यमानंदात्मानमद्वयं ज्ञात्वा सद्यो भवेन्मुक्तः सत्यमेव मयोदितं ॥ एवं मयोदि

तं समस्तगो लोचयति येनिशं॥ तस्य संसारदुःखानि न स्युः प्रांतिकदाचन॥ त्वमप्येतन्मयाप्रोक्तमालोचयमविस्मृदुःख्यसि।
अस्पृश्यसे दुःखजालैः कर्मबंधाद्विमोक्ष्यसे॥ पूर्वजन्मार्जितसुकृतेन मद्दर्शनं तमा॥ अतस्त्वं विमोक्षाय रूपमेदर्शितं तु
ते॥ ध्यात्वा तत्रूपमनिशं आलोचय मयोदितं॥ प्रवाहपतितं कार्यं कुर्वंत्यपि न लिप्यसे॥ श्रीरामेणोदितं सर्वं श्रुत्वा तारातिवि-
स्मिता॥ देहाभिमानजं शोकं त्यक्त्वा नत्वा रघूत्तमं॥ आत्मानुभवसंतुष्टा जीवन्मुक्ता बभूव ह॥ क्षणं संगमात्रेण रामेण
परमात्मना ~~अनादि~~ अनादिबंधं निर्धूय मुक्ता सद्यो विकल्मषा॥ सुग्रीवोपि च तच्छ्रुत्वा रामवक्त्रात्समी-
रितं॥ जहावज्ञानमखिलं स्वस्थचित्तोभवत्तदा॥ ततः सुग्रीवमाहेदं रामो वानरपुंगवं॥ श्रीरामउवाच॥ भ्रातुर्ज्येष्ठस्य पु-
त्रेण यद्युक्तं सांपरायिकं॥ कुरु सर्वं यथान्यायं संस्कारादि ममाज्ञया॥ ततोतिबलिभिर्मुख्यैर्वानरैः परिरक्षितं॥ वालिनं पु-
ष्पके न्यस्य सर्वराजोपचारकैः॥ भेरीदुंदुभिनिर्घोषैर्ब्राह्मणैर्मंत्रिभिः सह॥ यूथपैर्वानरैः पौरैस्तारया चांगदेन च॥ गत्वा
चकार तत्सर्वं यथाशास्त्रं प्रयत्नतः॥ स्नात्वा जगाम रामस्य समीपं मंत्रिभिः सह॥ नत्वा रामस्य चरणौ सुग्रीवः प्राह हृष्ट-
धीः॥ सुग्रीवउवाच॥ राज्यं प्रशाधि राजेंद्र वानराणां समृद्धिमत्॥ दासोहं ते पादपद्मं सेवे लक्ष्मणवच्चिरं॥ इत्युक्तो राघवः प्राह
सुग्रीवं सुस्मितं वचः॥ श्रीरामउवाच॥ त्वमेवाहं न संदेहः शीघ्रं गच्छ ममाज्ञया॥ पुरराज्याधिपत्ये त्वं स्वात्मानमभिषेचय॥
नगरं न प्रवेक्ष्यामि चतुर्दशसमाः सखे॥ आगमिष्यति मे भ्राता लक्ष्मणः पत्तनं तव॥ अंगदं यौवराज्ये त्वं अभिषेचय सा-
दरं॥ अहं समीपे शिखरे पर्वतस्य सहानुजः॥ वसामि वर्षादिवसांस्ततस्त्वं यत्नवान्भव॥ किंचित्कालं पुरे स्थित्वा सीता-

याः परिमार्गणे॥ साष्टांगं प्रणिपत्याह सुग्रीवो रामपादयोः॥ सुग्री०उ०॥ यदाज्ञापयसे देव तत्तथैव करोम्यहं॥ अनुज्ञातस्तु
रामेण सुग्रीवः सहलक्ष्मणः॥ गत्वा पुरीं तथा चक्रे यथा रामेण चोदितः॥ सुग्रीवेण यथान्यायं पूजितो लक्ष्मणस्तदा॥
आगत्य राघवं शीघ्रं प्रणिपत्योपतस्थिवान्॥ ततो रामो जगामाशु लक्ष्मणेन समन्वितः॥ प्रवर्षणगिरेरूर्ध्वं शिखरं भू-
रिविस्तरं॥ तत्रैकं गह्वरं दृष्ट्वा स्फाटिकं दीप्तिमच्छुभं॥ वर्षवातातपसहं दिव्यं फलमूलसमीपगं॥ वासाय रोचयामास
रामः सलक्ष्मणः॥ दिव्यमूलफलपुष्पसंयुते मौक्तिकोपमजलाढ्यपल्वले॥ चित्रवर्णमृगपक्षिशोभिते पर्वते
रघुकुलोत्तमोवसत्॥ ॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे तृतीयः सर्गः॥ ॥
॥ ॥ईश्वरउवाच॥ तत्र वार्षिकदिनानि राघवो लीलयापि गुहासु संचरन्॥ पक्वमूलफलभोगतोषितो लक्ष्म-
णेन सहितो वसत्सुखं॥ वातनुन्नजलपूरितमेघानंतरस्तनितविस्फुरदन्नमू॥ वीक्ष्य विस्मयमगच्छजयूथ्य-
न्यइहाहितसुकांचनकल्पान्॥ न बभाससमाः सारदष्टपुष्पकादिजाः॥ धावंतः परितो रामं वीक्ष्य वीक्ष्य हरितेक्ष-
णाः॥ न च यांति सदा ध्याननिष्ठा इव मुनिश्वराः॥ रामं मानुषरूपेण गिरिकाननभूमिषु॥ चरंतं परमात्मानं ज्ञात्वा सि-
द्धगणा भुवि॥ मृगपक्षिगणा भूत्वा राममेवानुसेविरे॥ सौमित्रिरेकदा राममेकांते ध्यानतत्परं॥ समाधिवि-
रमे तं भक्त्या प्रणयाद्विनयान्वितः॥ लक्ष्मणउवाच॥ श्रुतमद्यावत्तेवाक्यात्सुरोक्ताद्विगतो मम॥ अनाद्यविद्या

संस्मृतःसंशयोहृदिसंस्थितः॥इदानींश्रोतुमिच्छामिक्रियामार्गेणराघव॥तवराधनंलोकेयथायदाकुर्वंतियोगि
नः॥इदमेवसदाप्राहुर्योगिनोमुक्तिसाधनं॥नारदोपितथाव्यासब्रह्माकमलसंभवः॥ब्रह्मक्षत्रादिवर्णानां
आश्रमाणांचमोक्षदं॥स्त्रीशूद्राणांचराजेंद्रसुलभंमुक्तिसाधनं॥तवभक्तायमेभ्रात्रेब्रूहिलोकोपकारकं॥
॥श्रीरामउवाच॥ममपूजाविधानस्यनांतोस्तिरघुनंदन॥तथापिवक्ष्येसंक्षेपात्॥यथावदनुपूर्वशः॥स्वगृ
ह्योक्तप्रकारेणद्विजत्वंप्राप्यमानवः॥सकाशात्सद्गुरोर्मंत्रंलब्ध्वामद्भक्तिसंयुतः॥तेनसंदर्शितविधिर्मामेवाराध
येत्सुधी॥हृदयेवानलेवार्चेत्प्रतिमादिषुवाविभौ॥शालग्रामशिलायांवापूजयेन्मामतंद्रितः॥प्रातःस्नानं
प्रकुर्वीतप्रथमंदेहशुद्धये॥वेदतंत्रोदितैर्मंत्रैर्मृल्लेपविधानतः॥संध्यादिकर्मयन्नित्यंतत्कुर्याद्विधिनाबुधः॥
संकल्पमादौकुर्वीतसिध्यर्थंकर्मणांसुधीः॥स्वगुरुंपूजयेद्भक्त्यामद्बुध्यापूजकोमम॥शिलायांस्नपनंकुर्यात्प्रति
मासुप्रमार्जनं॥प्रसिद्धैर्गंधपुष्पाद्यैर्मत्पूजासिद्धिदायिका॥अमायिकोनुवृत्त्यामांपूजयेन्नियतेंद्रियः॥प्र
तिमादिष्वलंकारःप्रियोमेकुलनंदन॥अग्नौयजेतहविषाभास्करेस्थंडिलेयजेत्॥भक्तेनोपहृतंप्रीत्यैश्रद्धया ६३ राम
ममवार्यपि॥किंपुनर्भक्ष्यभोज्यादिगंधपुष्पाक्षतादिकं॥पूजाद्रव्याणिसर्वाणिसंपाद्यैवंसमारभेत्॥ ६७
चैलाजिनकुशैःसम्यगासनंपरिकल्पयेत्॥तत्रोपविश्यदेवस्यसम्मुखःशुद्धमानसः॥ततोन्यासंप्रकुर्वीत

मातृकांबहिरंतरं॥केशवादिततःकुर्यात्तत्त्वन्यासंततःपरं॥मन्मूर्तिपंजरन्यासंमंत्रन्यासंततोन्यसेत्॥प्रति
मादावपितथाकुर्यान्नित्यमतंद्रितः॥कलशंस्वपुरोवामेक्षिपेत्पुष्पादिदक्षिणे॥अर्घ्यपाद्यप्रदानार्थंमधुपर्का
र्थमेवच॥तथैवाचमनार्थंतुन्यसेत्पात्रचतुष्टयं॥हृत्पद्मेभानुविमलांमत्कलांजीवसंज्ञितां॥ध्यायेत्स्वदे
हमखिलंतयाव्याप्तमरिंदम॥तामेवावाहयेन्नित्यंप्रतिमादिषुमत्कलां॥पाद्यार्घ्याचमनीयाद्यैःस्ना
नवस्त्रविभूषणैः॥यावच्छक्योपचारैर्वाह्यर्चयेन्माममायया॥वित्तवसतिकर्पूरकुंकुमागरुचंदनैः॥
अर्चयेन्मंत्रवित्रित्यंसुगंधकुसुमैःशुभैः॥दशावरणपूजांवैआगमोक्तांप्रकारयेत्॥नीराज
नैर्धूपदीपैर्नैवेद्यैर्बहुविस्तरैः॥श्रद्धयोपहरेन्नित्यंश्रद्धालुगहमीश्वरः॥होमंकुर्यात्प्रयत्ने
नविधिज्ञामंत्रकोविदः॥अगस्त्योक्तेनमार्गेणकुंडेचागमवित्तमः॥जुहुयान्मूलमंत्रेणपुंसूक्तेनै
ववापुनः॥अथवौपासनाग्नौवाचरुणाहविषाथवा॥तप्तजांबूनदप्रख्यंदिव्याभरणभूषितं॥
ध्यायेदनलमध्यस्थंहोमकालेसदाबुधः॥पार्षदेभ्योबलिंदत्वाहोमशेषंसमापयेत्॥ततोजपं
प्रकुर्वीतध्यायेन्मांयतवाक्स्मरन्॥मुखवासंचतांबूलंदत्वाप्रीतिसमन्वितं॥मदग्रेनृत्यगी
तादिस्तुतिपाठादिकारयेत्॥प्रणमेद्दंडवद्भूमौहृदिमांनिधायच॥शिरस्याधायमद्दत्तंप्रसादंभावनामयं॥पाणि

ध्यायन्मद्धिग्रहं नित्यं भक्तिसंयुतः॥ रहस्यमापारसंसारदिस्थत्को प्रणम्येत्सुधीः॥ उद्यासवेघपा

पं सर्वं प्रत्यक्ज्योतिषि संस्मरन्॥ एवमुक्तप्रकारेण पूजयेद्विधिवद्यदि॥ इहामुत्र च संसिद्धिं प्राप्नो

ति मदनुग्रहान्॥ मद्भक्तिनित्यमुक्तो यो एवं पूजां दिने दिने॥ करोति मनसा रूपं प्राप्नोत्येव न संश

यः॥ इदं रहस्यं परमं च पावनं मयैव साक्षात्कथितं सनातनं॥ पठत्यजस्रं यदि वा शृणोति

यः स नित्यपूजाफलभाङ् न संशयः॥ एवं परात्मा श्रीरामः क्रियायोगमनुत्तमं॥ पृष्टः प्रा

ह स्वभक्ताय शेषाय महात्मने॥ पुनः प्राकृतवद्रामो मायामालम्ब्य दुःखितः॥ हा सीतेति व

दन्नेवं निद्रां लेभे कथंचन॥ एतस्मिन्नंतरे तत्र किष्किंधायां बुद्धिमान्॥ हनुमान्प्राह

सुग्रीवमेकांते कपिनायकं॥ शृणु राजन्प्रवक्ष्यामि तवैव हितमुत्तमं॥ रामेण ते कृतः

पूर्वमुपकारो ह्यनुत्तमः॥ कृतघ्नेन त्वया नूनं विस्मृतः प्रतिभाति मे॥ त्वत्कृते निहतो वाली वी

रस्त्रैलोक्यसंमतः॥ राज्ये प्रतिष्ठितोसि त्वं तारां प्राप्तोसि दुर्लभां॥ स रामः पर्वतस्याग्रे भ्रात्रा

सह वसन्सुधीः॥ त्वदागमनमेवाग्रे ईक्षते कार्यगौरवात्॥ त्वं तु वानरभावेन संसक्तोऽन्य

हनुमानुवाच४

श्रीराम॰ ६८

वं न बुध्यते॥ करोमीति प्रतिज्ञाय सीतायाः परिमार्गणं॥ न करोषि स नष्टो हि हन्यसे वालिवद्ध्रुवं॥ हनुमद्व

चनं श्रुत्वा सुग्रीवो भयविह्वलः॥ सुग्रीव उवाच॥ हनुमन्सत्यमेवैतत्त्वयोदितं॥ शीघ्रं कुरु त्वम

गीत्वे वानराणां तरस्विनां॥ सहस्राणि दशोदारान्प्रेषयस्व दिशो दिशः॥ सप्तद्वीपगतान्सर्वान्वानरानानय

न्तु ते॥ पक्षमध्ये समायांतु सर्वे वानरपुंगवाः॥ ये पक्षमतिवर्तंते ते वध्या मे न संशयः॥ इत्याज्ञाप्य हनूमंतं

सुग्रीवो गृहमाविशत्॥ सुग्रीवाज्ञां पुरस्कृत्य मानस्य स्वात्मन्यवागमोषपा॥ उपनाघविघासं वेधात

कर्याहं कृतेतस्य॥ संसारोपार्थकोपि स्याद्रागद्वेषादिसंकुलः॥ मन एव हि संसारो बंधश्चैव मनः शुभे॥ आ

नाधान२ त्मा मनःसमानत्वमेत्य तद्गतबंधभाक्॥ यथा विशुद्धः स्फटिकोऽलक्तकादिसमीपतः॥ तत्तद्वर्णयुतो भाति वस्तु

तो नास्ति रंजना॥ बुद्धींद्रियादिसामीप्यादात्मनः संसृतिर्बलात्॥ आत्मा स्वलिंगं तु मनः परिगृह्य तदुद्भ

वान्॥ कामान्जुषन्गुणैर्बद्धः संसारे वर्तते वशः॥ आदौ मनो गुणान्सृष्ट्वा ततः कर्माण्यनेकधा॥ शुक्ललो

हितकृष्णानि गतयस्तत्समानतः॥ एवं कर्मवशाज्जीवो भ्रमत्याभूतसंप्लवं॥ सर्वोपसंहृतौ जीवो वासनाभिः स

दर्शनात्तः॥ स्वैकर्मभिरनाद्यविद्यावशगः स्तिश्त्युत्पत्तिविनाशतः॥ सृष्टिकाले पुनः पूर्ववासनामानसैः सह॥ जायते
पुनरप्येवंघटीयंत्रमिवावशः॥ मदापुण्यविशेषेण लभ्यते संगतिः सतां॥ मद्भक्तानां सुशांतानां तदा मद्वि
षया मतिः॥ मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः॥ ततः स्वरूपविज्ञानमनायासेन जायते॥ सदाचा
र्यप्रसादेन वाक्यार्थज्ञानतः क्षणात्॥ देहेंद्रियमनःप्राणहंकृतिभ्यः पृथक्स्थितं॥ स्वात्मानुभवतः स
मानंदात्मानमद्वयं॥ ज्ञात्वा सद्यो भवेन्मुक्तिः सत्यमेव मयोदितं॥ एवं मयोदितं सम्यगालोचयति यो निश
॥ तस्य संसारदुःखानि नस्पृशंति कदाचन॥ त्वमप्येतन्मया प्रोक्तमालोचय विशुद्धधीः॥ नस्पृश्यसे दुःख
जालैः कर्मबंधाद्विमोक्ष्यसे॥ पूर्वजन्मानि ते सुभ्रु कृता मद्भक्तिरुत्तमा॥ अतस्तव विमोक्षाय रूपं मे दर्शितं
त्विते॥ ध्यात्वा मद्रूपमनिशं आलोचय मयोदितं॥ प्रवाहपतितं कार्यं कुर्वत्यपि न लिप्यसे॥ श्रीरामेणोदि
तं सर्वं श्रुत्वा तारातिविस्मिता॥ देहाभिमानजं शोकं त्यक्त्वा नत्वा रघूत्तमं॥ आत्मानुभवसंतुष्टा जीवन्मुक्ता ब श्रीरा
भूव ह॥ क्षणसंगममात्रेण रामेण परमात्मना॥ ~~विलंबसवे विते~~ अनादिबंधं निर्धूय मुक्ता सापि विक ६६

त्मषा॥ सुग्रीवोपि च तच्छ्रुत्वा रामवक्त्रात्समीरितं॥ तत्त्वज्ञानमविलंबस्थचित्तो भवत्तदा॥ ततः सुग्रीवमाहेदं रामो वान
रपुंगवं॥ श्रीराम उ॥ भ्रातुर्ज्येष्ठस्य पुत्रेण युक्तः सर्वं परीयकं॥ कुरु सर्वं यथान्यायं संस्कारादि ममाज्ञया॥ ततोतिबालिसंस्कृ
रवो वानरैः परिणीयत॥ वालिनं पुष्पके क्षिप्त्वा सराजोपचारकैः॥ भेरीदुंदुभिनिर्घोषैर्ब्राह्मणैर्मंत्रिभिः सह॥ युहनुमान्मंत्रिस
तमः॥ तस्माण्णे प्रेषयामास हरीद्रुमः सुधीः॥ अगणितगुणसत्वान्वायुवेगप्रचारान्वनचरगणमुख्यान्पर्वताकाररूपा
न्॥ पवनहितकुमारः प्रेषयामास दूतानतिरभसतरात्मा दानमानादितृप्तान्॥ ॥इति श्रीमदध्यात्मरामायणे उमाम
हेश्वरसंवादे किष्किंधाकांडे तृतीयः सर्गः॥ ॥ ॥ ॥ श्रीमहादेव उवाच॥ ॥ रामस्तु पर्वतस्याग्रे मणिसानौ निशासु
रघ वे॥ सीताविरहजं शोकमसहन्निदमब्रवीत् श्रीराम उवाच पश्य लक्ष्मण मे सीता राक्षसेन हृता बलान्॥ मृता मृता
वाति वेत्तुं न जाने ह्यहि भामिनी॥ जीवतीति मम ब्रूयात्कश्चित्प्रियकृत्तमः॥ यदि जानामि तां साध्वीं जीवंतीं यत्र कुत्र
वा॥ हठादेवाहरिष्यामि सुधामिव पयोनिधेः॥ प्रतिज्ञां शृणु मे भ्रातर्येन मे जननी कृता॥ नीतां तं भस्मसात्कुर्यां सपु
त्रबलवाहनं॥ हा सीते चंद्रवदने वसंती राक्षसालये॥ दुःखार्ता मामपश्यंती कथं प्राणान्धरिष्यसि॥ चंद्रोपि सूर्यवद्भा
ति मम चंद्राननां विना॥ चंद्र त्वं जानकीं स्पृष्ट्वा करैर्मां स्पृश शीतलैः॥ सुग्रीवोपि दयाहीनो दुःखितं मां न पश्य
ति॥ राज्यं निष्कंटकं प्राप्य स्त्रीभिः परिवृतो रहः॥ कृतघ्नो दृश्यते व्यक्तं पानासक्तोतिकामुकः॥ नायाति शरदं पश्य

ध्या॰रा॰
९५

न्न च मार्गं विजानुप्रियां॥ पूर्वोपकारिणं दुष्टः॥ कृतघ्नो विस्मृतो हि मां॥ हन्मि सुग्रीवमप्यद्य सपुरं सहबांधवं॥ वाली यथा ह ७०
७० तो मे द्य सुग्रीवो पि तथा भवेत्॥ इति रुष्टं समालोक्य राघवं लक्ष्मणो ब्रवीत्॥ लक्ष्मण उ॥ इदानीमेव गत्वाहं सुग्रीवं दु
ष्टमानसं॥ मामाज्ञापय हत्वा तमायास्ये राम तेंतिकं॥ इत्युक्त्वा धनुरादाय खड्गं तूणीरमेव च॥ गंतुमभ्युद्यतं वीक्ष्य रा
मो लक्ष्मणमब्रवीत्॥ श्रीराम उवाच॥ न हंतव्यस्त्वया वत्स सुग्रीवो मे प्रियः सखा॥ किंतु भीषय सुग्रीवं वालिवत्त्वं
हनिष्यसे॥ इत्युक्त्वा शीघ्रमादाय सुग्रीवप्रतिभाषितं॥ आगच्छ पश्चाद्यत्कार्यं तत्करिष्याम्यसंशयं॥ तथेति ल
क्ष्मणो गच्छत्त्वरितं भीमविक्रमः॥ किष्किंधां प्रति कोपेन निर्दहन्निव वानरान्॥ सर्वज्ञो पि लक्ष्मीको विज्ञानात्मापि रा
घवः॥ सीतामनुशुशोचार्तः प्राकृतः प्राकृतामिव॥ बुद्ध्यादिसाक्षिणस्तस्य मायाकार्यातिवर्तिनः॥ रागादिरहितस्या
स्य तत्कार्यं कथमुद्भवेत्॥ ब्रह्मणोक्तमृतं कर्तुं राज्ञो दशरथस्य हि॥ तपसः फलदानाय जातो मानुषवेषधृक्॥ मायया
मोहिताः सर्वे जना अज्ञानसंयुताः॥ कथमेषां भवेन्मोक्ष इति विष्णुर्विचिंतयन्॥ कथां प्रथयितुं लोके सर्वलोक राम
मलापहां॥ रामायणेति यां रामो भूत्वा मानुषचेष्टकः॥ क्रोधं मोहं च कामं च व्यवहारार्थसिद्धये॥ तत्तत्कालो ९०
चितं गृह्णन्मोहयत्यवशाः प्रजाः॥ अनुरक्त इवाज्ञेषु गुणेषु गुणवर्जितः॥ विज्ञानमूर्तिर्विज्ञानशक्तिः

साक्षी गुणान्वितः॥ अतः कामादिभिर्नित्यमविलिप्तो यथा नभः॥ विंदंति मुनयः केचिज्जानंति सनकादयः॥ तद्भक्ता निर्मलात्मानः सम्यग्जानंति नि
त्यदा॥ भक्तचित्तानुसारेण जायते भगवानजः॥ लक्ष्मणोपि तदा गत्वा किष्किंधानगरांतिकं॥ ज्याघोषमकरोत्तीव्रं भीषयन्सर्ववानरान्॥
तं दृष्ट्वा प्राकारस्था वानरा वप्रमूर्धनि॥ चक्रुः किलकिलाशब्दं धृतपाषाणपादपाः॥ तान्दृष्ट्वा क्रोधताम्राक्षो वानरांल्लक्ष्मणस्त
दा॥ निर्मूलान्कर्तुमुद्युक्तो धनुरादाय वीर्यवान्॥ ततः शीघ्रं समागत्य ज्ञात्वा लक्ष्मणमागतं॥ निवार्य वानरान्सर्वानंगदो बुद्धि
सत्तमः॥ गत्वा लक्ष्मणसामीप्यं प्रणनाम स दंडवत्॥ ततोंगदं परिष्वज्य लक्ष्मणः प्रीतिवर्धनः॥ लक्ष्मण उवाच॥ वेगेन वत्स गच्छ त्वं
पितृव्याय निवेदय॥ ममागतं राघवेण चोदितं रौद्रमूर्तिना॥ तथेति त्वरितं गत्वा सुग्रीवायन्यवेदयत्॥ लक्ष्मणः क्रोधताम्रा
क्षः पुरद्वारि बहिः स्थितः॥ तच्छ्रुत्वातीव संत्रस्तः सुग्रीवो वानरेश्वरः॥ आहूय मंत्रिणां श्रेष्ठं हनूमंतमथाब्रवीत्॥ गच्छ त्वमंगदेना
शु लक्ष्मणं विनयान्वितः॥ सांत्वयन्कोपितं वीरं शनैरानय मंदिरं॥ प्रेषयित्वा हनूमंतं तारामाह कपीश्वरः॥ सुग्रीव उवाच॥
त्वं गच्छ सांत्वयंती तं लक्ष्मणं मृदुभाषिता॥ शांतमंतःपुरं नीत्वा पश्चाद्दर्शय मेनघं॥ भवत्विति तत स्तारा मध्यकक्षं समावि
शत्॥ हनूमानंगदेनैव सहितो लक्ष्मणांतिकं॥ गत्वा ननाम शिरसा भक्त्या स्वागतमब्रवीत्॥ एहि वीर महाभाग भवद्गृह
मशंकितं॥ प्रविश्य राजदारादीन्दृष्ट्वा सुग्रीवमेव च॥ यदाज्ञापयसे पश्चात्तत्सर्वं करवाणि भो॥ इत्युक्त्वा लक्ष्मणं भक्त्या
करे गृह्य समारुतिः॥ आनयामास नगरमध्याद्राजगृहं प्रति॥ पश्यंस्तत्र महासौधान्यूथपानां समंततः॥ जगाम
भवनं राज्ञो सुरेशसदनोपमं॥ मध्यकक्षगता तत्र तारा तारादिपानना॥ सर्वाभरणसंपन्ना मदरक्तांतलोचना॥ उवा

चलक्ष्मणेन त्वाक्षित पूर्वीति प्रभाषिणी ॥ तारोवाच ॥ प्रसीद देवर नंदंते साधुस्त्वं नत्वत्सल ॥ किमर्थं कोपमाकार्षीर्नरेन्द्रपीश्वरे ॥ बहु
कालमनाश्वासदुःखमेवानुभूतवान् ॥ इदानीं बहुदुःखौघाद्विरहितः ॥ नकश्चत्सारान्सुग्रीवः प्रापलोभ्यो महामते ॥
२ कोमासक्तोरघुपतेः सकार्यं नागहरिः ॥ आगमिष्यंति हरयो नानादेशगताश्च ते ॥ प्रेषिता दश साहस्राहरयो रघुसत्तम ॥
आनेतुं वानरान्दिग्भ्यो महापर्वतसन्निभान् ॥ सुग्रीवः स्वयमागत्य सर्ववानरयूथपैः ॥ विधमिष्यति दैत्यो चानुरावणं
हनिष्यति ॥ त्वयैव सहितोचैव गंता वानरपुंगवः ॥ पश्यांतर्सर्ववनं तत्रपुष्पधारसुहृत्कृतं ॥ दृष्ट्वा सुग्रीवमनयं दत्वानयसतैः
वते ॥ तारायावचश्श्रुत्वा क्रोधं त्यक्त्वा च लक्ष्मणः ॥ जगामांतःपुरं यत्र सुग्रीवो वानरेश्वरः ॥ दृढमालिंग्य सुग्रीवः पर्यंकेप
र्यवस्थितः ॥ सुग्रीवो लक्ष्मणं दृष्ट्वा क्रोधसंरक्तलोचनं ॥ उत्थायाथागतस्तत्र स्थित्वा पपात दंडवद्भुवि ॥ प्रांजलिः प्रणतो
नत्वा तं सोऽस्प्राह सीतवन् ॥ मया संप्रेषिताः सर्वे वानरा दिक्षु वानरान् ॥ आनेतुं पर्वताभा वारान्महाबलपराक्रमा
त ॥ इत्युक्त्वा मौनमास्थे व्यवस्थितो सौ वानराधिपः ॥ तं दृष्ट्वा लक्ष्मणः क्रुद्धो मदविह्वलितेक्षणं ॥ लक्ष्मण उ ॥ रे रे सुग्रीव दुर्बु
द्धे विस्मृतोसि रघूत्तमं ॥ वाली येन हतो वीरः स बाणोऽद्य प्रतीक्षते ॥ त्वामेव वालिनो मार्गं गमिष्यसि मया हतः ॥ एव राम
मुक्तं तपतव वं दंते लक्ष्मणेन तदा ॥ हनुमानुवाच ॥ हे लक्ष्मण महाबाहो नत्वमेवं प्रभाषसे ॥ त्वत्तोऽधिकतरो रामे भक्तो ७१॥
यं वानराधिपः ॥ रामकार्यार्थसनिष्ठं जागर्ति न तु विस्मृतः ॥ आगताः परितः पश्य वानराः कोटिशः प्रभो ॥ गमिष्यंस्तोषि
ष्यंत चिरेणैव सीतायाः परिमार्गणे ॥ साधयिष्यति सुग्रीवो रामकार्यमशेषतः ॥ श्रुत्वा हनुमतो वाक्यं सौमित्रिर्लज्जितो

नवत् ॥ सुग्रीवस्तवर्चपाद्यौ चैव लक्ष्मणं समुपाहरत् ॥ आलिंग्य प्राह रामस्य दासोऽहं तेन रक्षितः ॥ सुग्रीव उ ॥ रामः स्वतेजसा लोकान् हं
त्वा चैनैव जेष्यति ॥ सहायमात्रमेवाहं वानरैः सहितः प्रभो ॥ लक्ष्मण उवाच ॥ सरवेत्वं शृणु सुग्रीव यल्लिखि चिह्नमयोदित
॥ तत्र हे महाभाग त्वरण्याद्य प्रतीक्षते मया ॥ गच्छामो वै च सुग्रीव रामस्तिष्ठति कानने ॥ एवं कारत्वादिदुःखा तो जानकी विरह
प्रतु ॥ तच्चेतिरथमारुह्य लक्ष्मणेन समन्वितः ॥ वानरैः सहितो राजा रामसमीपं चाभ्युपागत ॥ भेरीमृदंगैर्बहुभिः सवानरैः
श्वेतातपत्रव्यजनैश्च प्रोज्जितः ॥ नीलांगदाद्यैर्हनुमत्प्रधानैः समावृतो राघवमभ्युगाद्धरिः ॥ ॥ इति श्रीमदध्यात्म[illegible] ६
॥ [illegible] ॥ [illegible] ॥ गुहाद्वारि शिलातले ची
राजिनधरं श्यामं जटामौलिविराजितं ॥ विशाललनयनं शांतं स्मितचारुमुखांबुजं ॥ सीताविरहसंतप्तं पश्यन्मृगपक्षिणः ॥ रथा
द्वैरात्समुत्सुय सतिके ॥ स्थापयित्वा यथान्यायं पूजयामास धर्मवित् ॥ ततोऽब्रवीत्सुग्रीवो नतिलि सुधीः ॥ वानराधिप उवाच ॥
देवपश्य समायांती वानराणां महाचमूः ॥ कुलाचलाद्रिसंभूता मेरुमंदरसंभवाः ॥ नानाद्वीपसरित्शैलवासिनः पर्वतोपमाः ॥
असंख्याताः समायांति हरयः कामरूपिणः ॥ सर्वे देवांशसंभूताः सर्वे युद्धविशारदाः ॥ अत्र केचिद्गजबलाः केचिद्दशगजो
पमाः ॥ गजायुतबलाः केचिदन्येऽमितबलाः प्रभो ॥ केचिदंजनकूटाभाः केचित्कनकसन्निभाः ॥ केचिद्रक्तांतव
दीर्घवालास्तथापरे ॥ शुद्धस्फटिकसंकाशाः केचिद्राक्षससन्निभाः ॥ गर्जंतः परितो यांति वानरायुद्धकांक्षिणः ॥ [illegible]
कोटिशः सर्वे फलमूलाशनाः प्रभो ॥ ऋक्षाणामधिपो वीरो जांबवान्नाम बुद्धिमान् ॥ एष सेनापतिः श्रेष्ठः [illegible]
कोटिद्वयपः ॥ हनूमानेष विख्यातो महासत्वपराक्रमः ॥ वायुपुत्रोऽतितेजस्वी मंत्री बुद्धिमतांवरः ॥ नलो नीलश्च

गंधमादनः॥ सरभो मैंदद्विविदौ गजः पनस एव च॥ बलीमुखो दधिमुखः सुषेणस्तार एव च॥ केसरी च महासत्त्वः पिता हनुमतो बली॥
एते मयूथपा राम सद्यान्ये न मयोदिताः॥ महात्मानो महावीर्याः शक्रतुल्यपराक्रमाः॥ एते प्रत्येकतः कोटि वानरयूथपाः॥ त
वाज्ञाकारिणः सर्वे सर्वे देवांशसंभवाः॥ एष वालिसुतः श्रीमानंगदो नाम विश्रुतः॥ वालितुल्यबलो वीरो रा
क्षसानां कुलांतकः॥ एते चान्ये च बहवस्त्वदर्थे त्यक्तजीविताः॥ योद्धारः पर्वताग्रैश्च निपुणाः शस्त्रघातने॥ आ
ज्ञापय रघुश्रेष्ठ सर्वे तव वशवर्तिनः॥ ततः सुग्रीवमालिंग्य हर्षपूर्णाश्रुलोचनः श्रीराम उ॥ ततो सुग्रीव जा
नासि सर्वं त्वं कार्यगौरवं॥ मार्गणार्थं हि जानक्या नियुक्ष्व यदि रोचते॥ श्रुत्वा रामस्य वचनं सुग्रीवः प्रीतमानसः॥
प्रेषयामास बलिनो वानरान्वानरर्षभः॥ दिक्षु सर्वासु विविधान्वानरान्प्रेष्य सत्वरं॥ दक्षिणां दिशमत्यर्थं प्राय
त्नेन महाबलान्॥ युवराजं जांबवंतं हनूमंतं महाबलं॥ नलं सुषेणं शरभं मैंदं द्विविदमेव च॥ प्रेषयामास सु
ग्रीवो वचनं चेदमब्रवीत॥ वानराधिप उवाच॥ विचिन्वंतु प्रयत्नेन भवंतो जानकीं शुभां॥ मासादर्वाङ्निवर्तध्वं मच्छास
नपुरःसराः॥ सीतामदृष्ट्वा यदि वो मासादूर्ध्वं दिनं भवेत॥ तदा प्राणांतिको दंडो मत्तः प्राप्स्यथ वानराः॥ सीतामदृष्ट्वा
यदि वो मासादूर्ध्वं दिनं भवेत॥ तदा प्राणांतिको दंडो मत्तः प्राप्स्यथ वानराः॥ इति प्रस्थाप्य सुग्रीवो वानरान्भीमवि
क्रमान्॥ रामस्य पार्श्वे श्रीरामं नत्वा चोपविवेश सः॥ गच्छंतं मारुतिं दृष्ट्वा रामो वचनमब्रवीत॥ अभिज्ञाना
र्थमेतन्मे अंगुलीयकमुत्तमं॥ मन्नामाक्षरसंयुक्तं सीतायै दीयतां रहः॥ अस्मिन्कार्ये प्रमाणं हि त्वमेव कपिसत्तम॥
जानामि सत्त्वं ते सर्वं गच्छ पंथाः शुभास्तव॥ एवं कपीनां राज्ञा ते विसृष्टाः परिमार्गणे॥ सीतायाः अंगदमुखा व

स्व

भवेत॥ सुग्रीवस्त्वर्घ्यपाद्याद्यैर्लक्ष्मणं समपूजयत॥ आलिंग्य प्राह रामस्य दासोऽहं तेन रक्षितः॥ रामश्च तेजसा
लोकान्क्षणार्द्धेनैव जेष्यति॥ सहायमात्रमेवाहं वानरैः सहितः प्रभोः॥ सौमित्रिरपि सुग्रीवं प्राह किंचिन्मयोदितं॥
तत्क्षमस्व महाभाग प्रणयाद्भाषितं मया॥ गच्छामोऽद्यैव सुग्रीव रामस्तिष्ठति कानने॥ एकएवाति दुःखार्त्तो जा
नकीविरहात्प्रभुः॥ तथेति रथमारुह्य लक्ष्मणेन समन्वितः॥ वानरैः सहितो गत्वा राममेवान्वपद्यत॥ भे
रीमृदंगैर्बहुढक्का च वानरैः श्वेतातपत्रं चमरैर्व्यजनैश्च शोभितः॥ नीलांगदाद्यैर्हनुमत्प्रधानैः समावृतो राघवमभ्यगा
द्धरिः॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे पंचमोध्यायः॥५॥ दृष्ट्वा रामं समासी
नं गुहाद्वारि शिलातले॥ चैलाजिनधरं श्यामं जटामौलिविराजितं॥ विशालनयनं शांतं स्मितचारुमुखां
बुजं॥ सीताविरहसंतप्तं पश्यंतं मृगपक्षिणं॥ रथादारात्समुत्पत्य वेगात्सुग्रीवलक्ष्मणौ॥ रामस्य पादयोरग्रे पे
ततुर्भक्तिसंयुतौ॥ रामः सुग्रीवमालिंग्य पृष्ट्वानामयमंतिके॥ स्थापयित्वा यथान्याय्यं पूजयामास धर्मवित
॥ ततोऽब्रवीद्रघुश्रेष्ठं सुग्रीवो भक्तिनम्रधीः॥ देवपश्य समायांतीं वानराणां महाचमूं॥ कुलाचलाद्रिसंभवा

मेरुमंदरसंभवाः नानाद्वीपपरिक्षेत्रलवासिनः पर्वतोपमाः ॥ असंख्यातोसमापांतिहरयः कामरूपिणः ॥ स मिर
र्वेदेवांशसंभूतास्सर्वे युद्धविशारदाः ॥ अत्र केचिद्गजबलाः केचिद्दशगजोपमाः ॥ गजायुतबलाः केचिदन्ये तदधि
बलोपमाः केचिदंजनसंकाशाः केचित्कनकसंनिभाः केचित्क्रांतवदनाः दीर्घबलास्तथापरे ॥ शुद्धस्फ
टिकसंकाशाः केचिद्विद्रुमसंनिभाः गर्जंतः सर्वतो यांति वानराः युद्धकांक्षिणः ॥ रहदाकारिणः सर्वफलमू
लाशिनः प्रभो ॥ अत्रैषामधिपो वीरो जांबवान्नाम बुद्धिमान् ॥ एषो मे मंत्रिणां श्रेष्ठः कोटिभल्लूकवृंदपः ॥ हनु
मानेष विख्यातो महासत्वपराक्रमः ॥ वायुपुत्रो तितेजस्वी मंत्री बुद्धिमतां वरः ॥ नलो नीलस्सगवयो गवाक्षो
गंधमादनः ॥ शरभो मैंदश्चैव गजः पनस एव च ॥ बलीमुखो दधिमुखो सुषेणस्तार एव च ॥ केशरी च महा खे ५
सत्वः पिता हनुमतो बली ॥ एते मे यूथपाः ॥ राम प्राधान्येन मयोदिताः ॥ महात्मनो महावीर्याः ॥ शक्रतुल्यपराक्र
माः एते प्रत्येकतः कोटिकोटिवानरयूथपाः ॥ न[illegible]कारिणः सर्वे सर्वे देवांशसंभवाः ॥ एष वालिसुतः श्रीमानंग
ज्ञा३ दो नाम विश्रुतः ॥ वालितुल्यबलो वीरो राक्षसानां कुलांतकः ॥ एते चान्ये च बहवस्तारपर्यंतक्रमजीविताः ॥ सोप्रोरोः पर्व
निपुण१ तो ग्रैश्च निर्जितो शत्रुघातने ॥ अत्रापपरद्युम्ने हृष्टे [illegible] वितवशत्रुनिवर्तिनः ॥ रामः सुग्रीवमालिंग्य हर्षपर्याकुललोचनः प्रा राम

स नः ॥७५

हे सुग्रीव नानासि सर्वं त्वं किं कार्यगौरवं ॥ मार्गणार्थं हि जानक्याः [illegible]पुं [illegible] परिरोचते ॥ श्रुत्वा रामस्य वचनं सुग्री
वः प्रीतमानसः प्रेषयामास बलिनो वानरान्वानरर्षभः ॥ दिक्षु सर्वासु विविधान्वानरान्प्रेष्य सत्वरं ॥ दक्षिणां दिशमत्यर्थं प्रय
युु३ त्नेन महाबलान् ॥ युवराजं जांबवंतं हनुमंतं महाबलं ॥ नलं सुषेणं शरभं मैंदं द्विविदमेव च ॥ प्रेषयामास सुग्रीवो
वचनं चेदमब्रवीत् ॥ विचिन्वंतु प्रयत्नेन भवंतो जानकीं शुभां ॥ मासादर्वाङ्निवर्तध्वं मच्छासनपुरस्सराः ॥ सीतामदृ
ष्ट्वा यदि वा मासादूर्ध्वं दिनं भवेत् ॥ तदा प्राणांतिकः दंडमत्तः प्राप्स्यथ वानराः ॥ इति प्रस्थाप्य सुग्रीवो वानरान्भीमवि त्रि५
क्रमान् ॥ रामस्य पार्श्वे श्रीरामं नत्वा चोपविवेश सः ॥ गच्छंतं मारुतिं दृष्ट्वा राम एवं वचनमब्रवीत् ॥ अभिज्ञानार्थमे शृ६
तन्मद्रांगुलीयकमुत्तमं ॥ मन्नामाक्षरसंयुक्तं सीतायै दीयतां [illegible] ॥ अस्मिन्कार्ये प्रमाणं हि त्वमेव कपिसत्तम हरेः७
॥ जानामि सत्वं ते सर्वं गच्छ पंथाः शुभस्तव ॥ एवं कपीनां राज्ञा ते विसृष्टाः परिमार्गणे ॥ ते सीतापार्श्वमंगदमुखा
वभ्रमुर्वने वने ॥ भ्रमंतो विंध्यगहने ददृशुः पर्वतोपमं ॥ राक्षसं भीषणाकारं भक्षयंतं मृगान्गजान् ॥ रावणो
वमिति ज्ञात्वा केचिद्वानरपुंगवाः ॥ जघ्नुः किलकिलाशब्दं मुंचंतो मुष्टिभिः हतात ॥ नायं रावण इत्युक्त्वा पु
८२ रन्यत्र ततो वनं ॥ तथान्यत्रापि सलिलं तत्राविंदन्हरिपुंगवाः ॥ विश्रमंतो महारण्ये क्षुत्प्रकोपीडितास्तुकाः ॥ हदृशु
र्गह्वरं तत्र तृणगुल्मावृतं महत् ॥ अदृष्टपूर्वं कपयो विविशुः सा [illegible] ता [illegible] तत्र सलिलं [illegible] प्रावि

॰तां। इत्युक्त्वा हनुमानग्रे प्रविवेश तमन्वयुः। सर्वे परस्परं धृत्वा बाहून्बाहुभिरुत्सुकाः॥ अंधकारे महद्
दूरं गत्वापश्यन्कपीश्वराः। जलाशयान्मणिनिभतोयान्कल्पद्रुमोपमान्

नं शाखिनो महावृक्षान्पक्वफलैर्नम्रान्मधुद्रोणसमन्वितान्। गृहान्सर्वगुणोपेतान्मणिवस्त्रादिपूरितान् दिव्यभ
क्ष्यान्नसहितान्मानुषैः परिवर्जितान्॥ विस्मितास्तत्र भवने दिव्ये कनकविष्टरे। प्रभया दीप्यमानां ते ददृशुः स्त्रियम् येर
नीर एकलां॥ ध्यायंतीं चीरवसनां योगिनीं योगमास्थितां। प्रणेमुस्तां महाभागां भक्त्या भीत्या च वानराः। दृष्ट्वा तान्वा
नरान्देवी प्राह यूयं किमागताः॥ कुतो वा कस्य दूता वा मत्स्थानं किं प्रधर्षथ। तच्छ्रुत्वा हनुमानाह शृणु वक्ष्या मु
मि देवि ते॥ अयोध्याधिपतिः श्रीमान्राजा दशरथः प्रभुः॥ तस्य पुत्रो महाभागो ज्येष्ठो राम इति श्रुतः॥ पितुराज्ञां
५८ पुरस्कृत्य सभार्यः सानुजो वनं॥ गतस्तत्र हृता भार्या तस्य सा वै दुरात्मना॥ रावणेन ततो रामः सुग्रीवं सानुजोऽप
यौ। सुग्रीवो मित्रभावेन रामस्य प्रियवल्लभां॥ मृगयध्वमिति प्राह ततो वयमुपागताः। वनं तावद्विचिन्वंतो ज्ञा
नकीं जलकांक्षिणः॥ प्रविष्टा गह्वरं घोरं दैवादत्र समागताः॥ त्वं वा किमर्थमात्रासि का वा त्वं वद नः शुभे। योगिनी
च तथा दृष्ट्वा वानरान्प्राह हृष्टधीः॥ यथेष्टं फलमूलानि जग्ध्वा पीत्वामृतं पयः॥ आगच्छत ततो वक्ष्ये मम वृत्तां त३
तमादितः॥ तथेति भुक्त्वा पीत्वा च हृष्टास्ते सर्ववानराः। देव्याः समीपं गत्वा ते बद्धांजलिपुटाः स्थिताः॥ ततः प्राह ह राम
नूमंतं योगिनी दिव्यदर्शना। हेमा नाम पुरा दिव्यरूपिणी विश्वकर्मणः॥ पुत्री महेशं नृत्येन तोषयामास भामिनी
मा

तुष्टो महेशः प्रददाविदं दिव्यपुरं महत्॥ अत्र स्थिता सा सुचिरं वर्षाणामयुतायुतं॥ तस्याहं सखी विष्णुतत्परा मोक्ष
कांक्षिणी॥ नाम्ना स्वयंप्रभा दिव्यगंधर्वतनया पुरा॥ गता सा ब्रह्मलोकं सा मामाह इदं तपः स्वर॥ अत्रैव निवसंती
त्वं सर्वप्राणिविवर्जिते॥ त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः॥ भूभारहरणार्थाय विचरिष्यति कान
ने॥ मार्गतो वानरास्तस्य भार्यां मार्गयितुं गुहां॥ आगमिष्यंति तत्र गत्वा रामं स्तुत्वा प्रयत्नतः॥ यास्यसि भवनं
विष्णोर्योगिगम्यं सनातनं॥ इतोऽहं गंतुमिच्छामि रामं द्रष्टुं त्वरान्विता॥ यूयं पिदध्वमक्षीणि गमिष्यथ बहिर्गुहां॥
तथैव चक्रुस्ते वेगं गताः पूर्वस्थितं वनं॥ सापि त्यक्त्वा गुहां शीघ्रं ययौ रघुसन्निधिं॥ तत्र रामं ससुग्रीवं लक्ष्मणं च दद गत्वा५
र्श ह॥ कृत्वा प्रदक्षिणं रामं प्रणम्य बहुशः सुधीः॥ आह गद्गदया वाचा रोमांचिततनूरुहा॥ दासी तवाहं राजेंद्र
दर्शनार्थमिहागता॥ बहुवर्षसहस्राणि तप्तं मे दुश्चरं तपः॥ गुहायां दर्शनार्थं ते फलितं मे घनं तपः॥ अद्य हि
या२ त्वां नमस्यामि मायायाः पुरतः स्थितं॥ सर्वभूतेषु चालक्ष्यं बहिरंतरवस्थितं॥ योगमायाजवनिकाछन्नो मा
६ नुषविग्रहः॥ न लक्ष्यसे मूढदृशां शैलूष इव वेषधृक्॥ महाभागवतानां त्वं भक्तियोगविधित्सया॥ अवतीर्णोऽसि भ
गवन्कथं जानामि तां शुभां॥ लोको जानातु यः कश्चित्तव तत्त्वं रघूत्तम॥ ममैतत्तव रूपं ते सदा भातु हृदालये॥ राम ते

पादयुगलं दर्शितमोक्षदर्शनं ॥ अदर्शनं भवीर्णानां सन्मार्गपरिदर्शनं ॥ धनपुत्रकलत्रादिविस्मृतिपरिदर्पितं ॥ अकिंचनधनं त्वां
वनाभिधानं जज्ञो हीनिनिवृत्तगुणमार्गोपनिषद्वनधनापते ॥ नमस्त्वात्माभिरामाय निर्गुणाय गुणात्मने ॥ कालरूपिणमीशानमा
दिमध्यांतवर्जितं ॥ समं चरंतं सर्वत्र मनीतापुरुषपरं ॥ देवते चेष्टितं कश्चिन्न वेद नृविडंबनं ॥ न ते स्ति कश्चिद्दयितो द्वेष्यो वा पर एव च ॥
त्वन्मायापिहितात्मानस्त्वां पश्यन्त्ययथाविधं ॥ अजस्याकर्तुरीशस्य देवतिर्यङ्नरादिषु ॥ जन्मकर्मादिकं यच्च तदत्यन्तविडंबनं ॥ त्वा
न५ मा कुर्वन्नंभरं जातं कश्यायवर्षी सिद्धये ॥ केचित्कोसलराजस्य तपसः फलसिद्धये ॥ कौशल्यायाः प्रार्थमाने जातं मातुः परे ज
य नाः ॥ दुःशरणहूतस्य भारहरणं प्रार्थितो विभुः ॥ ब्रह्मणा नररूपेण जातोयमिति केचन ॥ शृण्वंति गायंति च ये कथास्ते रघुनंदन ॥ प
श्यंति तव पादाब्जं भवार्णवसुतारणं ॥ त्वन्मायागुणबद्धोहं व्यतिरिक्तं गुणाश्रयं कथं त्वां देव जानीयां स्तोतुं वा विषयप्रियं ॥
नमस्यामि रघुश्रेष्ठ वाणोप्त्यनश्वराचितं ॥ लक्ष्मणेन सह भ्रात्रा सुग्रीवादिभिरर्चितं ॥ एवं स्तुतो रघुश्रेष्ठः प्रसन्नः प्रणताघहन
॥ उवाच योगिनीं भक्तां किं ते मनसि कांक्षितं ॥ सा प्राह राघवं भक्त्या भक्तिं ते भक्तवत्सल ॥ यत्र कुत्रापि जातायाः निश्चलां देहि मे प्रभो ॥
त्वद्भक्तेषु सदा संगो भूयान्मे प्राकृतेषु न ॥ जिह्वा मे रामरामेति भक्त्या स्मरतु सर्वदा ॥ मानसं श्यामलं रूपं सीतालक्ष्मणसंयुतं धनुर्बाण नमस्ते २
धरं पीतवाससं मुकुटोज्वलं ॥ अंगदैर्नूपुरैर्मुक्ताहारैः कौस्तुभकुंडलैः ॥ भांतं स्मरतु मे राम वरं नान्यं वृणे प्रभो ॥ श्रीराम उवाच ७६
॥ भव त्वेवं महाभागे गच्छ त्वं बदरीवनं ॥ तत्रैव मां स्मरंती त्वं त्यक्त्वेदं भूतपंचकं ॥ मामेव परमात्मानं अचिरान्निपद्यते ॥ अ राम
॥ ७ ॥

त्वा रघूत्तमं चोमं नमस्कृत्य गता तदैव बदरीतरुखंडं जुष्टं तीर्थं तस्य रघुपतिं मत्सा स्मरंती त्यक्त्वा कलेवरमवाप परं पदं ॥ इ
ति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे षष्ठोध्यायः ॥ ६ ॥ अथ तत्र समासीना वृक्षखंडेषु वानराः ॥ चिंतयं
तो विमुह्यंतः सीतामार्गणकर्षिताः ॥ तत्रोवाचांगदः कांश्चिद्वानरान्वानरर्षभः ॥ भ्रमतो गह्वरे स्माकं मासोन्स्नेगतोभवे
त् ॥ सीता नाधिगतास्माभिर्न कृतं राजशासनं ॥ यदि गच्छामि किष्किंधां सुग्रीवोस्मान्हनिष्यति ॥ विशेषतः शत्रुसुतो मा
निमिषान्निहनिष्यति ॥ मयि तस्य कुतो प्रीतिरहं रामेण रक्षितः ॥ इदानीं लब्धकार्यं मे न कृतं तन्निमित्तं भवेत् ॥ तस्य मद्धननेस्त्व
सुग्रीवस्य दुरात्मनः ॥ मातृकल्पां भ्रातृभार्यां पापात्मानुभवत्यसौ ॥ न गच्छेयमतः पार्श्वं तस्य वानरपुंगवाः ॥ त्यक्ष्यामि
जीवितं चात्र येनकेनापि मृत्युना ॥ इत्यश्रुनयनं केचिद्दृष्ट्वा वानरपुंगवाः ॥ व्यथिताः साश्रुनयना युवराजमथाब्रुवन् ॥
ते५ किमर्थं तव शोकोत्र वयं प्राणरक्षकाः ॥ भवामो निवसामोत्र गुहायां भयवर्जिताः ॥ सर्वसौभाग्यसहितपुरं देवपुरोपमं ॥ श
नैः परस्परं वाक्यं वदतां मारुतात्मजः ॥ अंगदं गाढमालिंग्य प्रोवाच नयकोविदः ॥ विचार्यते किमर्थं ते दुर्विचारो न युज्यते
रा३ राज्ञोत्यंतप्रियस्त्वं हि तारापुत्रोतिवल्लभः ॥ रामस्य लक्ष्मणात्प्रीतिस्त्वयि नित्यं प्रवर्धते ॥ अतो न राघवाद्भीतिस्तव राजन्विशेषतः प्र२
॥ अहं तव हिते सक्तो धन्यनान्यं विचारय ॥ गुहाबासस्त्वभिर्भेद्य स्मुक्तो वानरैस्तु यत् ॥ न तेतद्रामबाणानामभेद्यं किं जगत्त्रये ॥
॥ ये त्वां दुर्बोधयंत्येते वानरा वानरर्षभ ॥ पुत्रदारादिकं त्यक्त्वा कथं स्थास्यंति त्वया सह ॥ अन्यत्तु गुह्यं वक्ष्यामि रहस्यं शृणु मे सुत ॥

रामोनमानुषोदेवःसाक्षान्नारायणोव्ययः॥सीताभगवतीमायाजनसंमोहकारिणी॥लक्ष्मणोभुवनाधारःसाक्षाच्छेषःफणीश्व
रः॥ब्रह्मणाप्रार्थितःसर्वैरक्षोगणविनाशने॥मायामानुषभावेनजातालोकरक्षकाः॥यूयंचपार्षदाःसर्वेविष्णोर्वैकुंठवासिनः
॥मनुष्यभावमापन्नेस्वेच्छयापरमात्मनि॥वयंचारण्यजातास्मस्यैवमायया॥वयंतुजपसापूर्वमाराध्यजगतांपतिं
॥तेनैवानुगृहीतास्मःपार्षदत्वमुपागताः॥इदानीमपितस्यैवसेवांकृत्वाविमायया॥पुनर्वैकुंठमासाद्यसुखंस्थास्या
महेवयं॥इत्यंगदमथाश्वास्यगताविध्यंत्यंमहाबलं॥विचिन्वंतोथविपिनंजानकींदक्षिणांबुधेः॥तीरंमहेंद्रस्य
गिरेःपवित्रंपरमायुषः॥दृष्ट्वासमुद्रमपारमगाधंभयवर्द्धनं॥वानराभयसंत्रस्ताःकिंकुर्मइतिवादिनः॥निषेदुरुदधेस्ती धेः
रेसर्वेचिंतयासमन्विताः॥मंत्रयामासुरन्योन्यमंगदाद्यामहाबलाः॥भ्रमतामेवनोमासागतोत्रैवगुहांतरे॥नदृष्टोराव
णोवापिसीतावाजनकात्मजा॥सुग्रीवस्तीव्रदंडोस्मान्निहंत्येवनसंशयः॥सुग्रीववधतोस्माकंश्रेयःप्रायोपवेशनं॥इ
तिनिश्चित्यतत्रैवदर्भानास्तीर्यसर्वतः॥उपविविशुस्तेसर्वेमरणेकृतनिश्चयाः॥एतस्मिन्नंतरेतत्रमहेंद्राद्रिगुहांतरात्॥निर्गत्य
शनैरागात्गृध्रःपर्वतसन्निभः॥दृष्ट्वाप्रायोपविष्टांस्तान्वानरान्पुंगवान्॥उवाचशनकैर्गृध्रःप्राप्तोभक्ष्योद्यमेवहुः॥एकै घ२
कशःक्रमात्सर्वान्भक्षयामिदिनेदिने॥श्रुत्वातद्गृध्रवचनंवानराभीतमानसाः॥भक्षयिष्यतिनःसर्वानसौगृध्रोनसं ७७
शयः॥रामकार्यंनचास्माभिःकृतंकिंचिद्धरीश्वराः॥सुग्रीवस्यापिचहितंनकृतंस्वात्मनामपि॥वृथानेनवधंप्राप्तागच्छा राम

मोपयसादृतं॥अहोजटायुर्धर्मात्मारामस्यार्थेमृतःसुधीः॥मोक्षंप्रापदुरापंयद्योगिनामप्यरिंदमाः॥संपातिस्तुतदावाक्यं
श्रुत्वावानरभाषितं॥केवायूयंममभ्रातुःकर्णपीयूषसन्निभं॥जटायुरितिनामाद्यव्याहरंतःपरस्परं॥उच्यतांवोभयंमास्
त्वत्तःप्लवगसत्तमाः॥तमुवाचांगदःश्रीमानुत्थितोगृध्रसन्निधौ॥रामोदाशरथिःश्रीमांल्लक्ष्मणेनसमन्वितः॥सीतया
भार्ययासार्द्धंविचचारवनांतरे॥तस्यसीताहृतासाध्वीरावणेनदुरात्मना॥मृगयांनिर्गतेरामेलक्ष्मणेचहताबलात्॥
रामरामेतिक्रोशंतींश्रुत्वागृध्रःप्रतापवान्॥जटायुर्नामपक्षींद्रोयुद्धंकृत्वासुदारुणं॥रावणेनहतोवीरोराघवार्थंम
हाबलः॥रामेणदग्धोरामस्यसायुज्यमगमत्क्षणात्॥रामःसुग्रीवमासाद्यसख्यंकृत्वाग्निसाक्षिकं॥सुग्रीवनोदितोहत्वावा
लिनंसुदुरासदं॥राज्यंददौवानराणांसुग्रीवायमहाबलः॥सुग्रीवःप्रेषयामाससीतायाःपरिमार्गणे॥अस्मान्वानरवृंदै
श्चमहासत्वान्महाबलान्॥मासादर्वाद्विःवर्त्तध्वंनोचेत्प्राणान्हरामिवः॥इत्याज्ञप्ताभ्रमंतोस्मिन्वनेगह्वरमध्यगाः॥गतो
मासोनजानीमःसीतांवाराघवांचवा॥मर्तुंप्रायोपविष्टास्मस्तीरेलवणवारिधेः॥यदिजानासिहेपक्षिन्सीतांकथयनःशुभां
ग२ ॥अंगदस्यवचःश्रुत्वासंपातिर्हृष्टमानसः॥उवाचमेममप्रियोभ्राताजटायुःप्लवगेश्वराः॥वहुवर्षसहस्रांतेभ्रातृवार्ताश्रुताम
या॥वाक्यसाहाय्यंकरिष्येहंभवतांप्लवगेश्वराः॥भ्रातुःसलिलदानायनयध्वंमांजलांतिकं॥पश्चात्सर्वंशुभंवोहंभवतांकार्यसि

द्वयोः॥ तथेति निन्युस्ते तीरे समुद्रस्य विहंगमं॥ सोपि तत्सलिले स्नात्वा भ्रातुर्दत्वा जलांजलिं॥ पुनः स्वस्थानमासाद्य स्थि
तो नीतो हरीश्वरैः॥ संपातिः कथयामास वानरान्परिहर्षयन्॥ लंका नाम नगर्यास्ते त्रिकूटगिरिमूर्द्धनि॥ तत्राशोक
वने सीता राक्षसीभिः सुरक्षिता॥ समुद्रमध्ये सा लंका शतयोजनदूरतः॥ दृश्यते मे न संदेहः सीता च परिदृश्यते॥
गृध्रत्वाद्दूरदृष्टिर्मे नात्र संशयितुं क्षमं॥ शतयोजनविस्तीर्णं समुद्रं यस्तु लंघयेत॥ स एव जानकीं दृष्ट्वा पुनरायास्यति
ध्रुवं॥ अहमेव दुरात्मानं रावणं हंतुमुत्सहे॥ भ्रातृहंतारमेकाकी किंतु पक्षविवर्जितः॥ यतध्वमतियत्नेन लंघि
३ तुं सरितांपतिं॥ ततो रघुश्रेष्ठो रावणं राक्षसाधिपं॥ उल्लंघ्य सिंधुं शतयोजनायतं लंकां प्रविश्याथ विदेहकन्यकां दृष्ट्वा समा
भाष्य च वारिधिं पुनस्तर्तुं समर्थः कतमो विचार्यतां॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे
सप्तमोध्यायः॥ ७॥ संपातिः कथयामास स्ववृत्तांतं पुराकृतं॥ अहं पुरा जटायुश्च भ्रातरौ रूढयौवनौ॥ बलेन दर्पितावावां
पा४ बलजिज्ञासया खगौ॥ सूर्यमंडलपर्यंतं गंतुमुत्पतितौ महान्॥ बहुयोजनसहस्रं गतौ तत्र प्रतापितः॥ जटायुस्तं परि
त्रातुं पक्षाभ्यां छाद्य मोहितः॥ स्थितोहं रश्मिभिर्दग्धपक्षोस्मि विंध्यमूर्द्धनि॥ पतितो दूरपतनान्मूर्छितोहं कपीश्व
द२ राः॥ दिनत्रयात्पुनः प्राणसहितो दग्धपक्षकः॥ देशं वा गिरिकूटान्वा न जाने भ्रांतमानसः॥ शनैरुन्मील्य नयने दृष्ट्वा तत्रा
श्रमं शुभं॥ शनैः शनैराश्रमस्य समीपं गतवानहं॥ चंद्रमा नाम मुनिराड् दृष्ट्वा मां विस्मितोऽवदत्॥ संपाते किमिदं ते

निश्चिंते९

विरूपं केन वा कृतं॥ जानामि त्वामहं पूर्वमत्यंतबलवानसि॥ दग्धौ किमर्थं त्वत्पक्षौ कथ्यतां यदि मन्यसे॥ ततः स्वचेष्टितं
सर्वं कथयित्वातिदुःखितः। अब्रुवं मुनिशार्दूलं दह्येहं दाववह्निना॥ कथं धारयितुं शक्तो विपक्षो जीवितुं प्रभो॥ इत्यु
क्तोयं मुनिर्वीक्ष्य मां दयार्द्रविलोचनः॥ शृणु वत्स वचो मेद्य श्रुत्वा कुरु यथेप्सितं॥ देहमूलमिदं दुःखं देहः कर्मसमु
द्भवः॥ कर्म प्रवर्तते देहेऽहंबुद्ध्या पुरुषस्य हि॥ अहंकारस्त्वनादिः स्यात् अविद्यासंभवो जडः॥ चिच्छायया सदा युक्तस्
त्यात्त्व तप्तायःपिंडवत्सदा॥ तेन देहस्य तादात्म्या[illegible]मतः॥ देहोहं कर्मकर्ताहमिति संकल्प्य सर्वदा॥ जीवः करोति कर्माणि तत्फ
लैर्बध्यते वशः॥ ऊर्ध्वाधो भ्रमते नित्यं पापपुण्यात्मकः स्वयं॥ कृतं मयाधिकं पुण्यं यज्ञदानादि निश्चितं॥ स्वर्गं गत्वा सु यं७
खमेष्ये इति संकल्पवान्भवेत्॥ तथैवाध्यासतस्तत्र चिरं भुक्त्वा सुखं म[illegible]न् हीनपुण्यः पतत्यर्वाग्निच्छन् मलत्र९
कर्मचोदितः॥ पतित्वा मंडले चेंदोस्ततो नीहारसंयुतः॥ भूमौ पतित्वा व्रीह्यादौ तत्र स्थित्वा चिरं पुनः॥ भुक्त्वा चतुर्वि
धं भोज्यं पुरुषैर्भुज्यते ततः॥ रेतो भूत्वा पुनस्तेन ऋतौ स्त्रीयोनिसिंचितः॥ योनिरक्तेन संयुक्तो जरायुपरिवेष्टितः॥ दि
ने नेनैकेन कललं भूत्वा रूढत्वमापुयात॥ तत्पुनः पंचरात्रेण बुद्बुदाकारतामियात्॥ सप्तरात्रेण तदपि मांसपेशित्व त्रि५
मापुयात॥ पक्षमात्रेण सा पेशी रुधिरेण परिप्लुता॥ तस्या एवांकुरोत्पत्तिः पंचविंशतिरात्रिषु॥ ग्रीवा शिरश्च स्कंधश्च
पृष्ठवंशस्तथा॥ त्रिभिर्मासैः प्रजायंते दरं पंचधांगानि चैवं हि जायंते मासतः क्रमात्॥ पाणिपादौ तथा पार्श्वं कटिजा

या

७९ नुतथैव च ॥ मासद्वयात्त्वजायंते क्रमेणैव च नान्यथा ॥ त्रिभिर्मासैः प्रजायंते अंगानां संधयः क्रमात ॥ सर्वांगुल्यप्र
तिक्रमान्मासचतुष्टये ॥ नासाकर्णौ च नेत्रे च जायंते पंचमासतः ॥ दंतपंक्तिर्नखाः गुह्यं पंचमे जायते तथा ॥ अर्वा
क्षण्मासतः छिद्रं कर्णयोर्भवति स्फुटं । पायुर्मेढ्रमुपस्थं च नाभिश्चापि भवेन्नृणां ॥ सप्तमे मासि रोमाणि शिरः
केशास्तथैव च विभक्तावयवत्वं च सर्वं संपद्यतेष्टमे ॥ जठरे वर्द्धते गर्भः स्त्रियाः एवं विहंगम ॥ नवमे मासि चेतनसंजी ग:४
वं प्राप्नोति सर्वशः ॥ नाभिसूत्रात्मरंध्रेण मातृभुक्तानुसारतः ॥ वर्द्धते गर्भगः पिंडो न म्रियते स्वकर्मतः ॥ स्मृत्वा
पृ १ सर्वाणि जन्मानि पूर्वकर्माणि यानि च । जठराग्निना तप्तोपि इदं वचनमब्रवीत ॥ नानायोनिसहस्रेषु जायमा
नोनुभूतवान् पुत्रदारादिसंबंधं कोटिशः पशुबांधवान् । कुटुंबभरणासक्त्या न्यायान्यायैर्धनार्जनं । कृतं नाकरवं
विष्णुचिंतां स्वप्नेपि दुर्भगः ॥ इदानीं तत्फलं भुंजे गर्भदुःखं महत्तरं ॥ अशाश्वते शाश्वतवत् देहे तृष्णासमन्वितः ॥ अ न२
यो४ कार्याण्येव कृतवान् ॥ कृतं हितमात्मनः इत्येवं दुःखाद्दुःखमनुभूतं स्वकर्मतः ॥ कदाहं गर्भतो मे स्याद्गर्भान्नि नि४
नि२ र्गमो मातः ॥ इत ऊर्ध्वं नित्यमहं विष्णुमेवानुपूजये ॥ इत्यादि चिंतयन् जीवो योनियंत्रप्रपीडितः ॥ जायमानो
तिदुःखेन नरकात्पातकी यथा ॥ पूतिव्रणान्निपतितः कृमिरेव विशेषतः ॥ ततो बाल्यादिदुःखानि सर्व एवं भुंजते ॥ त्वया वि२
चैवानुभूतानि सर्वत्र विदितानि च ॥ न वर्णितानि मे गत्वा यौवनादिषु सर्वतः ॥ एवं देहोहमित्यस्मादभ्यासान्निरया राम
न्मोहं स्नेहं स्मरन् गर्भयातनामनुभूतवान् निर्गतो यानि पंत्रां ममायया वेष्टितस्तदा कोहं कोहमिति क्रते ७८
अतः याम ठधीः स्वयं ॥ २४

॥ श्री

रिकं ॥ गर्भवासादिदुःखानि भवंत्यभिनिवेशतः ॥ तस्माद्देहद्वयादन्यमात्मानं प्रकृतेः परं ॥ ज्ञात्वा देहादिममतां
त्यक्त्वात्म[illegible]ज्ञानवान् भवेत ॥ जाग्रदादिविनिर्मुक्तं सत्यज्ञानादिलक्षणं ॥ शुद्धं बुद्धं सदा शांतं आत्मानमवधार
ज्ञा येत ॥ चिदात्मनि परिज्ञाते नष्टे मोहे ज्ञसंभवे देहः पततु वारब्धकर्मवेगेन तिष्ठतु योगिनो न हि दुःखं वा सुखं वाज्ञान
संभवं ॥ तस्माद्देहेन सहितो यावत्प्रारब्धसंक्षयः ॥ तावत्तिष्ठ सुखेन त्वं धृतकंचुकसर्पवत ॥ अन्यद्वक्ष्यामि ते पाहि नूनं शृणु मे परमं हि
तं ॥ त्रेतायुगे दाशरथिर्भूत्वा नारायणोव्ययः ॥ रावणस्य वधार्थाय दंडकानागमिष्यति सीतया भार्यया सार्द्धं लक्ष्म
णेन समन्वितः ॥ तत्राश्रमे जनकजां भ्रातृभ्यां रहिते वने ॥ रावणश्चोरवन्नीत्वा लंकायां स्थापयिष्यति ॥ तस्याः सुग्री
व निर्देशाद्वानराः परिमार्गणे ॥ आगमिष्यंति जलधेस्तीरं तत्र समागमः ॥ त्वया तेषां कारणात् भविष्यति न संश
यः ॥ तत्र सीतां स्थितिं तेभ्यः कथयस्व यथार्थतः ॥ तदैव तव पक्षौ द्वावुत्पत्स्येते पुनर्नवौ ॥ संपातिरुवाच ॥ बोधयामास मां
चंद्रमा मुनिः कुलेश्वरः ॥ पश्यंतु पक्षौ मे जातौ नूतनौ अतिकोमलौ ॥ स्वस्ति वो स्तु गमिष्यामि सीतां द्रष्टुं यत्नि
य कुरुध्वं ॥ पतंकुरुध्वं दुर्लंघ्यं समुद्रस्याथिलं घनं ॥ नाम स्मृतिमात्रतोपरिमितं संसारवारांनिधिं ॥ तीर्त्वा गच्छति दुर्जनो पिपर
स्यरा नं विष्णोः परं शाश्वतं तस्यैव स्थितिकारिणः त्रिजगतो रामस्य भक्ताः प्रियाः ॥ यूयं किं न समुद्रकस्तरलोत्थाक्रोशं पदं वानराः ॥
इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे षष्ठोध्यायः ॥ ६ ॥ गते विहंगे संपाते रुवाच? जैवानरपुंगवाः हर्ष

स्त्रि २ य

८० रामहत्ताविष्टाः सीतादर्शनलालसाः॥ ऊचुः समुद्रं पश्यंतो नक्रचक्रभयंकरं॥ तरंगादिभिरुन्नद्धमाकाशमिव दुर्ग्रहं॥ परस्प
रमवोचन्वै कथमेनं तरामहे॥ उवाच चांगदस्तत्र श्रृणुध्वं वानरोत्तमाः॥ भवंतोत्यंतबलिनः शूराश्च कृतविक्रमाः॥ को न:२
वैत्रिवारिधिं तीर्त्वा राजकार्यं करिष्यति॥ एतेषां वानराणां स प्राणदाता न संशयः॥ अतोतिष्ठतु मे शीघ्रं पुरतो यो म
हाबलः॥ वानराणां च सर्वेषां रामसुग्रीवयोरपि॥ स एव पालकोऽस्माकं कार्यं विचारणात्॥ इत्युक्ते युवराजेन तूष्णीं वान २४
रसैनिकाः॥ आसन्नोचुः किंचिदपि परस्परविलोकिनः॥ अंगद उवाच॥ अस्मनो वो बलं सर्वे प्रत्येकं कार्यसिद्धये॥ केन वा स
घते कार्यं जानामस्तदनंतरं॥ अंगदस्य वचः श्रुत्वा प्रोचुर्वीरबलं पृथक्॥ योजनानां दशारभ्य दशोत्तरगुणं जगुः॥ शतादर्
वीकु जांबवांस्तु प्राह मध्ये वनौकसां॥ पुरा त्रिविक्रमे देवे पादं प्रसारयमाने बलिबंधने॥ त्रिसप्तकृत्वो हमगां प्रदक्षिणं विधानतः॥
इदानीं वार्द्धकग्रस्तो न शक्नोमि विलंघितुं॥ अंगदोप्याह मे गंतुं शक्यं पारं महोदधेः॥ पुनर्लंघनसामर्थ्यं न जानामास्ति वा
नवा॥ तमाह जांबवान्वीर त्वं राजा नो नियामकः॥ न युक्तं त्वां नियोक्तुं मे त्वं समर्थोसि यद्यपि॥ अंगद उवाच॥ एवं चेत्स
स्या २ र्वथा सर्वे स्वस्थामो दर्भविष्टरे॥ केनापि न कृतं कार्यं जीवितुं च न शक्यते॥ तमाह जांबवान्वीर दर्शयिष्यामि ते सुतं॥ येना
स्माकं कार्यसिद्धिर्भविष्यत्यचिरेण ते॥ इत्युक्त्वा जांबवान्प्राह हनुमंतमवस्थितं॥ हनूमान्किं रहः स्तूष्णीं स्थीयते कार्य ८०
गौरवे॥ प्राप्ते ऽस्मिन्दैव सा नश्यं दर्शय स्वं महाबलं॥ त्वं साक्षाद्वायुपुत्रोसि वायुतुल्यपराक्रमः॥ रामकार्यार्थमेव त्वं जनितो राम
॥७॥
हितव परा

सि महात्मना॥ जातमात्रेण ते पूर्वं दृष्ट्वोद्यंतं विभावसुं॥ पक्वं फलमिति ज्ञात्वा मीनुत्पतितुमारभः॥ त्वं बालचेष्टया पोजना
नां पंचशतं गतः॥ पतितो सि तदा भुवि॥ अतस्त्वद्बलमाहात्म्यं को वा शक्नोति वर्णितुं॥ उत्तिष्ठ कुरु रामस्य कार्यं नः पा
हि सुव्रत॥ श्रुत्वा जांबवतो वाक्यं हनूमानतिहर्षितः॥ चकार नादं सिंहस्य ब्रह्मांडं स्फोटयन्निव॥ बभूव पर्वताकारो
६२ रहि विक्रमवैष्णवः परः॥ लंघयित्वा जलनिधिं कृत्वा लंकां च भस्मसात्॥ रावणं सकुलं हत्वा नेष्ये जनकनंदि षे २
नीं॥ यद्वा बद्ध्वा गले रज्ज्वा रावणं वामपाणिना॥ लंकां सपर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहं॥ यद्वा दृष्ट्वैव यास्यामि जा
नकीं शुभलक्षणां॥ श्रुत्वा हनुमतो वाक्यं जांबवानिदमब्रवीत्॥ दृष्ट्वागच्छ भद्रं ते जीवंतीं जानकीं शुभां॥ पश्चा
द्रामेण सहितो दर्शयिष्यसि पौरुषं॥ कल्याणं भवतान्मद्र गच्छ ... विहायसा॥ गच्छंतं रामकार्यार्थं वायुस्त्वाम
२४ नुगच्छतु॥ इत्याशीर्भिः समामंत्र्य विसृष्टः प्लवगाधिपैः॥ महेंद्राद्रिशिरो गत्वा बभूवाद्भुतदर्शनः॥ महानगेंद्रप्रति
मोप्रकाशः सुवर्णवर्णोऽरुणचारुवक्त्रः॥ महाफणीन्द्राभसुदीर्घबाहुर्वातात्मजोऽदृश्यत सर्वभूतैः॥ इति श्री राम०
... अध्यात्म रामायणे ... किष्किंधाकांडे नवमोध्यायः॥ ९॥ सर्गेणाऽत्र किष्किंधायां नव सर्गाणि ...
... ॥ शुभमस्तु॥ ॥ ॥ ॥ ॥ ॥

